Rhetoric.—The particular statment in the first half of the stanza being supported by the general statement in the last half, the fig. of speech is अर्थान्तरन्यास which is defined thus :

"सामान्यं वा विशेषेण विशेषस्तेन वा यदि ।
कार्य्यं च कारणेनेदं कार्य्येण च समर्थ्यते ।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ॥"—साहित्यदर्पण ।

Here it is सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः । Besides, there is उपमा in the last foot. As the अर्थान्तरन्यास is quite independent of the उपमा, it is an instance of संसृष्टि of the two figures of speech, (as distinguished from सङ्कर where the one is dependent on the other).

Metre.—The metre is वसन्ततिलक । Def. - 'ज्ञेया वसन्ततिलका तभजा जगौ गः' ।

Ch. of Voice.—···अभिमतेन गतेन अभूयत ।...श्लाघ्यम् गंस्यते [त्वया] । भाग्यपङ्क्त्या इव परिवर्त्तमानया गम्यते ।

Notes.

काञ्चुकीयः—काञ्चुकीय means the chamberlain who is characterised by his peculiar (कञ्चुक) cloak. The current form is कञ्चुकी (अस्त्यर्थे इनिः) । Bharata puts it as कञ्चुकीय । Bhasa has काञ्चुकीय which is to be somehow or other derived thus :—

कञ्चुकी भवः इति कञ्चुकीयः ; कञ्चुक+छ by the rule 'गहादिभ्यश्छ' ; कञ्चुकीयः एव इति काञ्चुकीयः ; कञ्चुकीय+अण्—स्वार्थे । [छ—ईय] । वामन has कञ्चुकमात्मन इच्छति इति कञ्चुकीयः ; कञ्चुक+क्यच् by the rule 'सुप आत्मनः क्यच्', ततः अच् ; then स्वार्थे अण् ।

"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः ।
सर्व्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते ॥
जरा-वैक्लव्ययुक्तेन विशेद् गात्रेण कञ्चुकी ॥"

A कञ्चुकी should have the following qualifications :—

'ये विप्राः सत्त्वसम्पन्नाः कामदोषविवर्ज्जिताः ।
ज्ञान-विज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः ॥'

—भरत ।

Ch. of. Voice.—···उत्क्रियताम् उत्क्रियताम् [युष्माभिः] । दृश्यताम् [त्वया] ।

Sloka 5. (Page 9.)

Sans. Expl.—न खलु इत्यादि । तपोवनस्था जना नैव निराकर्त्तव्याः इत्यर्थः । परिहरतु इत्यादि । 'भवान्' 'नृपापवादं' राजनिन्दां 'परिहरतु' त्यजतु, यथा राजनिन्दा न भवेत् तथा करोतु इत्यर्थः । 'आश्रमवासिषु' तपस्विजनेषु 'परुषं' कठोरता 'न प्रयोज्यम्' नैव प्रकाशयितव्यम् । 'एते मनस्विनः' आश्रमस्थाः उन्नतमनसः जनाः 'नगरपरिभवान्' नागरिक-जीवनस्य अपमानान् 'विमोक्तुं' परिहर्त्तुं 'वनम् अभिगम्य' तपोवनम् एत्य 'वसन्ति' । यान् खलु हृदयमर्मभिदः परिभवान् विमोक्तुं कामाः सन्त्यज्य सर्वान् कामान् अरण्ये विश्राम्यन्तीमे मनस्विनः त एव तत्राप्यापतन्ति इति विषमभेदोऽत्रालङ्कारः ॥ ५ ॥

Notes.

नृपापवादम्—नृपस्य अपवादः—इतत्, तम् । अप – वद् + घञ् = अपवादः ।

परुषम्—Here used in the sense of परुषव्यवहार i. e. harshness. 'निष्ठुरं परुषं ग्राम्यम्'—अमरः ।

आश्रमवासिषु—अधिकरणे ७मी आ – श्रम + घञ्—अधिकरणे इति आश्रमः । आश्रमे वसन्ति इति आश्रमवासिनः, आश्रम – वस + णिनि ; तेषु ।

प्रयोज्यम्—प्र – युज + ण्यत्—कर्मणि ।

नगर-परिभवान्—नगरस्य परिभवाः—इतत्, तान् ।

मनस्विनः—[उन्नतं] मनः एषाम् अस्तीति मनस्विनः, मनस् + विनि

Rhetoric.—The second half being the हेतु of the sentence 'न परुषम् etc.' the fig. of speech is (वाक्यार्थहेतुक) काव्यलिङ्गम् । Def.,—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते'—साहित्यदर्पण । In न खलु न खलु etc. there is the नाट्यालङ्कार (dramatic excellence) named नीति । Def.—'नीतिः शास्त्रेण वर्त्तनम्'—साहित्यदर्पण । In परिहरतु भवान् etc., there is उपदेशन । 'शिक्षा स्यादुपदेशनम्' ।

Sl. 5. Metre.—पुष्पिताग्रा । Def—'अयुजि नयुगरेफतो यकारो, युजि च नजौ जरगाश्च पुष्पिताग्रा ।'

Ch. of Voice—भवता नृपापवादः परिक्रियताम्···परुषेण···प्रयोजेन [भूयते] । एतैः मनस्विभिः · उष्यते ।

Pages 9-10.

Sans. Expl.—हन्त इत्यादि । 'हन्त' हर्षे अव्ययम्, 'सविज्ञानम्' विशिष्टेन ज्ञानेन युक्तम् 'अस्य दर्शनम्' काञ्चुकीयस्य आकृतिः । 'वत्से', 'उपसर्पावः तावदेनम्' आवाम् अस्य समीपं गच्छावः ।

किङ्कृतेत्यादि । 'किङ्कृता' किन्निमित्ता 'इयम् उत्सारणा' लोकानाम् अपसारणम् ? तपस्विन्नित्यादि । 'तपस्विन् इति', 'गुणवान्' सम्मानद्योतकः 'खलु' 'अयम् आलापः' एतत् सम्बोधनम् । 'अपरिचयात् तु' अस्य सम्बोधनस्य आकर्णने अनभ्यासवशात् तु 'न श्लिष्यते' न मधुरं लगति [आलापः] 'मे मनसि'—एतत् सम्बोधनेन न मे मनः प्रसादं लभते इत्यर्थः ।

Notes.

हन्त—An interjection implying 'joy'. "हन्त हर्षेऽनुकम्पायां वाक्यारम्भ-विषादयोः"—अमरः ।

सविज्ञानम्—Adj. to दर्शनम् । विशेषं ज्ञानम् विज्ञानम्—प्रादितत्, विज्ञानेन सह वर्तमानम्—बहुव्रीहिः ।

दर्शनम्—दृश् + ल्युट्—कर्मणि ।

वत्से—This term of address by the aged minister is quite appropriate in these distressing circumstances.

किङ्कृता—Adj. to उत्सारणा । केन (हेतुना) कृता इति किङ्कृता—३तत् ।

आत्मगतम्—Also called स्वगतम् । 'अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।'—साहित्यदर्पण ।

गुणवान्—Adj. to आलापः । गुण is used in the sense of 'worth' or 'honour'.

आलापः—आ—लप् + घञ् । Conversation, here used in the sense of 'address'.

अपरिचयात्—हेतौ ५मी । परि – चि + अच् = परिचयः । न परिचयः—नञ-तत्पुरुषः तस्मात् ।

श्लिष्यते—श्लिष + लट् ते । Nom.—आलापः understood. श्लिष् to embrace, is दिवादि, परस्मैपदी—श्लिष्यति, etc. Here the आत्मनेपदी use is to be explained by the dictum 'आत्मनेपदमिच्छन्ति परस्मैपदिनां क्वचित्' ।

Ch. of Voice.—...सविज्ञानेन दर्शनेन [भूयते]...उपसर्प्यते एषः [आवाभ्याम्] ...किङ्कृतया उत्सारणया [भूयते] ?...गुणवता अनेन आलापेन [भूयते]... ।

Page 11.

Notes.

Sans. Expl.—भो: श्रूयताम् इत्यादि। 'भो: श्रूयताम्'। 'एषा खलु' 'गुरुभि:' पितादिभि: 'अभिहितनामधेयस्य', कथिताभिधानस्य 'अस्माकं 'महाराजदर्शकस्य' 'भगिनी पद्मावती नाम'। 'सा एषा' 'न:' अस्माकं 'महाराजमातरं' महाराजस्य जननीं 'महादेवीम्' 'आश्रमस्थां' आश्रमे कृतवासाम् 'अभिगम्य' द्रष्टुमागत्य 'अनुज्ञाता तत्रभवत्या' पूज्यया महादेव्या अनुमतगमना सती 'राजगृहम् एव' तन्नामिका राजधानीम् एव, राजकुलमेव वा 'यास्यति'। 'तत् अद्य' 'अस्मिन् आश्रमपदे' आश्रमस्थले 'वास:' स्थिति: 'अभिप्रेत:' अभिलषित: 'अस्या:। तत् भवन्त:—॥

गुरुभि:—Nom. of अभिहितनामधेयस्य। 'गुरू गीष्पतिपित्राद्यौ'—अमर:।

अभिहितनामधेयस्य—नामएव नामधेयम्। नामन्+धेय (स्वार्थे)। 'भाग-रूप-नामभ्यो धेय:' अभिहितं नामधेयं यस्य—बहुव्रीहि: तस्य। In compliance with etiquette, the chamberlain, out of regard for his lord did not like to utter his name directly

महाराजदर्शकस्य—महान् राजा इति महाराज:—कर्मधारय:, स चासौ दर्शकश्च—कर्मधारय:, तस्य। King Darsaka was the son (not probably a later descendant?) of king Ajatasatru who was the son of king Bimbisara, the founder of Rajagriha. He ascended the throne of Magadha *circa* 525 B. C.

N. B. According to the Puranas, दर्शक was the son of अजातशत्रु, but his name does not occur in the Buddhist and Jaina chronicles which, however, mention one Naga Dasaka as a later descendant of अजातशत्रु। The Puranic account is supported by Bhasa's version which may, therefore, be accepted as correct. From a comparison of dates and the nature of accounts, it will not be unreasonable to hold that भास was almost a contemporary or a bit posterior to दर्शक। See Intro.—P. 12.

पद्मावती—पद्म+मतुप्,+ङीप् (in fem.). पद्म becomes पद्मा by the rule 'अन्येषामपि दृश्यते'।

महादेवीम्—महती देवी (=राज्ञी)—कर्मधारय:, ताम्। The great queen i. e. the dowager queen, the mother of the reigning

king. The dowager queens generally retired to forest in company with their husband, if living.

cf. 'वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्'—रघुवंश।

Also.—भर्त्रा तदर्पितकुटुम्बभरेण सार्द्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्।'—शकुन्तला।

तत्रभवत्या—Nom. of अनुज्ञाता। सा भवती इति तत्रभवती—सह्सुपा ; त्रल् has been added in १मा by the rule 'इतराभ्योऽपि दृश्यन्ते'। .तत्रभवती means 'पूज्या'। 'भवेत् तत्रभवान् पूज्ये तथैवात्रभवानपि'।

राजगृहम्—The ancient capital of Magadha, founded by Bimbisara—about 70 miles to the north of Pataliputra (modern Patna). The word here might mean simply 'royal palace' but the *city* of राजगृह has been clearly referred to later on.

आश्रमपदे—आश्रमः एव पदम् (=स्थानम्)—कर्म्मधारयः, तस्मिन्। 'पदं व्यवसित-त्राण-स्थान-लक्ष्माङ्घ्रि-वस्तुषु'—अमरः।

अभिप्रेतः—अभि-प्र-इ (इण्)+क्त—कर्म्मणि।

अस्याः—शेषे षष्ठी। Or, Nom. of वासः। In cannot be the Nom. of अभिप्रेतः,—षष्ठी being barred by the rule 'न लोकाव्ययनिष्ठाखलर्थ-तृनाम्'।

Ch. of Voice.—शृणु एतया...भगिन्या पद्मावत्या...। तया एतया... अनुज्ञातया...राजगृहम्...यास्यते।...वासेन अभिप्रेतेन [भूयते] भवद्भिः।

Sloka 6. (Page 11.)

Sans. Expl.—तीर्थोदकानीत्यादि। [तत् भवन्तः] 'वनात्' आश्रमसमीपवर्त्तिनः अरण्यात् 'तीर्थोदकानि' तीर्थस्य पवित्राणि जलानि, 'समिधः' यज्ञकाष्ठानि, 'कुसुमानि' पुष्पाणि, 'दर्भान्' कुशान् [च] 'स्वैरम्' स्वेच्छया 'तपोधनानाम्' मुनीनाम् [अर्थे] 'उपनयन्तु' संगृह्णन्तु। 'धर्म्मप्रिया' धर्म्मकार्य्ये अनुरागवती 'नृपसुता' राजकुमारी पद्मावती 'तपस्विषु' विषये 'धर्म्मपीड़ां' धर्म्मकर्म्मव्याघातं 'न हि इच्छेत्' नैव अभिलषेत, 'एतत्' धर्म्मपीड़ावर्ज्जनम् इत्यर्थः 'अस्याः' 'कुलव्रतम्' पूर्व्वपुरुषानुक्रमेण आचरितं व्रतम्। का कथा पद्मावत्याः, यस्मिन् कुले सा जाता तत्र न कोऽपि धर्म्मविघातं कृतवान् इत्यर्थः॥ ६॥

Notes.

तीर्थोदकानि—तीर्थस्य उदकानि—६तत्। "योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि। पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद्दर्शनेषु च"—हलायुधः।

स्वैरम्—Adverb, स्वेन (स्वातन्त्र्येण) ईर्त्तं इति स्वैर। स्व—ईर+अच् —कर्त्तरि। स्व+ईर=स्वैरम् (instead of स्वेरम्) by the rele 'स्वाद् ईरेरिणोः वृद्धिर्वक्तव्या'। Thus, स्वैरः, स्वैरिणी। 'मन्द-स्वच्छन्दयोः स्वैरः'—अमरः।

तपोधनानाम्—सं मे ६ष्ठी (in the sense of तादर्थ्य when connected with तीर्थोदकानि, &c.) । Also connected with उपनयन्तु । तपः धनं येषाम्—बहुव्रीहिः तेषाम्। V. R. तपोधनानि which means तपसः 'धनानि' साधनानि इत्यर्थः।

धर्म्मप्रिया—धर्म्मः प्रियः यस्याः साः—बहुव्रीहिः। Optionally प्रियधर्म्मा, प्रिय getting optional पूर्व्वनिपात by the Varttika—'वा प्रियस्य' and अनिच् coming in as समासान्त by the rule 'धर्म्मादनिच् केवलात्'।

नृपसुता—नृपस्य सुता—६तत्। Princeess Padmavati was the sister of king Darsaka ; here नृपसुता means princess.

तपस्विषु—अधिकरणे ७मी। तपस् + विनि—प्राशस्त्ये।

कुलव्रतम्—व्रत here means 'tradition' ; rules of conduct.

Rhetoric.—As the word धर्म्मप्रिया stands as the cause of the sentence 'न हि धर्म्मपीड़ामिच्छेत्', the fig. of speech is पदार्थहेतुकं काव्यलिङ्गम् and the last half being the cause of the first half, the fig. of speech is वाक्यार्थहेतुकं काव्यलिङ्गम्।

Here the dramatic peculiarity is दाक्षिण्य। Def.—'दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्त्तनम्—साहित्यदर्पण।

गुणकीर्त्तन also exists here, 'गुणानां कीर्त्तनं यत्, तदेव गुणकीर्त्तनम्'। As it has direct connection with the बीजार्थ, it is an instance of 'विलोभन'] 'गुणाख्यानं विलोभनम्' ।

Metre.—The metre is वसन्ततिलक। See Sloka 4.

Ch. of Voice.—[भवद्भिः] तीर्थोदकानि समिधः कुसुमानि दर्भा...... उपनीयन्ताम्। धर्म्मप्रियया...नृपसुतया......धर्म्मपीड़ा...इष्यते, एतेन—कुलव्रतेन [भूयते]।

Page 12.

Sans. Expl.—एवम् इत्यादि। 'पुष्पकभद्रादिभिः' 'आदेशिकैः' 'भविष्यद्वक्तृभिः 'आदिष्टा' कथिता इत्यर्थः, स्वामिनः' प्रभोः उदयनस्य 'देवी' राज्ञी 'भविष्यति' इति। ततः,

(Sloka 7.)

प्रद्वेष इत्यादि। 'प्रद्वेषः' विद्वेषभावः 'बहुमानः वा' अथवा प्रकृष्टा भक्तिः 'सङ्कल्पात्' मनसोऽभिप्रायवशात् 'उपजायते' समुद्भवति। सङ्कल्पवशात् एव कस्मिन्नपि द्वेषः कस्मिन्नपि वा भक्तिर्जायते जनस्य इत्यर्थः; 'भर्तृदाराभिलाषित्वात्' प्रभोरुदयनस्य दारत्वेन पत्नीत्वेन पद्मावत्याम् मम अभिलाषकारणात् 'अस्यां मे' 'महती स्वता' प्रचुरः आत्मीय-भावः "विद्यते" ॥ ७ ॥

Notes (P. 12)

मगधराजपुत्री—मगधानां राजा इति मगधराजः। 'राजाहःसखिभ्यष्टच्' इति टच् समासान्तः। मगधराजस्य पुत्री—६तत्। पुत्री = पुत्र + ङीप् by the rule 'शार्ङ्गरवाद्यञो ङीन्'।

पुष्पकभद्रादिभिः—We take Pushpaka-bhadra as one name; otherwise, the form would have been भद्र-पुष्पक by the rule 'अल्पाच्तरम्'।

आदेशिकैः—Nom. of आदिष्टा। आदिशन्ति इति आदेशिनः, आ — दिश् + णिनि—कर्त्तरि। आदेशिन एव आदेशिकाः, आदेशिन् + क — स्वार्थे। आ — दिश् means to predict.

आदिष्टा—Adj. to या। आ — दिश् + क्त— कर्म्मणि।

प्रद्वेषः—प्र—द्विष + घञ्—भावे।

बहुमानः—बहुः मानः—कर्म्मधारयः; high regard.

सङ्कल्पात्—सङ्कल्प here means कामना। अपादान is by the rule 'जनिकर्त्तुः प्रकृतिः'।

भर्तृदाराभिलाषित्वात्—हेतौ ५मी। भर्त्तुः दाराः—६तत्, तेषु अभिलाषी - ७तत्, तस्य भावः इति त्वप्रत्ययः, तस्मात्। The word दार is also masc. and plural. Yaugandharayana intended to have Padm*a*vat*i* as the consort of his king.

अस्याम्—अधिकरणे ७मी।

स्वता—स्वस्य भावः इति स्व + तल्। For the word स्वता (used in a slightly different sense) cf. 'कामी स्वतां पश्यति' Sak. II.

Rhetoric.—The fig. of speech is अर्थान्तरन्यास। The बीजार्थ i. e. ulimate aim of the plot (which is the marriage of Padm*a*vat*i* with Udayana) is expressed here. It is an instance of उद्भेद। 'बीजार्थस्य प्ररोहः स्यादुद्भेदः'।

Metre.—अनुष्टुप्।

Ch. of. Voice.—एतया तया मगधराजपुत्र्या पद्मावत्या···[भूयते], यया...

आदिष्टया...देव्या भविष्यति...। प्रद्योतेन बहुमानेन...उपजन्यते।...महत्या स्वतया [भूयते]।

Page 13. Notes.

राजदारिका—राज्ञः दारिका—ष्तत्। दृ + वुञ्—कर्त्तरि इति दारकः a son. [वु = अक]। दारक + टाप् (= आ) [with इत् (इ) before the क of the प्रत्यय]= दारिका। The rule is 'प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः'।

भगिनिकास्नेह—भगिनी एव भगिनिका, भगिनी + क—स्वार्थे। तस्यां स्नेहः—७तत्।

सपरिवारा—Adj. to पद्मावती। परिवारैः सह वर्त्तमाना—बहुव्रीहिः। परिव्रियते एभिः इति परिवाराः, परि – वृ + घञ्—करणे ; attendants.

स्वागतम्—सु – आ – गम + क्त भावे।

राजदारिकायाः—शेषे ६ष्ठी। कारक-६ष्ठी is prohibited by the rule 'न लोकाव्यय etc.'

Sans. Expl.—'अभिजनानुरूपम्' अभिजनस्य उच्चकुलस्य, अनुरूपम् योग्यम् 'खलु अस्याः 'रूपम्' आकृतिरित्यर्थः। 'तपोवनानि' 'नाम' वाक्यालङ्कारे 'अतिथिजनस्य' अभ्यागतलोकस्य 'स्वगेहम्' आत्मनः गृहम्, तथैव स्वच्छन्दवासयोग्यम् इत्यर्थः। ...'विश्वस्तास्मि' सम्यक् निश्चिन्ताहम्। 'अनेन' त्वदुक्तेन 'बहुमानवचनेन' समादरवाक्येण 'अनुगृहीतास्मि' आश्वासितास्मि इत्यर्थः।

Notes.

अभिजनानुरूपम्—रूपस्य योग्यम् अनुरूपम्—अव्ययीभावः। अभिजनस्य अनुरूपम्—६तत्।

Page 14

अतिथिजनस्य—अतिथिः एव जन—कर्मधारयः, तस्य।

स्वगेहम—स्वस्य गेहम् or स्वं गेहम्—६तत् or कर्मधारयः She means to say that an outsider even has the right of making himself as comfortable in a penance grove as in his own house.

तपोवनानि...स्वगेहम्—The विधेय need not have the same number and gender as those of the उद्देश्य।

विश्वस्तास्मि—Some read विश्वसिमि। We prefer the former on the strength of the expression उत्पादित-विस्रम्भा in page 16.

Rhetoric.—In तपोवनानि नाम etc. there is the dramatic

peculiarity called अथरसङ्घात। 'वर्णमात्रसङ्घातविशेषैरक्षरैर्मितः।'— साहित्यदर्पण।

Sans. Expl.—न हीत्यादि। न केवलं आकृतिः, अस्या वचनमपि मधुरमित्यर्थः।

Page 15.

भद्रे इत्यादि।...'भद्रमुख' भद्रं मुखं यस्य तादृशस्य, शोभनाकृतेः दर्शकस्य इत्यर्थः।...'वरयति' विवाहार्थं प्रार्थयते।

भर्त्रीत्यादि।...'स:' 'दारकस्य कारणात्' पुत्रार्थम्, पुत्रेण सह अस्याः विवाहं दातुमित्यर्थः 'दूतसम्पातं' दूतसंप्रेषणम् इत्यर्थः।

भवत्वित्यादि।...'आत्मीया' भ्रातृपत्नीत्वात् स्वजन इत्यर्थः।

अर्हा खल्वित्यादि। 'अर्हा' योग्या खलु 'इयमाकृतिः' पद्मावत्याः इति बोद्धव्यम् 'अस्य बहुमानस्य' प्रद्योतेन दूतप्रेषणरूपस्य। 'महत्तरे' अतीव समुन्नते...।

Page 15. Notes.

भद्रमुखस्य—भद्रं मुखं यस्य—बहुव्रीहिः।

प्रद्योतः—Name of the father of V*a*savadatt*a* also called महासेन or चण्ड-महासेन। See Intro. (Sec, XII), Page 32.

कारणात्——हेतौ ५मी।

दूतसम्पातम्—सम्—पत+घञ्—भावे=सम्पातः। सम्पातः is to be taken in the sense of प्रेषण। The actual reading seems to have been संवाद, the meaning is—he is carrying on negotiations through messengers. दूतानां सम्पातः—इतत्, तम्।

आत्मीया—आत्मन्+छ। V*a*savadatt*ā* rejoices at the idea that Padm*ā*vat*i* will be her brother's wife. So it is to be inferred that Yaugandhar*a*yana did not disclose to V*a*savadatt*a* his scheme of bringing about the marriage of Padm*a*vat*i* with Udayana.

बहुमानस्य—To be connected with अर्हा। शेषे ६ष्ठी।

उभआवि=उभे। There is no द्विवचन in प्राकृत। *N. B.* In Sanskrit उभय is used in sing. and plural; उभ is always dual.

महत्तरे—Adj. to राजकुले। The affix तर indicates the superiority of these two dynasties to the others. The dynasties meant are those of दर्शक (of Magadha) and of प्रद्योत (of Ujjayin*i*).

Rhetoric.—In भद्रे इयं गावद् etc. we get the अर्थप्रकृति called बिन्दु। Def. 'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्'—साहित्यदर्पण।

Page 16.

Sans. Expl.—आर्येत्यादि काञ्चुकीयं प्रति पद्मावत्या: उक्ति:।...'आत्मानम् अनुग्रहीतुम्' मम दानग्रहणेन मां कृतार्थीकर्तुम् इत्यर्थ:।

यदभिप्रेतमित्यादि। 'यत् अभिप्रेतम्' यत् कर्त्तुमिष्टत् 'भवत्या'।...'अत्रभवती' पूज्या...'अनेन विस्रम्भेण' समादरलाभात् युष्माभि: सह परिचयेन 'उत्पादितविस्रम्भा' जनित-विश्वासा 'धर्मार्थम्' पुण्यलाभाय्था 'अर्थेन' अभिप्रेतार्थदानार्थम् इत्यर्थ: 'उपनिमन्त्रयते' भवत: दान-ग्रहणार्थम् इत्यर्थ: !

Notes

आर्य—Addressed to the Chamberlain.

आत्मानम्—पद्मावत्या: आत्मानम्।

अनुग्रहीतुम्—अनु – ग्रह + तुम्। 'Tó favour her' means 'to accept gifts from her'

अभिप्रेत-प्रदानेन—इतत। हेतौ ३या।

अनेन विस्रम्भेण—Nom. of उत्पादित। 'समौ विस्रम्भ-विश्वासौ'—अमर:। The root here is स्रम्भ (दन्त्य स)। श्रम्भ (with तालव्य श) means प्रमाद (carelessness).

उत्पादितविस्रम्भा—उत् – पद् + णिच् + क—कर्म्मणि = उत्पादित। उत्पादित: विस्रम्भ: यस्या: सा – बहुव्रीहि:।

धर्म्मार्थम्—धर्म्माय इदम्—नित्यसमास:।

अर्थेन – हेतौ ३या। Here अर्थेन means प्रार्थितदानेन—for offering desired objects. 'फलमपीह हेतु:' as in अध्ययनेन वसति।

Remarks.—In 'आर्ये किं इष्ट:' etc. a very charming phase of the character of पद्मावती is revealed. The humble way in which she proceeds to offer gifts to the hermits is worthy of a princess born in a very high family. The same smooth and courteous mode of expression in the speech of the Chamberlain reveals the charm and sweetness of the environments in which she had been brought up. The haughtiness in the conduct of the guards in removing the

people away from the path, should not be taken into account here, as they were mere soldiers (भटs) called on that particular occasion to serve guards and were not permanent attendants.

Sloka 8. (Page 17.)

Sans. Expl.—'कलशेन' जलाधारेन 'कस्य अर्थः' कस्य प्रयोजनम् अस्ति ? 'कः', 'वासः' 'मृगयते' लिप्सते इत्यर्थः ? 'यथानिश्चित' शास्त्रनिर्द्दिशानुसारतः? 'दीक्षां पारितवान्' धर्म्मशिक्षाम् निःशेषितवान् [कः शिष्यः] 'किम् इच्छति' ? 'यत् द्रव्य' 'पुनः' पद्मावतीसमीपात् ग्रहणानन्तरम् इत्यर्थः । 'गुरोः देयं भवेत्' गुरवे दक्षिणास्वरूपेण दातव्य' स्यात् । 'धर्म्माभिरामप्रिया' धर्म्मनिरते जने भक्तिसम्पन्ना 'नृपजा' राजपुत्री 'इह' अस्मिन् आश्रमे 'आत्मानुग्रहम् इच्छति' आत्मनि अनुग्रहम् [दानग्रहणेन तपस्विजनस्य इति शेषः] इच्छति । 'यस्य' 'यत्' वस्तु 'समीप्सितम्' प्राप्तुम् काङ्क्षितम् 'अस्ति' 'तद् वदतु' तद्वस्तु नाम्ना निर्द्दिशतु इत्यर्थः । 'अद्य' 'कस्य' कस्मै जनाय इत्यर्थः 'किं' वस्तु 'दीयताम्' राजपुत्र्या इति शेषः । यो यदिच्छति तस्मा एव तत् सा दास्यति इति घोषणार्थः ॥ ८ ॥

Notes

कलसेन—करणे ३या । It is करण of the verb 'साध्यते' suppressed in the sentence 'कलसेन कस्य अर्थः [साध्यते]' 'गम्यमानापि क्रिया कारक-विभक्तौ प्रयोजिका"—सिद्धान्तकौमुदी । The word is also spelt with श and is also fem. [कलसी or कलशी]

मृगयते—मृग+लट् ते । मृग—to seek is चुरादि, आत्मनेपदी ।

यथानिश्चितम्—क्रियाविशेषणे २या । निर् – चि क्त—कर्म्मणि निश्चित । What has been prescribed or fixed. निश्चितम् अनतिक्रम्य—अव्ययीभावः ।

दीक्षाम्—Obj. of पारितवान् । दीक्षा is a means of acquisition of 'religious knowledge.' "दीयते ज्ञानमत्यन्तं क्षीयते पापसञ्चयः । तेन दीक्षेति सा प्रोक्ता पापक्षेपणक्षमा क्रिया ॥'

पारितवान्—Adj. to जनः understood. पार+क्तवतु । The root पार (अकारान्त) means to complete [a work] and is चुरादि, परस्मैपदी । पारयति, etc.

गुरोः—शेषे ६ष्ठी in the sense of सम्प्रदान, as in रजकस्य वस्त्रं ददाति ।

Page 17.

आत्मानुग्रहणाम्—आत्मनि अनुग्रहः—७तत्, तम् ।

नृपजा—नृप – जन + ड—कर्त्तरि ।

धर्म्माभिरामप्रिया—अभिरमन्ते अत्र इति अभिरामाः, अभि – रम + घञ्—अधिकरणे ; agreeable ; charming. धर्म्मेण अभिरामाः—३तत् ; तेषां प्रिया—६तत् ; or, ते प्रियाः यस्याः सा—बहुव्रीहिः ।

समीप्सितम्—सम्—आप् + सन् + क्त—कर्म्मणि ।

कस्य—सम्प्रदानस्य सम्बन्धविवक्षया ६ष्ठी ।

Rhetoric.—Here धर्म्माभिरामप्रियत्व being the cause of the distribution of gifts the fig. of speech is काव्यलिङ्ग । Dramatic peculiarity (नाट्यालङ्कार) is उल्लेख । 'कार्य्यग्रहणमुल्लेखः'—सा. द. ।

Metre.—शार्द्दूलविक्रीड़ित । See Sl. 13.

Ch. of Voice.—.. अर्थेन (भूयते), केन वासः इष्यते…परितवता किम् इष्यते, येन…ईयेन (भूयेत) ? धर्म्माभिरामप्रियया नृपजया…आत्मानुग्रहः इष्यते । …येन समीप्सितेन भूयते, तत् उच्यताम्…किं ददातु (सा) ।

Sans. Expl.—'हन्त' हर्षे, 'इष्टः उपायः' लब्धा कार्य्यपद्धतिः । 'दिष्ट्या' भाग्येन 'सफलं' सार्थकं मे 'तपोवनाभिगमनम्' मम आश्रमप्रवेशः ।

Notes

हन्त—A particle here implying 'joy'. "हन्त हर्षेऽनुकम्पायां वाक्यारम्भ-विषादयोः"—अमरः ।

उपायः—उप – इ + अच् । The proclamation 'यद् यस्यास्ति समीप्सितं वदतु तत् etc.' reveals to Yaugandharayana the means of placing Vasavadatta in charge of Padmavati.

अर्थी—अर्थः अस्तिस्थितः 'अस्य इति अर्थी, अर्थ + इनि by the rule 'अर्थाच्चासन्निहिते' । (So, अर्थी is to be distinguished from अर्थवान्) Or, अर्थयते इति अर्थ + णिनि—कर्त्तरि । But the former course is to be preferred because of the dictum—'कृद्वृत्तेस्तद्धितवृत्तिर्गरीयसी' ।

दिष्ट्या—अव्यय used as an exclamation of joy.

सफलम्—फलेन सह वर्त्तमानम्—बहुव्रीहिः ।

Page 18.

Sans. Expl.—'सन्तुष्टतपस्विजनम्' सन्तुष्टाः यथालब्ध-फलमूलादिभिः तृप्ताः अतः निर्लोभा इत्यर्थः तपस्विजनाः मुनयः यत्र तादृशम् 'इदम् आश्रमपदम्'। 'आगन्तुकेन' अचिरागतेन 'अनेन भवितव्यम्' [यतः एष लोभो दृश्यते]।

...'स्वसा' भगिनी। 'प्रोषित-भर्तृकाम्' 'प्रोषितः' प्रवासं गतः 'भर्ता' स्वामी यस्याः ताम् 'इमां' भगिनीम् 'इच्छामि' 'अत्रभवत्या' राजपुत्र्या पद्मावत्या 'कञ्चित् कालम्' 'परिपाल्यमानाम्' अवेक्ष्यमाणाम्। 'कुतः',—

Notes

सन्तुष्टतपस्विजनम्—तपस्विनः एव जनाः—कर्मधारयः, सन्तुष्टाः तपस्विजनाः यस्मिन् तत्—बहुव्रीहिः।

आगन्तुकेन—Nom. of भवितव्यम्। आ–गम्+तुन्=आगन्तुः। आगन्तुः एव आगन्तुकः—स्वार्थे क प्रत्यय। The Lady hermit means to say that the hermits of that hermitage are contented with whatever they have there and so they are not disposed to accept gifts. But the greediness expressed by the words 'अहमर्थी' makes her think that the speaker must be a new-comer.

प्रोषितभर्तृकाम्—प्र – वस + क्त – कर्त्तरि = प्रोषितः; living abroad. प्रोषितः भर्ता यस्याः सा—बहुव्रीहिः। कप् as समासान्त is added by the rule 'नद्यृतश्च'।

परिपाल्यमानाम्—परि – पा + णिच् (or, पाल चुरादि) + कर्मणि शानच्।

Remarks—In this play V*a*savadatt*a* is placed in charge of the Princess (under the name of *A*vantik*a*) and is passed off as the sister of Yaug. But a slight difference is noticed in the story of the कथासरित्सागर where she was introduced as Yaug.'s daughter who had been deserted by her husband, and now her father was out in quest of his son-in-law.

N. B. The object of placing V. in charge of P. was tow-fold; (i) acquisition of P. and (ii) P. would bear testimony to the the chastity of V. during her life *incognito*. Cf. शीलसाक्षिणी—K. S. IV. I. 121.

"इयमावन्तिका नाम राजपुत्रि सुता मम।
अस्याश्च भर्ता व्यसनी त्यक्त्वैनां क्वापि निर्गतः॥

तदेतां स्थापयाम्यद्य तव हस्ते यशस्विनि ।
यावत्समानयाम्यस्या भर्त्तारमनुपाधिरात् पतिम् ॥"

Rhetoric.—In इन्म इष्ट उपाय: etc. and इय मे स्वसा etc. we see Yaug. rapidly proceeding towards achievement of his aim. So, of the five भवस्थाs of a कार्य्य, the भवस्था technically called 'प्रयत्न' is present here. 'प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वित: ।' The dramatic pecularity called करण (an अङ्ग of the मुखसन्धि) exists here. '— करणं पुन: । प्रकृतार्थसमारम्भ:—'।—सा. द.। Moreover there is the नाट्यालङ्कार called 'याच्ञा'। 'याच्ञा तु क्वापि याच्ञाया: स्वयं दूतमुखेन वा'—सा. द.। In सन्तुष्टतपस्विजनम् etc. the fig. of speech is (वाक्यार्थगत) काव्यलिङ्ग ।

Page 19. (Sloka 9.)

Sans. Expl.—कार्य्यमित्यादि । 'भर्थै:' धनै: 'न एव' 'न भपि' 'भोगै:' सुखै:, 'न वस्त्रै:' न परिच्छेदै: [मे] 'कार्य्यं' प्रयोजनम् भस्ति इति शेष: । 'वृत्तिहेतो:' जीविकाया: कृते 'भहं' 'काषायं' रक्तवास: 'न प्रपन्न:' न धृतवान् । 'धीरा' विवेकवती 'दृष्टधर्म्मप्रचारा' ज्ञातधर्म्मपद्धति: 'इयं कन्या' एषा राजपुत्री पद्मावती 'मे भगिन्या:' मम स्वसु: 'चारित्रं' सतीत्वम् इत्यर्थ 'रक्षितुम्' भवेक्षितुं 'शक्ता' समर्था भवति । भत: भस्या: समीपे स्वसु: भवस्थानमहम् इच्छामि इत्याशय: ॥ ९ ॥

Notes.

भर्थै: etc.—करणे ३या । See notes on कलत्रेण in Sl. 8.

काषायम—कषायेण रक्तं (वस्त्रम्) इति कषाय + भण् by the rule 'तेन रक्तं रागात्' । कषाय means 'a dye' (original or mixed). So, =dyed (cloth).

वृत्तिहेतो:—वृत्तिरेव हेतु:—कर्म्मधारय:, तस्मात् । Acc. to some (e. g. मल्लिनाथ, पुरुषोत्तम—the author of भाषावृत्ति of Panini), the विभक्ति is ६ष्ठी by the rule 'षष्ठी हेतुप्रयोगे' । Acc. to others, the विभक्ति is हेतौ ५मी, the rule 'षष्ठी हेतुप्रयोगे' being applicable according to them, in cases of non-compounds only.

प्रपन्न:—प्र—पद क्त—कर्त्तरि ।

दृष्टधर्म्मप्रचारा—Adj. to कन्या । धर्म्मस्य प्रचार:—६तत्, दृष्ट: धर्म्मप्रचार: यया सा—बहुव्रीहि: । As she herself is aware of the rules of धर्म्म, she is expected to be a proper guard to the धर्म्म of those placed under her care.

शक्ता—Adj. to कन्या । शक + क्त—कर्त्तरि ।

चारित्रम्—चरित्र + अण्—स्वार्थे ।

Remarks,—The fig. of speech is काव्यलिङ्ग (in the last half of the *Sloka.*).

Metre—वैश्वदेवी । "पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ"—वृत्तरत्नाकर ।

Ch. of Voice.—...कार्येण (भूयते)...मया काषायम्...प्रपन्नम् । धीरया इष्टधर्मप्रचारया अनया कन्यया...शक्यया (भूयते) ।

Sans. Expl.—हमिति तत्त्वार्थावधारणे अव्ययम् ।...'क्रमं न करिष्यति' कुत्रापि विषये अवसरो न भविष्यति इत्यर्थः । भवतीत्यादि । 'महती' गुर्वी 'खलु अस्य' 'व्यपाश्रयणा' प्रार्थना परपत्न्याः चारित्ररक्षारूपं कार्यं नव सुकरम् इत्यर्थः । 'कथं प्रतिजानीमः' कथं स्वीकुर्मः ।

हम्—An interjection implying 'comprehension'. Here *Vasavadatta* comprehended the scheme of Yaug. This speech also indicates that *Vasavadatta* was not aware of the whole scheme of the ministers.

निक्षेप्तुकाम :—निक्षेप्तुं कामः यस्य सः—बहुव्रीहिः । The म् of तुम् is dropped before काम and मनस् by the dictum 'तु' काम-मनसोरपि' ।

क्रमम्—क्रम + घञ्—भावे । " 'क्रमु' पादविक्षेपे" इति धातुः ।

Rhetoric.—The dramatic peculiarity called 'क्षिप्ति' is present in हम् इह । 'रहस्यार्थस्य तूद्भेदः क्षिप्तिः स्यात्'—सा. द. ।

Page 20.

व्यपाश्रयणा—वि – अप – आ—श्रि + युच्—भावे (बाहुलकात्) ।

Sloka 10.

Sans. Expl.—'अर्थः' धनम् 'सुखम्' अक्लेशेन 'दातुं भवेत्' दातुं शक्यः भवेत् इत्यर्थः 'प्राणाः' जीवनं 'तपः' तपस्यार्जितं स्वर्गादिकं फलं 'सुखम्' अक्लेशेनैव दातुं शक्या भवेयुः इति शेषः । 'अन्यत् सर्वं' 'सुखम्' अक्लेशेन 'भवेत्' सम्पद्यते' [किन्तु] 'न्यासस्य रक्षणम्' अपरेण न्यस्तस्य द्रव्यस्य रक्षणम् 'दुःखम्' न सुसाध्यम् । कालेन विषयमात्रस्य परिवर्त्तनम सम्भावितम्, अतः किमपि यथालब्धं प्रतिपादयितुं दुष्करमेव इत्यर्थः ॥ १० ॥

Notes

अर्थः—Nom. of भवेत् । It does not take स्या as the obj. of दातुम्, as it is principally connected with भवेत् । The dictum is 'प्रधानशक्त्यभिधाने गौणशक्तिः अभिहितवद् भवति' ।

सुखम्—क्रियाविशेषणे २या। सुख + अच (अर्श-आदित्वात्)। Then adv. modifying दातुम्।

अर्थ...सुखं भवेत्—The most natural prose-order will be—अर्थः दातुं सुखं भवेत् (instead of अर्थः सुखं दातुं भवेत्) for this will be in keeping with the structure in न्यासस्य रक्षणं दुःखम्। The difficulty will be in respect of the neuter gender in सुखम् while अर्थ is masculine. Some would propose to take it as शक्यम्...आलिङ्गितुं पवनः (Sakuntala) on which Vamana remarks—'शक्यम् इति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात्'।

न्यासस्य—कर्मणि ६ष्ठी। Obj. of रक्षणम्। नि – अस् + घञ्—कर्मणि।

दुःखम्—Adj. to रक्षणम्। दुःख + अर्श आदिभ्योऽच्।

Rhetoric—There being the same धर्म of the अप्रस्तुत elements अर्थ, प्राण and तपः, the fig. of speech is तुल्ययोगिता। 'पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्। एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता'॥ —सा. द।

Metre.—अनुष्टुप्।

Ch. of. Voice.—अर्थेन...भूयेत, प्राणैः...तपसा...[भूयेत], अन्येन सर्वेण ...भूयते...रक्षणेन दुःखेन [भूयेत]।

Pages 20—22

Sans. Expl.—.. 'उद्घोष्य' उच्चैः प्रख्याप्य...'अयुक्तम्' अकर्तव्यम् इत्यर्थः 'इदानीं विचारयितुम्' स्वीकरोमि न वा इति चिन्तयितुम्।...'अनुतिष्ठतु' करोतु...

...'सत्यवादिनी' कार्यतः वाक्यस्य अनुष्ठात्री। भवति तथ्यवादि।

('उपगम्य' यौगन्धरायणम् उपसृत्य)। 'भोः' हे साधो, 'अभ्युपगतम्' स्वीकृतं 'अत्रभवतः भगिन्याः' 'परिपालनम्' रक्षणम् 'अत्रभवत्या' पूज्यया राजपुत्र्या।

...'वत्से' इति वासवदत्तां प्रति उक्तिः। 'उपसर्प' समीपवर्तिनी भव...।

'का गतिः' यौगन्धरायणस्य आदेशपालनात् ऋते नास्ति अन्यः कोऽपि उपायः। 'मन्दभागा' जीवत्यपि तादृशी स्वामिनि, स्वेच्छया दुःखं हतवती इति भाग्यहीना।

Notes.

प्रतिजानीमः—Should have been प्रतिजानीमहे।—'संप्रतिभ्याम् अनाध्याने'।

उद्घोष्य—उत्-घुष (चुरादि) + ल्यप्।

अनुरूपम्—रूपस्य योग्यम्—अव्ययीभावः।

सत्यवादिनी—सत्य + वद् + णिनि—कर्तरि।

अभ्युपगतम् – अभि – उप—गम + क्त—कर्मणि । Obj.—परिपालनम् । अभ्युपगम means स्वीकार ।

मन्दभागा—मन्दः भागाः यस्याः सा—बहुव्रीहिः । Here भाग means भाग्य ।

Rhetoric.—In प्रथमम् उद्घोष्य etc. there is the Dramatic Peculiarity 'युक्ति' । 'सम्प्रधारणमर्थानां युक्तिः' । —सा. ६द. । (अर्थानां सम्प्रधारणम् means कार्यव्यनिर्णयः) In चिरं जीवतु, there is the नाट्यालङ्कार 'आशीः' । 'आशीरिष्टजनाशंसा'—सा. द. ।

Remarks.—का गतिः etc.—This speech of *Vasavadatta* fully reveals the agony of her heart. The whole scheme of Yaug. has not been disclosed to her. She knows so far only that she will have to live apart for a certain period from her beloved husband, and this much only is too severe for her, though she undertakes to do it for the recovery of the lost kingdom of her husband. And now to live "*incognito*" as a ward under the care of another seems all the more troublesome. This is why she calls herself मन्दभागा ।

Pages 22—23.

Sans. Expl.—...'आत्मीया' स्वीव स्वजन इत्यर्थः ।

...'आकृतिः' देहसौन्दर्यम्...'तर्कयामि' मन्ये इत्यर्थः ।

'सुष्ठु सम्यक् 'आर्य्या' तापसी 'भणति' कथयति । 'अहमपि', 'अनुभूतसुखा इति एषा [वासवदत्ता] प्राक् लब्धसुखा इति 'पश्यामि' मन्ये इत्यर्थः ।

हन्त भोः इत्यादि । 'हन्त भोः' [कार्य्यसिद्धिलाभात्] हर्षे अव्ययम् 'अर्द्धम्' 'अवासितं' समापितं 'भारस्य' कार्य्यवस्तुनः । 'यथा मन्त्रिभिः सह' 'समर्थितम्' चिन्तितं 'तथा परिणमति' कार्य्यफलं तदनुरूपं भवति इत्यर्थः । 'ततः', 'प्रतिष्ठिते स्वामिनि' स्वराज्ये सम्यक् लब्धपदे राजनि उदयने, 'तत्रभवतीं' 'राज्ञीं' वासवदत्ताम् 'उपनयतः' राज्ञः समीपम् उपस्थापयतः 'मे' मम 'इह' अस्मिन् विषये, 'वासवदत्तायाः चारित्रविषये अत्रभवती मगधराजपुत्री' पद्मावती 'विश्वासस्थानं' प्रमाणं 'भविष्यति' राज्ञः प्रत्ययजनने सहायः भाविष्यति इत्यर्थः । कुतः—

Notes.

आत्मीया इदानीम् etc.—Here पद्मावती utters the same words uttered by *Vasavadatta* when she heard that her father

had been trying to have Padmavati as his son's wife. In fact, at the very first sight they fell in love with each other and the same train of thoughts was passing in their mind. These words were evidently spoken स्वगत ।

अनुभूतसुखा—Adj. to एषा [वासवदत्ता] understood. अनुभूतं 'सुखं' यया सा—बहुव्रीहिः ।

हन्त भोः—Interjection implying delight caused by the relief got after the completion of his task. This speech also is स्वगत ।

अवसितम्—अव-सो+क्त—कर्मणि । " 'सो' अन्तकर्मणि" इति धातुः । स्यति, ससौ, लुङ् असात् and असासीत् ।

समर्थितम्—सम्-अर्थ+क्त—कर्मणि ।

परिणमति—परि-नम+लट् ति । The course of action turns out just as has been planned by the ministers. The plan was that Yaugandharayana should come out with queen Vasava datta in disguise from Lavanaka, when the king would be out a-hunting. The ministers should set fire to the queen and spread the rumour that the queen and Yaug were burnt to ashes. Yaug. should place the queen in charge of Padmavati. The king of Magadha would be persuaded to marry Padmavati to Udayana. The marriage would effect the recovery of the lost kingdom of Udayana Then Yaug. would return Vasavadatta to Udayana when Padmavati herself would be able to testify to the chastity of queen Vasavadatta during the time of her separation from the king.

स्वामिनि—भावे ७मी ।

विश्वासस्थानम्—विधेय to the उद्देश्य-word 'मगधराजपुत्री' । विश्वासस्य स्थानम्—६तत् । Object of confidence. i. e. the person whom the king must believe.

• Rhetoric.—In या ईदृशी etc, there is the Dramatic peculiarity अनुमान । 'लिङ्गादूहोऽनुमानता'—सा॰ द॰ । In ततः प्रतिष्ठिते etc.

there is the नाट्यालङ्कार called 'युक्ति'। 'युक्तिरर्थावधारणम्' i. e. to determine a future course of action.

Sloka 11.

Sans. Expl.—'यैः' पुष्पकभद्रादिभिः आदेशिकैः 'प्रथमं प्राक्' 'विपत्तिः' राज्ञः उदयनस्य राज्यभ्रंशादिव्यसनम् 'प्रदिष्टा' कथिता, ज्योतिर्विद्यादिषु ज्ञानबलेन इति बोद्धव्यम्; 'अथ' परतः [तैः एव] 'पद्मावती' 'नरपतेः' 'भवित्री महिषी' भाविनी राज्ञी 'दृष्टा' उक्ता इत्यर्थः। 'तत्प्रत्ययात्' तेषु सिद्धादेशे विश्वासात् 'इदं कृतम्' पद्मावतीसमीपे वासवदत्ताया: अवस्थापनरूपं कर्म्म विहितं, मयेति शेषः। 'हि' यतः 'सुपरीक्षितानि' सुष्ठु आलोचितानि 'सिद्धवाक्यानि' भविष्यद्द्रष्टॄणाम् आदेशान् 'उत्क्रम्य' अप्रमाणीकृत्य 'विधिः' नियतिः 'न गच्छति'। आदेशिकाः शास्त्रचक्षुषा यद्यथा पश्यन्ति, तत्तथैव अविकृतं घटते इत्यर्थः ॥ ११ ॥

Notes.

यैः—Nom. of प्रदिष्टा। It refers to पुष्पक-भद्रक and others mentioned by Yaug when he first saw Padmavati.

महिषी—Here used in the sense of 'a queen'. But the word means 'the principal queen with whom the king passes through the अभिषेक-ceremony'; 'कृताभिषेका महिषी'—अमरः

भवित्री—भू+तृन्+ङीप्।

प्रदिष्टा—प्र-दिश+क्त—कर्म्मणि।

तत्प्रत्ययात्—हेतौ ५मी। तेषु प्रत्ययः—७तत्, तस्मात्। Here तद् refers to the seers or to their predictions.

सिद्धवाक्यानि—Obj. of उत्क्रम्य। सिद्धानां वाक्यानि-६तत्।

सुपरीक्षितानि-सु-परि-ईक्ष+क्त—कर्म्मणि।

उत्क्रम्य—उत्-क्रम+ल्यप्।

विधिः—वि-धा+कि। 'विधि विधाने दैवे च'—अमरः।

Rhetoric.—Here the fig. of speech is (कारणेन कार्य्यसमर्थनरूपः) अर्थान्तरन्यासः।

Metre.—वसन्ततिलक। (See Sl. 4).

Ch. of. voice.—ये...विपत्ति प्रदिष्टवन्तः...[ते] पद्मावतीम्....भविवीं महिषीं द्दष्टवन्तः ।...इदं कृतवान् [अहम्] ।...विधिना...गम्यते ।

Page 24.

Sans. Expl.—'स्थित: मध्याह्नः' विप्रहरसमयः समागतः इत्यर्थः । 'दृढम्' अत्यन्तं 'परिश्रान्तः' क्लान्तः—'विश्रमयिष्ये' विगतश्रमो भविष्यामि ।...'अभितः' चतुर्दिक्षु... ।

Notes

ब्रह्मचारी—ब्रह्म (=वेदाध्ययनं) चरति इति ब्रह्म – चर+णिनि—कर्त्तरि । The word means 'one in the first order of life.'

मध्याह्नः—मध्यम् अह्नः इति मध्याह्नः—एकदेशि-तत् । अहन् is changed into अह्न by the rule 'अह्नोऽह्न एतेभ्यः' 'रावाह्नाहाः पुंसि' इति पुंस्त्वम् ।

दृढम् = अत्यन्तम् । 'अतिवेल-भृशात्यर्थातिमात्रोद्गाढ़-निर्भरम् । तीव्रैकान्त-नितान्तानि गाढ़-वाढ़ दृढ़ानि च' ॥—अमरः ।

परिश्रान्तः—परि – श्रम + क्त—कर्त्तरि ।

विश्रमयिष्ये—वि – श्रम + णिच् (स्वार्थे) + लृट् ए । श्रम is दिवादि, परस्मैपदी ॥ श्राम्यति, शश्राम, श्रमिष्यति, अश्रमत् । In णिच् the form is, विश्रमयिष्ये instead of विश्रामयिष्ये by the rule 'मितां ह्रस्वः' । विश्रामयिष्ये also is available according to some through the अनुवृत्ति of वा from the rule 'वा चित्तविरागे' । See Mallinatha on Raghu I. 54.

N. B.—The आत्मनेपद is open to objection as the rule 'अणावकर्मकाच्चित्तवत्कर्तृकात्' prescribes exclusive परस्मैपद in the case of those अणिजन्त roots which in their णिजन्त forms are intransitive and have animate beings for their subjects.

तपोवनेन—अनुक्त-कर्त्तृ (भाववाच्ये) ।

Rhetoric—With the entrance of the ब्रह्मचारी we get the simultaneous appearance of persons of different castes and orders on the stage. Hence, there is the dramatic peculiarity called 'वर्णसंहार' in the sense in which अभिनवगुप्त takes it—'चातुर्वर्ण्योपगमनं वर्ण-संहार उच्यते' ।

Sloka 12.

Sans. Expl.—'विश्वासगतप्रत्ययाः' शान्तिपूर्णस्थान-माहात्म्यात् जातविश्वासाः 'अचकिताः' अक्षुब्धाः 'हरिणाः', 'विस्रब्धं चरति' स्वाच्छन्द्येन भ्रमन्ति । 'सर्व्वे'

दयारचिताः' सकरुणं लालिताः 'इद्धाः' 'पुष्पफलैः' पुष्पाणां फलानाञ्च प्राचुर्य्यात् इत्यर्थः 'सम्भ्रमविभवाः' सौन्दर्य्यादिसम्पत्पूर्णाः, भवन्ति इति शेषः। 'कपिलानि' पिङ्गलवर्णानि 'गोकुलधनानि' गवां 'कुलानि' समूहाः एव धनानि 'भूयिष्ठं' प्राचुर्य्येण, विद्यन्ते इति शेषः। 'दिशः' तपोवनमभितः सर्व्वे स्थलभागाः 'अक्षेत्रवत्यः' हलकृष्टभूमिरहिताः। 'निःसन्दिग्धम्' असंशयम् 'इदं तपोवनम्'। 'हि' यतः अयं धूमः' 'बह्वाश्रयः' बहवः आश्रयाः स्थानानि यस्य सः, बहुभ्यः स्थानेभ्यः उद्गत इत्यर्थः॥ १२॥

Notes

विस्रब्धम् Adverb, modifying चरन्ति। वि – स्रम्भ + क्त – भावे।

अचकिताः—न चकिताः - नञ्तत्। चक्+कर्म्मणि क्त। चक्—प्रतिघाते—भ्वादिः, आत्मनेपदी। चकते, चेके, अचकिष्ट।

देशागतप्रत्ययाः—प्रति – इ + अच्—भावे = प्रत्ययः। आगतः प्रत्ययः येषां ते—बहुव्रीहिः, देशात् आगत-प्रत्ययाः—५तत्। Or, देशात् आगतः—५तत्, देशागतः प्रत्ययः येषां ते—बहुव्रीहिः। Some read देशागतप्रत्ययात्।

पुष्पफलैः—पुष्पाणि च फलानि च—द्वन्द्वः, तैः। हेतौ ३या। In such cases we generally get समाहार and एकवद्भाव by the rule 'जातिरप्राणिनाम्', cf. पुष्पफलेन in Bhatti. II. When, however the genus (जाति is not emphasised there is no समाहार, and एकवद्भाव does not take place; cf. 'रञ्जिता नु विविधास्तरुशैलाः'—भारविः।

सम्भ्रमविभवाः—सम्भ्रमः विभवः येषां ते -बहुव्रीहिः। Alt. reading :—सम्भ्रमविटपाः॥ The branches of which are rich (in fruits and flowers).

दयारचिताः—दयया रचिताः—३तत्। For the sense, cf. 'नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्'—*Sak*.

भूयिष्ठम्—Adverb. बहु + इष्ठ।

कपिलानि—कपिल means 'tawny'; 'कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ'—अमरः। Tawny cows are highly praised by the ancient authors of our country; the word कपिला neans 'a tawny cow' and is generally used in the sense of a cow giving a profuse quantity of milk. cf. 'सांख्यमिव कपिलाधिष्ठितम् (आश्रमम् अपश्यम्)'—कादम्बरी।

गोकुलधनानि—गवां कुलानि—६तत्, तानि एव धनानि—कर्म्मधारयः।

अक्षेत्रवत्यः—क्षेत्र + मतुप् + ङीप् = क्षेत्रवती। न क्षेत्रवत्यः—नञ्तत्।

Here क्षेत्र is used in the sense of cultivated land. The sages

live on wild paddy (नीवार) and have no necessity of cultivating land.

निःसन्दिग्धम्—Adv. सम् - दिह + क्त - भावे = सन्दिग्धम् (= सन्देहः), नास्ति सन्दिग्धं यथा स्यात् तथा—बहुव्रीहिः ।

बह्वाश्रयः—बहवः आश्रयाः यस्य सः—बहुव्रीहिः ।

Rhetoric.—The fig. of speech is स्वभावोक्ति ।

Metre.—शार्दूलविक्रीड़ित । See Sl. 3.

Ch. of voice.—देशागतप्रत्ययैः अचकितैः हरिणैः…चर्य्यते । सर्व्वैः दयारक्षितैः द्रुमैः…सम्पन्नविभवैः [भूयते] । कपिलैः गोकुलधनैः…[हृयते] । दिग्भिः अविवर्तीभिः [भूयते]…अनेन तपोवनेन [भूयते]…अनेन धूमेन बह्वाश्रयेण [भूयते) ।

Pages 25—26.

Sans. **Expl.**—यावत् प्रविशामीत्यादि ।…'आश्रमविरुद्धः' आश्रमवासिभ्यः पृथग्भावापन्नः इत्यर्थः 'एव जनः' काञ्चुकीयः ।…निर्दोषम् प्रत्यवायशून्यम् 'उपसर्पणम्' आश्रमान्तःप्रवेशः इत्यर्थः । 'अये' विस्मये 'स्त्रीजनः' नारी, अपि अत्र विद्यते इति शेषः । स्वैरम् इत्यादि । 'स्वैरं स्वैरम्' स्वेच्छया एव… । 'सर्व्वजनसाधारणम्' धनि-निर्धनादि-सर्व्वविधजनैः अविशेषेण सेव्यम् 'आश्रमपदं नाम' आश्रमस्थलं भवत्येव ।

'हम्' उपलब्धिसूचकम् अव्ययम् ।

'अस्मौ' विस्मये 'परपुरुषदर्शनम्' पति-व्यतिरिक्तपुरुषदर्शनम् 'परिहरति' त्यजति 'आर्य्या' इयं भद्रा । 'भवतु' 'सुपरिपालनीयः' अनायासेन रक्षणीयः, 'खलु' एवार्थे 'मन्न्यासः' मत्समीपे न्यस्तं वासवदत्तारूपम् वस्तु ।—निसर्गत एव अ-सुरक्षाः कामिन्यः विशेषतो रूपयौवनलावण्य-स्पृहणीयाकृतय ईदृश्यो ललनाकुल-ललामाया माना: प्रमदा । तथापि यत इयं स्वयमेव परपुरुषदर्शनं परिहरति अतः अस्याः रक्षणे मम न कोऽपि महान् आयासो भवेदिति भावः ।

Notes

अये—An interjection implying surprise. The student is astonished to see the Chamberlain, so richly dressed, in the hermitage.

आश्रमविरुद्धः—आश्रमस्य विरुद्धः—इतत् । The rich style of the Chamberlain appeared inconsistent here.

नाम—अभ्युपगमे । The sense is that it is admitted on all hands. 'नाम प्राकाश्य-सम्भाव्य-क्रोधोपगम-कुत्सने' इत्यमरः ।

निर्दोषम् – निः (=नास्ति) दोषः यस्मिन् तत्—बहुव्रीहिः ।

उपसर्पणम्—उप – सृप् + ल्युट्—भावे ।

स्त्रीजनः—स्त्री एव जनः—कर्मधारयः। The ब्रह्मचारी intends to avoic the sight of women. "(वर्जयेत्) स्त्रीणाञ्च प्रेक्षणालम्भ-मुपघातं परस्य च ।"—मनु।

N. B. In the older language स्त्री (like 'wife' in English and Weid in German) meant woman in general ; cf. 'न स्त्री स्वातन्त्र्यमर्हति' । When, however, the word came to signify the woman *par excellence* for the speaker, that is, the wife some other word was required to express the general sense and the word जन or लोक came to be tagged on to स्त्री for the purpose. Exactly the same was the development in English ; cf. 'woman' which stands for 'wife man.'

स्वैरम्—Adverb. स्वेन (स्वातन्त्र्येण) ईर्त्ते इति स्व – ईर + अच्—कर्त्तरि । स्व + ईर = स्वैरम् (intead of स्वेरम् by the rule 'स्वाद् ईरेरिणोर्वृद्धिर्वक्तव्या' । 'मन्दस्वच्छन्दयोः स्वैरः'– अमरः । वीप्सायां द्विरुक्तिः ; cf. 'मन्दं मन्दं नुदति पवनः' (Meghaduta). The normal form should have been स्वैरस्वैरम् by the rule प्रकारे गुणवचनस्य' ।

सर्व्वजनसाधारणम्—सर्व्वे जनाः—कर्मधारयः, तेषां साधारणम्—इतत् ।

हम्—An exclamation expressive of 'agitation.'

परपुरुषदर्शनम्—परः पुरुषः—कर्म्मधारय तस्य दर्शनम्—इतत् ।

मन्न्यासः...मम or मयि न्यासः—इतत् or ७तत् ।

Rhetoric.—The ब्रह्मचारी is introduced in order to explain to the audience the circumstance under which Vasavadatta and Yaug. have come to the hermitage and also to indicate the condition of king Udayana. Having no direct connection with any other part of the plot the part of the ब्रह्मचारी is to be regarded as a प्रकरी । 'प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता—साहित्यदर्पण ।

Remarks.—We should be now careful to notice the importance of the part played by the ब्रह्मचारी in the development of the plot. It reveals the depth of Udayana's love for Vasavadatta and spreads a charm in the heart of Padmavati for which she will be eager to marry Udayana

Pages—27-28

Sans. Expl.—...'पूर्व्वं प्रविष्टाः' भवदागमनात् प्राक् आगताः अतः अस्मत्‌भवतः आतिथ्यग्रहणं युज्यते इति भावः।...'अतिथिसत्कारः' अभ्यागतस्य पूजा।

...'निवृत्तपरिश्रमः' अपगतखेदः।

...'क्व अधिष्ठानम् आर्य्यस्य' कुत्र भवान् निवसति ?...

'राजगृहतः अस्मि' राजगृहात् आगच्छामि। 'श्रुतिविशेषणार्थम्' वेदविषये प्रकर्ष-लाभार्थम् 'उषितवान् अस्मि' अहम् अवसम्।

...'लावाणक-सङ्कीर्त्तनेन' लावाणकग्रामस्य नामग्रहणेन 'पुनः नवीकृतः इव' भूयोऽपि नूतनभावेन आपतितः इव 'मे सन्तापः' मम दुःखम्।

Notes.

प्रविष्टाः—प्र – विश् + क्त—कर्त्तरि। The chamberlain entered there before the student, so he has a right to offer hospitality.

अतिथिसत्कारः—अतिथेः सत्कारः—६तत्।

निवृत्तपरिश्रमः—निवृत्तः परिश्रमः यस्य सः—बहुव्रीहिः।

क्व—किम् + अत् in the sense of ७मी। पक्षे त्रल—कुत्र। Rule—'किम् अत् (वा)'। Though the root अधि + स्था governs the accusative, substantives derived from it are construed with the locative (अधिकरण) and not with the genitive; cf अत्राधिष्ठानं कुरु।

अधिष्ठानम्—अधिष्ठीयते एतत् (i. e. स्थीयते अत्र) इति अधि—स्था + ल्युट्—कर्म्मणि।

राजगृहतः—अपादाने ५मी। राजगृह (modern Rajgir in the disrict of Gaya) was the ancient capital of Magadha. See notes on the speech of काञ्चुकीय ending in Sloka 6.

श्रुतिविशेषणार्थम्—श्रुतेः विशेषणम् (= a special study)—६तत् तस्मै इदम्—नित्यसमासः।

वत्सभूमौ—वत्सानां भूमिः—६तत्, तस्याम्। वत्स—is the name of a province. Its capital was कौशाम्बी (modern Kosam) situated near modern Allahabad.

"अस्ति वत्स इति ख्यातो देशः......। कौशाम्बी नाम तत्रास्ति मध्यभागे महापुरी॥"—कथासरित्सागर।

लावाणक—*Lavanaka* was a district belonging to the kings of the Vatsas. It was situated near Magadhe (mod. Behar).

No particular place, which can be identified with Lavanaka, can be traced now.

उषितवान्—वस + क्तवतु कर्त्तरि by the rule 'गत्यर्थाकर्म्मक . श्लिष वस-जन-रुह् जीर्य्यतिभ्यश्च'।

हा लावाणकम् etc.—This was evidently spoken स्वगत।

लावाणकसङ्कीर्त्तनेन—हेतौ ३या, or Nom. of नवीकृतः। लावाणकस्य सङ्कीर्त्तनम्—६तत्, तेन। सम्...कृत् + ल्युट् + भावे—सङ्कीर्त्तनम्।

नवीकृतः—अनवः नवः कृतः इति नव + च्वि—कृ + क्त – कर्म्मणि।

अथ—Here used in the sense of प्रश्न। 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ'—अमर।

Rhetoric.—राजगृहतोऽस्मि etc. and the following speeches of the ब्रह्मचारी are meant for indicating the events that had already taken place, and as such, are illustrations of the dramatic peculiarity called निरुक्ति। 'पूर्व्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्तितम्—सा. द.।

Pages 28—29

Sans Expl. 'यदि' 'अनवसिता' न निःशेषिता 'विद्या'...। 'अतिदारुणम्' अत्यन्तं कठोरम् 'व्यसनं' विपत् संवृत्तम् घटितम्।

...दृढ़म् अभिप्रेता' अतीव प्रिया, 'किल' ऐतिह्ये।

...मृगयानिष्क्रान्ते' आखेटकार्थं बहिर्गते, 'राजनि', ग्रामदाहेन' लावाणकग्रामस्य दाहेन, 'दग्धा' वासवदत्ता इति शेषः।

Notes.

अनवसिता—न अवसिता – नञ्तत्। अव – सो + क्त – कर्म्मणि। 'सो अन्तकर्म्मणि' इति धातुः।

अतिदारुणम्—अति दारुणम्—सहसुपा।

व्यसनम्—वि – अस + ल्युट्—कर्त्तरि or करणे। 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे'—अमर।

अभिप्रेता—अभि – प्र – इ (ण्) + क्त—कर्म्मणि।

मृगयानिष्क्रान्ते—मृगयार्थं निष्क्रान्तः—सहसुपा, तस्मिन्। *N. B.*—We do not call it a ४र्थीतत् as the sense of प्रकृति-विकृतिभाव is not present here.

राजनि—भावे ७मी।

Remarks.—तस्मिन् etc.—Here we should observe how

quickly a rumour spreads and how truth and falsehood remain inextricably mixed together in it. The spectators of the dramatic performance can see Vasavadatta before them and enjoy the fun, when they hear that she has been burnt to death.

Pages 30 – 31

Sans Expl.—'अलीकम्' मिथ्या 'एतत्' वासवदत्तायाः मरणम् इत्यर्थः ।... 'मन्दभागा' भाग्यहीना तादृशपतिविरहादिति बोद्धव्यम् ।

...'ताम् अभ्यवपत्तुकामः' वासवदत्तां रक्षितुम् इच्छन्...'सचिवः' मन्त्री 'तस्मिन् एव अग्नौ' यत्र वासवदत्ता दग्धा तत्रैव 'पतितः' ।

'मन्त्री पतितः इति' तत्र प्रश्न आत्मप्रच्छादनार्थं म सन्देहप्रकाशः बोद्धव्यः ।

...'प्रतिनिवृत्तः' मृगयातः प्रत्यागतः...तद्‌वृत्तान्त' महिष्याः सचिवस्य च मृताम् 'तयोः वियोगजनितसन्तापः' तयोः विरहेण उत्पादितः शोकः यस्य तादृशः...'अमात्यैः' रुमण्वत्प्रभृतिभिः सचिवैः 'महता यत्नेन' प्रयासातिशयेन 'वारितः' मरणाध्यवसायात् रक्षितः इत्यर्थः ।

...'आर्य्यपुत्रस्य' स्वामिनः 'मयि सानुक्रोशत्वम्' मयि अनुकम्पाम् ।

Notes

अलीकम्—'अलीकं त्वप्रियेऽनृते'—अमरः ।

मन्दभागा—मन्दः भागः (भाग्यम्) यस्याः सा—बहुव्रीहिः ।

अभ्यवपत्तुकामः—अभि—अव-पद्+तुम् अभ्यवपत्तुम्—to help her out i. e. to rescue her. अभ्यवपत्तुं कामः यस्याःसा—बहुव्रीहिः ! The म् of तुम् is dropped by the dictum 'तु' काममनसोरपि । अभ्यवपत्ति means 'succour'. 'व्यसन-साहाय्यम् अभ्यवपत्तिः इति कौटिल्यः । We think अभ्यवपत्ति is the same as अभ्युपपत्ति of later Sanskrit. अभ्युपपत्तिरनुग्रहः'—इत्यमरः ।

तद्‌वृत्तान्तम्—सः वृत्तान्तः—कर्म्मधारयः, तम् ।

वियोगजनितसन्तापः—Adj. to राजा । जन्+णिच्+क्त—कर्म्मणि जनित । वियोगेन जनितः—३तत्, तादृशः सन्तापः यस्य सः—बहुव्रीहिः । This is an instance of 'सापेक्षत्वेऽपि गमकत्वात् समासः' तयोः being dependent upon वियोग ।

प्राणान्—Always plural. (When singular, it means the प्राणवायु—one of the 5 vital winds).

परित्यक्तकामः—परित्यक्तः कामः यस्य सः बहुव्रीहिः। See notes on अभ्यवपन्नकामः।

अमात्यैः—अमा is an अव्यय meaning सह। अमा+त्यप् by the rule 'अव्ययात्त्यप्'।

यत्नेन—करणे ३या।

सानुक्रोशत्वम्—अनु—क्रुश+घञ्—भावे अनुक्रोशः; compassion. अनुक्रोशेन सह वर्तमानः सानुक्रोशः—बहुव्रीहिः। तस्य भावः इति त्व-प्रत्ययः।

Remarks.—अलीकम् etc. and जानामि etc.—These two speeches of V*a*savadatt*a* are स्वगत। सत्यं पतित इति—This speech serves as a screen for the external manifestations of his internal agitation, which is natural under the circumstances. ततः प्रतिनिवृत्त etc.—The sense of this sentence is that the king loves his wife more than his life. So, this speech has its effect on the heart of Padm*a*vat*i*, which will be naturally attracted by the merits of Udayana which are very rare in other people.

Pages 31—32

Sans. Expl.—ततस्तस्याः इत्यादि। 'तस्याः' वासवदत्तायाः, 'शरीरोपभुक्तानि' देहे धृतानि अतः 'कृतोपभोगानि 'दग्धशेषाणि' दाहावशिष्टानि 'आभरणानि' अलङ्कारान् 'परिष्वज्य' आलिङ्ग्य, वक्षसि निधाय इत्यर्थः 'राजा मोहम् उपगतः' उदयनः विगतसंज्ञः अभवत्। प्रियाङ्गसंस्पृष्टानाम् अलङ्काराणां सन्दर्शनेन संस्पर्शनेन च अतिभूमिम् आरूढोऽस्य विरहसन्ताप इति भावः।

...'सकामः' पूर्णमनोरथः 'इदानीम्' इत्यादि वासवदत्तायाः खेदोक्तिः।...... 'भर्तृदारिके' पद्मावतीं सम्बोध्य आह इति बोद्धव्यम्...'इयम् आर्या' वासवदत्ता।

'सानुक्रोशया' अनुकम्पाशीलया...

'अथ किम्' यथा भवती आह तथैव इत्यर्थः। 'प्रकृत्या' स्वभावेन 'सानुक्रोशा' कोमलहृदया 'मे भगिनी'...।

Notes

शरीरोपभुक्तानि—शरीरेण उपभुक्तानि—३तत्। उप—भुज+क्त कर्मणि।

दग्धशेषाणि—दह+क्त—कर्मणि दग्ध। दग्धानि (आभरणानि) means 'the ornaments' that were burnt. दग्धेभ्यः शेषाणि—५तत्।

परिष्वज्य - परि—स्वञ्ज्+ल्यप्।

सकामः—कामेन सह वर्तमानः—बहुव्रीहिः।

सानुक्रोशया—अनु—क्रुश्+घञ्, अनुक्रोशः ; pity ; compassion. अनुक्रोशेन सह वर्तमाना...बहुव्रीहिः तया ।

प्रकृत्या—इया by the rule प्रकृत्यादिभ्य उपसंख्यानम्' ।

Remarks— सकाम इदानीम् etc. In this short speech, the conflict of emotions in the heart of V*a*savadatt*a* is revealed She cannot bear a moment's separation from her husband, yet she is ready to undergo any trouble for her husband's good. She has much faith in the lolyalty and integrity of the minister ; so she consented to come out of L*a*v*a*naka. She does not know the consequence of her actions. As a measure of relief, she keeps no responsibility on herself but depends on Yaug. at every step. Now she is quite helpless and cannot understand whether he has done right or wrong.

प्रकृत्या—सानुक्रोश—The minister says this so that none may recognise the lady as V*a*savadatt*a*.

Sans. Expl.—'ततः' 'शनैः शनैः' क्रमशः 'प्रतिलब्धसंज्ञः' प्राप्तचैतन्यः 'संवृत्तः' जातः ।

'दिष्ट्या' भाग्येन 'ध्रियते' जीवतीत्यर्थः' मोहं 'गतः' मूर्च्छाम् आपन्नः शून्यमिव मे हृदयम्' न राज्यपूर्वम् इव मे मनः, अभूदिति शेषः ।

...'महीतलपरिसर्पणपांसुपाटलशरीरः' भूतले विचेष्टनात् धूलिरञ्जितदेहः 'सहसा उत्थाय'...'किमपि किमपि' नानाविधम्... ।

Notes.

शनैः:—Adverb.

प्रतिलब्धसंज्ञः—प्रतिलब्धा संज्ञा येन सः—बहुव्रीहिः ।

ध्रियते—धृ (to live)+लट् ते । This धृ (meaning अवस्थान) is तुदादि, आत्मनेपदी ।

महीतलपरिसर्पण etc.—मह्याः तलम्—६तत्, तस्मिन परिसर्पणम्—७तत् ; पांसुभिः पाटलम्—३तत्, महीतलपरिसर्पणपांसुपाटलं शरीरं यस्य सः—बहुव्रीहिः ।

प्रियशिष्ये—प्रिया शिष्या—कर्मधारयः, सम्बोधन । Udayana had been engaged to teach V*a*savadatt*a* the art of playing on the lute in her father's palace before he eloped with her.

Page 38. Sloka 13.

Sans. Expl.—'इदानीं' सम्प्रति, वासवदत्तायाः विरहे इत्यर्थः, 'चक्रवाकाः' प्रत्यहं रजनीसमये विरहदुःखभागिनः पक्षिविशेषाः [अपि] 'न एव तादृशाः मे व

दुःखिताः, तेभ्योऽपि उदयनोऽधिकतरं दुःखी इत्यर्थः। 'अन्य अपि', 'स्त्रीविशेषैः' विशिष्टगुणाभिः पत्नीभिः 'वियुक्ताः' विरहिता जनाः 'नैव' उदयनवत् दुःखिता इति शेषः। 'या' पत्नी 'भर्त्रा' स्वामी 'तथा वेत्ति' तथा बहु मन्यते, यथा उदयनः वासवदत्ताम् अमन्यत 'सा स्त्री' 'धन्या' सौभाग्यवती। 'भर्तृस्नेहात्' स्वामिनः अनुरागात् 'सा हि' वासवदत्ता, 'दग्धा अपि' भस्मीभूता अपि 'अदग्धा' नैव मृता। सर्वभुजा वैश्वानरेण तस्याः शरीरमात्रं भस्मीकृतम्, सा तिस्तु भत्तृ हृदये निरन्तरं जागर्त्त्येव, अतएव भस्मसाद्भूतेऽपि भौतिके पिण्डे म्रियत एवासौ। सुष्ठु खलूक्तं भवभूतिना "न खलु स उपरतो यस्य वल्लभः स्मरति।"—वासवदत्ता चिरस्मरणीया जाता इति निष्कृष्टोर्थः॥ १३॥

Notes.

धरइ—This should be translated as धरते which form, though ungrammatical, has been explicitly used by Bhasa in many places. See Intro. Sec II.

तादृशाः—Pandit Ganapati Shastri in his first edition read दुःखिताः तादृशाः। That was merely conjectural, the word being illegible as the Mss were worm-eaten. The actual reading. has been discovered through a Ms. secured later on.

चक्रवाकाः—Chakravaka (ruddy goose) is a class of birds which are famous for their conjugal love. They are supposed by poets to pass their nights in great anxiety when each remains separated from its mate ; cf. चक्कवाकवहुए आमन्तेहि सहचरं, उवट्ठिदा रअणी'—Sak. Also, 'दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्—Meghaduta.

स्त्रीविशेषैः:—Nom. of वियुक्ता। स्त्रीषु विशेषाः—७तत्, तैः। विशिष्यन्ते ये ते विशेषाः; कर्मणि घञ्। As examples of स्त्रीविशेष here may be cited the names of इन्दुमती, सीता and उर्वशी whose loss was much mourned by अज, राम and पुरूरवस्।

धन्या—धनं लब्धा इति धन+यत्। 'धनगणाल्लब्धा' इति यत्। [लब्धा is in तृन]

भर्तृस्नेहात—६तत्। हेतौ ५मी।

अदग्धा—नञ्तत्। दह+क्त—कर्मणि दग्धा। For the sense, cf. 'उपरताप्यनुपरता महासेनपुत्री, एवमनुकम्प्यमाना आर्य्यपुत्रेण'—Act VI.

Metre.—Th metre is शालिनी। 'मात् तौ गौ चेच्छालिनी वेदलोकैः'।

Rhetoric.—The fig.s of speech are व्यतिरेक in the first three feet and विरोध in the fourth foot.

Ch. of voice.—चक्रवाकैः—तादृशैः अन्यैः...वियुक्तैः...(भूयते)। या भर्त्रा...विद्यते, तया स्त्रिया धन्यया (भूयते)।...तया...दग्धया...अदग्धया (भूयते)।

Page 34

Sans. Expl.—'पर्य्यवस्थापयितु' सान्त्वयितुम्...'यत्नवान्' अवहितः... 'दृढ़' प्रयत्नवान्' अतीव चेष्टाशील: 'तत्रभवन्त'महाराजमुदयनम्...।

Notes.

पर्य्यवस्थापयितुम्—परि—अव—स्था + णिच् + तुम्।

दृढ़म्—Adverb, modifying प्रयत्नवान्।

Remarks.—अथ भो: etc.—Yaug. put this question with a view to finding out whether his scheme had been followed by every one concerned in the matter. The duty imposed on Rumanwan was to attend the king.

Page 35. Sloka 14.

Sans. Expl.—('स हि' रुमण्वान्) 'अनाहारे' भोजनविरति-विषये 'तुल्य:' राज्ञ: सदृश:, राजापि सर्व्वदा भोजनविरत: सोऽपि तथा इत्यर्थ:। 'प्रतत-रुदित-क्षामवदन:' अविरतं रोदनेन कृशमुख:, 'शरीरे' अङ्गेषु 'संस्कारं' भूषादि 'नृपतिसमदु:खं' राज्ञा उदयनेन तुल्यशोकं यथा स्यात् तथा 'परिवहन्' धारयन् 'दिवा वा रात्रौ वा' रात्रिन्दिवम् 'यत्न' 'नरपतिं परिचरति' राजानं सेवते। 'नृप:' सद्य: 'यदि प्राणान् त्यजति' यदि सहसा म्रियते, 'तस्य अपि' उपरम: मृत्यु:. भवेदिति शेष:। राज्ञ: तुल्यावस्थ एव रुमण्वान् तं सदैव सेवितुम् कृतयत्न: इत्यर्थ:॥ १४॥

Notes

अनाहारे—अधिकरणे ७मी।

प्रतत etc.—Adj. to स:। प्र—तन + क्त—कर्त्तरि = प्रतत ; रुद + क्त—भावे = रुदित ; क्षै + क्त—कर्त्तरि = क्षाम by the rule 'क्षायो म:'। प्रततं रुदितम्—कर्म्मधारय:, तेन क्षामम्—३तत् ; तादृशं वदनं यस्य स:—बहुव्रीहि:।

नृपतिसमदु:खम्—Adverb. समं दु:खं यथा स्यात्—बहुव्रीहि: ; नृपतिना समदु:खम्—३तत्।

परिवहन्—Adj. to स:। परि—वह + शतृ। Obj—संस्कारम्।

दिवा—अव्यय, ७मी १व।

उपरम:—Nom. of भवेत् understood. उप—रम + घञ्—भावे।

Rhetoric.—The fig. of speech is स्वभावोक्ति।

Metre.—शिखरिणी। 'रसैरुद्रैश्छिन्ना यमनसभलाग: शिखरिणी'।

Ch. of. voice.—(तेन)...तुल्येन,—वदनेन ··परिवहता—नरपति: परिचर्य्यते। नृपेण...प्राणा: त्यज्यन्ते...उपरमेण [भूयते]।

Sans. Expl.—'दिष्ट्या' भाग्येन 'सुनिक्षिप्तः' सज्जनसमीपे स्थापितः 'इदानीम्' 'इदानीम्' 'आर्यपुत्रः' मे पतिः।…'महद्भारम्' महतः स्वजनस्य उपयुक्तं भारम् कार्य्यगौरवम् 'उद्वहति' धारयति 'रुमण्वान्'…।

Notes.

सुनिक्षिप्तः—सु—नि—क्षिप+क्त—कर्म्मणि। Obj—आर्य्यपुत्रः।

महद्भारम्—महतः भारः—६तत्, तम्। Note that महान्तं भारम् would give the compound महाभारम। In the Trivandrum plays, the rule regarding the substitution of आ for the final of महत् is not always observed.

Page 36. Sloka 15.

Sans. Expl.—'अयं भारः हि' ममोपरि न्यस्तः राजमहिषीरक्षारूपो भारः हि 'सविश्रमः' सविरामः, पद्मावती-हस्ते न्यासरूपेण समर्पणादिति बोद्धव्यम् 'तस्य तु श्रमः' रुमण्वतस्तु राजरक्षणक्लान्तिः 'प्रसक्तः' अविरामः, अन्यस्य असाध्यत्वात् इति बोद्धव्यम्। 'नराधिपः' राजा 'यत्र अधीनः' यस्य यत्रायत्तः, 'तस्मिन्' 'सर्व्वं हि' समग्रम् एव 'अधीनम्',—तस्य यत्नाभावे न किमपि रक्षामाप्नोति इत्यर्थः॥ १५॥

Notes

सविश्रमः—वि—श्रम+घञ्—विश्रमः; cessation. विश्रमेण सह वर्त्तमानः—बहुव्रीहिः। The वृद्धि of the उपधा of the root श्रम is barred by the rule 'नोदात्तोपदेशस्य मान्तस्य अनाचमेः'। The form विश्राम, however, is often met with; cf, 'विश्रामो हृदयस्य यत्र &c,'—Uttara-charita. So, some grammarians have the following rule—'विश्रामो वा'।

अयं भारः—एष कार्य्यभारः—This burden of duty imposed on me i. e. the protection of the queen.

प्रसक्तः—Adj. to श्रमः। प्र—सञ्ज्+क्त—कर्त्तरि। सञ्ज् means 'to adhere to', (hence) 'to be incessant.'

तस्मिन्—सप्तमी in connection with अधीन as indicated by the rule 'सप्तमी शौण्डैः' forming ७मीतत् compound. The शौण्डादि-गण contains in it the word अधि, and hence it follows that ७मी is used in connection with अधि।

अधीनम्—अधि is an अव्यय meaning 'under.' It has been read in the शौण्डादि class and forms a ७मीतत् compound. A

compound ending in अधि always takes the affix ख (ईन) after it by the rule '—अध्युत्तरपदात् खः'। Then, by analogy, the word came to be used by itself ; cf. वयस्क, इत्या (singly), etc., in Bengali. अधीन has been used both by the *Varttika-kara* and by the भाष्यकार and must, therefore be, regarded as correct—वाक्य' वक्तव्यधीनं हि (वार्त्तिक I. 1.59), 'तदेतत् प्रयोक्तव्यधीनं हि' (भाष्य ८।१।४)। The following exposition also may be given—इनम् (=प्रभुम्) अधिगतः=अधीनः। One having a master to serve', hence, subordinate.

Metre.—अनुष्टुप्।

Ch. of voice.—अनेन भारेण सविश्रमेण [भूयते]...श्रमेण प्रसक्तेन[भूयते]। ...सर्व्वेण अधीनेन [भूयते],...अधीनेन नराधिपेन [भूयते]।

Page 36. अथ भो......etc.

Sans. Expl.—अथ भोः पर्य्यवस्थापित इत्यादि—। 'भोः' हे ब्रह्मचारिन् 'पर्य्यवस्थापितः' प्रकृतिम् आपादितः 'इदानीं' सम्प्रति 'स राजा' उदयनः, इति यौगन्धरायणस्य प्रश्नः।

'न जाने' नावगच्छामि, ततः प्राक् लावाणकाद् आगमनाद् इति बोद्धव्यम्। 'इह तया सह उषितम्' इत्यादि राज्ञः विलाप-प्रकारम् आह। 'पर्य्युषितम्' मया परितो वासः कृतः इत्यर्थः। 'अमात्यैः' मन्त्रिभिः 'महता यत्नेन' चेष्टातिशयेन 'तस्मात् ग्रामात्' लावाणकात् 'गृहीत्वा' तेन 'अपक्रान्तम्' स्थानान्तरं गतम्। 'ततः निष्क्रान्ते राजनि' राज्ञः गमनात् परम् 'प्रोषितनक्षत्रचन्द्रम् इव नभः' नक्षत्रैः चन्द्रेण च विहीनम् जातः।...'निर्गतोऽस्मि' तं विहाय आगतो भवामि।

Notes.

भोः—A vocative particle. 'नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः'—मनुः।

पर्य्यवस्थापितः—परि—अव—स्था+णिच्+क्त कर्म्मणि।

पर्य्युषितम्—परि—वस+क्त—भावे।Nom.—मया understood. परि with वस् often means 'to be stale.' Here, however, that meaning is not intended.

यत्नेन—करणे ३या। It is करण of गृहीत्वा।

अपक्रान्तम—अप—क्रम+क्त—भावे। Nom.—अमात्यैः।

निष्क्रान्ते—Adj. to राजनि। निस्—क्रम+क्त—कर्त्तरि।

राजनि—भावे ७मी।

प्रोषितनक्षत्रचन्द्रम्—Adj to नभः। प्र—वस+क्त—कर्त्तरि=प्रोषित। नक्षत्राणि च चन्द्रश्च नक्षत्रचन्द्रा—द्वन्द्वः, प्रोषिताः नक्षत्रचन्द्राः यस्मात् तत्—बहुव्रीहिः।

अरमणीयः—Adj. to ग्रामः। रमयति इति रमणीयः। रम+अनीय—कर्त्तरि, बाहुलकात्। न रमणीयः—नञतत्।

Rhetoric—Here exists the dramatic peculiarity (नाट्यालङ्कार) called उत्कीर्त्तनम्। "—भूतकार्याख्यानम् उत्कीर्त्तनं मतम्"—सा. द.। In ततो निष्क्रान्त etc., the fig. of speech is उपमा। [The king is compared to the moon, the ministers and V*a*sava.datt*a* to the stars, and the village to the sky].

Pages 37—38. स खलु etc.

Sans. Expl.—'गुणवान्' भृशं गुणशाली......'आगन्तुकेन' अपरिचितेन 'एवं' पूर्व्वोक्तप्रकारेण 'प्रशस्यते' स्तूयते।

......'अपरा स्त्री' त्वदन्या कापि 'तस्य' हस्तं गमिष्यति' तेन परिणीता भविष्यति (सर्व्वथा त्वमेव उदयनेन सह परिणये प्रयत्नं आस्थेय इत्याशयः)।

'हृदयेनेव सह एवं मत्सङ्कल्पं ज्ञात्वा एव 'मन्त्रितम्' आलोचितम्, चेष्टा इति शेषः।

'आपृच्छामि' गमनानुमतिं याचे 'भवन्ती' परिव्राजकं (यौगन्धरायणं) कार्य्यकौशल।...'अर्थसिद्धये' उद्देश्य-साधनाय।

Notes.

गुणवन्तः—The form in १मा बहुवचन of a Sanskrit word *minus* the विसर्ग is often regarded as a base in later languages developed from Sanskrit. cf. गुणवन्त (Prakrit); श्रीमन्त, भाग्यवन्त (Bengali); pater (Latin); hunter (English—from हन्तारः); &c. This is an almost universal rule, although this is not mentioned in Grimm's Laws.

नाम—An अव्यय used in the sense of अभ्युपगम (admission); cf. 'विनीतवेशेन प्रवेष्टव्यानि तपोवनानि नाम'। 'न खलु धीमतां कश्चिदविषयो नाम—Sak.

प्रशस्यते—प्र—शंस+कर्म्मवाच्ये लट्ते।

आपृच्छामि – आ—प्रच्छ + लट्, मि (for ए) । आ—प्रच्छ is आत्मनेपदी by the rule 'आङि नु-प्रच्छ्योः'। But this rule is not followed here. Some hold that Bhasa flourished before these rules were framed or confirmed.

अर्थसिद्धये—तादर्थ्ये ४र्थी। अर्थस्य सिद्धिः—६तत्, तस्यै।

Rhetoric.—In भो स्व गुणवन्तो etc. there is the dramatic peculiarity called क्षिप्ति। 'क्षिप्ति' केनचिदंशेन किञ्चिदयत्नानुमीयते'—सा. द.।

Page 39.

Sans. Expl.—साधु, अहमपि etc.—...'तत्रभत्या' पूज्यया, पद्मावत्या इत्यर्थः।

......'गन्तुमिच्छति' एष परिव्राजक इति शेषः, 'किल' वार्त्तायाम् 'उत्कण्ठिष्यते' चित्याक्लिष्टा भविष्यति। 'साधुजनहस्तगता' सज्जनस्य पद्मावतीरूपस्य 'हस्तं गता' आश्रयं प्राप्ता...

Notes

अभ्यनुज्ञातः—अभि – अनु – ज्ञा + क्त—कर्मणि। Adj. to एष परिव्राजकः (यौगन्धरायणः) understood.

किल—As he says. 'किल सम्भाव्य-वार्त्तयोः'। Here the sense of वार्त्ता is to be applied in a limited sense.

साधुजनहस्तगता—साधुः जनः—कर्मधारयः, तस्य हस्तः—६तत्, तं गता—२तत्।

उत्कण्ठिष्यति—The परस्मैपद is irregular.

Pages 39—40.

Sans. Expl.—गच्छतु भवान् etc. 'पुनर्दर्शनाय' पुनरपि आगत्य अस्मभ्यं दर्शनं दातुम् [तव पुनरागमनेन वयं सन्तुष्टा भविष्याम इत्यर्थः]। 'तथास्तु' अधुना यामि, कार्य्यसिद्धेः परं पुनर्भवतां समीपे आगमिष्यामि इत्यर्थः। 'समय इदानीम् अभ्यन्तरं प्रवेष्टुम्, सन्ध्या समागता, अधुना गृहप्रवेशकाल उपस्थितः।

......'जाते' वत्से 'तव सदृशं' रूपकुलशीलादिभिः त्वत्तुल्यं 'भर्त्तारं' स्वामिनं 'लभस्व' प्राप्नुहि।

......'अचिरेण' अनतिविलम्बेन......'समासादय' प्राप्नुहि। 'अनुगृहीता' अभिमताशीर्भिः संवर्द्धिता।

...'इतः इतः' अनेन पथा आगच्छतु इत्यर्थः।

Notes.

अभ्यन्तरम्—Obj. of प्रवेष्टुम्। They had come out of their (temporary) residence in the hermitage to make the

announcement mentioned in page 11. Now that it is evening, it is now time for them to retire and go inside.

तव—षष्ठी with सदृश by the rule 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्'।

सदृशम्—Adj. to भर्त्तारम्। (समानः दृश्यते इत्यर्थः) समानः पश्यति (ज्ञानविषयो भवति) इति समान – दृश् + कञ्—कर्त्तृवाच्ये (कर्म्मकर्त्तृवाच्ये)। Rules—"त्यदादिषु दृशः अनालोचने कञ् च"; समानान्ययोश्च इति वाच्यम्।' समान be comes स by the rule "दृग्-दृश-वतुषु"।

N. R. The affix is prescribed in कर्त्तृवाच्य। The *sense* is that of कर्म्मकर्त्तृवाच्य। 'समानो दृश्यते इति न विग्रहः, कर्त्तर्येव क्विन्-विधानात्, किन्तु कर्म्मकर्त्तरि क्विन्-कञौ। समानः पश्यति इति विग्रहः। समानत्वेन ज्ञानविषयो भवतीत्यर्थः इति भाष्ये स्पष्टम्'—इति बालमनोरमा। Some (e. g. काशिका) regard these words (viz. तादृश, मदृश, सदृश, &c.) as रूढ and therefore not admitting of any strict विग्रह।

समासादय—सम् – आ – सद् + णिच् + लोट् हि।

Rhetoric.—In जाटे। तव सदृिस' etc. and तुवं पि etc. there is dramatic. peculiarity (नाट्यालङ्कार) named आशीः ; 'आशीरिष्टजनाशंसा'—साहित्यदर्पण।

Pages 41 Sloka 16.

Sans Expl.—'खगा' पक्षिणः 'वासोपेता.' कुलायं गता', 'मुनिजनः' तपस्विजन. 'सलिलम् अवगाढः स्नानाय जल प्रविष्टः, 'प्रदीप्तः अग्निः' प्रज्वलित. यज्ञाग्नि 'भाति' दीप्यते [सन्ध्यागमे अग्नेः शोभा वर्द्धते एव इति बोद्धव्यम्], 'धूमः' यज्ञाग्नि समुद्भूत: इत्यर्थ: 'मुनिवनं' तपोवनं 'प्रविचरति' व्याप्य सर्वतो याति, रविः सूर्यः 'अपि च' 'संक्षिप्तकिरण' संहृतरश्मिजालः 'दूरात्' गमनस्य उच्चस्थलात् 'परिभ्रष्टः' अधोदेश पतित [सन्ध्यायां तस्य तथा प्रतीयमानत्वात परिभ्रष्ट इत्युक्तम्], 'असौ' रविः 'रथं व्यावर्त्य' रथस्य गतिपरिवर्त्तनं विधाय 'शनैः' मन्दगत्या 'अस्तशिखरं' प्रविशति' अस्तमनपर्व्वतशृङ्गं गच्छति [शन रस्तगतमनमपि रवे. यथा प्रतीयते तथैव वर्णितम् इति बोद्धव्यम्, नतु वास्तवं गतिपरिवर्त्तनं गतिमान्द्यं वा विद्यते] ॥ १६ ॥

Notes.

खगाः—खे (आकाशे) गच्छन्ति इति खगाः। ख – गम + ड – कर्त्तरि।

वासोपेताः—वासम् उपेताः—२ तत्।

अवगाढः—अव गाह + क्त – कर्त्तरि। Obj.—सलिलम्।

मुनिजनः—मुनिः एव जनः—कर्म्मधारयः।

प्रदीप्तः – प्र – दीप + क्त – कर्त्तरि ।

मुनिवनम्—मुनीनां वनम्—६तत् । Obj. of प्रविचरति ।

दूरात्—५मी by the rule 'दूरान्तिकार्थेभ्यो द्वितीया च' ।

संक्षिप्तकिरणः—Adj. to रविः । संक्षिप्ताः किरणाः येन सः—बहुव्रीहिः ।

व्यावर्त्त्य—वि – आ – वृत + णिच् + ल्यप् ।

शनैः—अव्ययम् ; Adverb.

अस्तशिखरम्—६तत् । 'कूटोऽस्त्री शिखरं शृङ्गम्'—अमरः ।

Rhetoric.—The fig. of speech is स्वभावोक्ति । Def.—'स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्'—काव्यप्रकाश ।

Ch. of Voice—स्वर्गः वासोपेतैः [भूयते], मुनिजनेन सलिलम् अवगाढ़म्, प्रदीप्तेन अग्निना भायते, धूमेन मुनिवनम् प्रविचर्य्यते, रविणा......संक्षिप्तकिरणेन... परिभ्रष्टेन [भूयते] अमुना...अस्तशिखरं प्रविश्यते ।

निष्क्रान्ताः—निस्—क्रम + क्त—कर्त्तरि ।

अङ्कः—An Act. An अङ्क has thus been defined in the साहित्यदर्पण—

"प्रत्यक्षनेतृचरितो रसभाव-समुज्ज्वलः ।
भवेदगूढ़शब्दार्थः क्षुद्रचूर्णकसंयुतः ॥
विच्छिन्नावान्तरैकार्थः किञ्चित्संलग्नबिन्दुकः ।
युक्तो न बहुभिः कार्य्यैर्बीजसंहृतिमान् न च ॥
नाना-विधान-संयुक्तो नातिप्रचुरपद्यवान् ।
आवश्यकानां कार्य्याणामविरोधाद्विनिर्म्मितः ॥
नानेकदिन-निर्वर्त्त्यकथया सम्प्रयोजितः ।
आसन्ननायकः पात्रैर्युतस्त्रि-चतुरैस्तथा ॥
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः ।
अन्त निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः ॥"

End of Act I.

———

Act II

Page 42—43. कुञ्जरिए etc.

Notes

Sans. Expl.—कुञ्जरिका इति भपरस्य टीनाम ।....'भर्त्तृदारिका' भर्त्तुः राज्ञः दर्शकपितुः दारिका कन्या, राजपुत्री इत्यर्थः ।...भणसि' कथयसि...'माधवीलता-मण्डपस्य पार्श्वतः' वासन्तीलतागृहस्य पार्श्वे, 'कन्दुकेन' क्रीड़ागोलकेन... । 'उप-सर्पामि' तत्समीपं गच्छामि । 'अम्मो' विस्मयसूचकम् अव्ययम् ।...'उतक्रान्तकर्ण-चूलिकेन' उन्नमिता कर्णचूलिका तन्नामभूषणविशेषः यस्मिन् तेन, 'व्यायामसञ्जात-स्वेदबिन्दु-विचित्रितेन' व्यायामेन कन्दुकक्रीड़ा-परिश्रमेण सञ्जाताः आविर्भूताः ये स्वेदबिन्दवः घर्म्मकणाः तैः विचित्रितेन शोभितेन, 'परिश्रान्तरमणीय-दर्शनेन' क्लान्ति-युक्तेनापि मधुरदर्शनेन 'मुखेन' उपलक्षिता इति शेषः...'इतः एव' माम् अभिलक्ष्य एव ।...'उपसर्पस्यामि' समीपं गच्छामि । 'चूलिका' कर्णमूलमिति केचित् । 'चूलिका नाटकस्याङ्गे कर्णमूले च हस्तिनाम्' इति मेदिनी ।

भर्त्तृदारिका—भर्त्तुः दारिका—६तत । पद्मावती was the sister of king Dars'aka, so she was the daughter cf the late king of Magadha. The root दृ means 'to pierce.' 'दारयति' नाशयति पितृपणम् इति दारकः । दृ+ण्वुल्+टाप् दारिका । The following will be of interest—

> "सम्भवे स्वजनदुःखकारिका
> सम्प्रदानसमयेऽर्थहारिका ।
> यौवनेऽपि बहुदोष-कारिका
> दारिका हृदयकारिका पितुः ॥"

कुत्र—किम्+त्रल् (सप्तम्याः) । क्व is the only form generally met with in ancient works.

किं भणसि—In a drama, the speech of an actor or actress introduced with the words किं ब्रवीषि etc. is technically called आकाशभाषित ।

> "किं ब्रवीषीति यन्नाट्ये विनापात्रं प्रयुज्यते ।
> श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम् ॥"—साहित्यदर्पण ।

माधवीलतामण्डपस्य—शेषे ६ष्ठी । माधवी इति लता—कर्म्मधारयः, तस्याः मण्डपः—६तत्, तस्य ।

मुखेन—उपलक्षणे ३या ।

कन्दुकेन—करणे ३या । कन्दुकs are small light balls to toss up. कन्दुकक्रीड़ा was prevalent among the young maidens of ancient India, having its substitute in the modern "धूँटी खेला"; cf. the story of कन्दुकावती in the दशकुमारचरित । कन्दुक and गेन्दुक are synonyms.

अम्मो—An interjection (अव्यय) indicating surprise and delight. The maid is surprised to see the princess all the more beautiful while engaged in playing with a ball—'विस्मये अम्महे अम्मो नित्यं स्त्रीभिः प्रयुज्यते' ।

उत्क्रान्तकर्णचूलिकेन—Adj. to खेन । उत्क्रान्ता कर्णचूलिका यस्य- बहुव्रीहिः, तेन । कर्णचूलिका is an ornament of the ear. Some take it as कर्णमूल । 'चूलिका नाटकस्याङ्गे कर्णमूले च हस्तिनाम्'—मेदिनी ।

व्यायामसञ्जात स्वेदबिन्दुविचित्रितेन—Adj. to मुखेन । व्यायामेन सञ्जाताः—३तत्; स्वेदस्य बिन्दवः—६तत्; व्यायामसञ्जाताः स्वेदबिन्दवः—कर्मधारयः, तैः विचित्रितम्—३तत्, तेन ।

मुखेन—उपलक्षणे ३या by the rule 'इत्थम्भूतलक्षणे' ।

उपसर्पिष्यामि—उप—सृप्+लृट स्यामि । Opt. from—उपसर्प्स्यामि । We would expect लट् here by the rule 'यावत्-पुरा-निपातयोर्लट्' ।

प्रवेशकः—प्रवेशकः means 'an interlude' by an inferior character and placed between two Acts, Therefore it never comes at the beginning to the first act. It has been defined thus in the साहित्यदर्पण—

"प्रवेशकोऽनुदात्तोक्त्या नीचपात्र-प्रयोजितः ।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥"

A विष्कम्भक is defined thus—

'वृत्त-वर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य योजितः ॥

Page 44

Sans. Expl.—...'सपरिवारा' चेटीप्रभृतिभिः परिवृता । 'हला' सम्बोधन-सूचकम् अव्ययम् । 'भवतु इदानीम् एतावत्' [कन्दुकक्रीडनम्] सम्प्रति यत्परिमाणं कृतं तत्परिमाणम् एव तिष्ठतु, नाधुना अधिकं क्रीडिष्यामि इत्यर्थः ।

...'चिरम्' अत्यधिककालं यावत् 'कन्दुकेन क्रीडित्वा' कन्दुकक्रीडां कृत्वा

'अधिकसञ्जातरागौ' अधिकतर-रक्तिमप्राप्तौ 'परकीयौ' अन्यजनसम्बद्धौ, न तु तव निजौ इव 'ते हस्तौ' 'संहत्तौ' जातौ—[मन्ये तव हस्तौ अचिरात् केनापि विवाहविधिना गृहीतौ भविष्यतः इति भङ्ग्या वक्रोक्तिः]।

Notes

सपरिवारा—परिवारैः सह वर्त्तमाना—बहुव्रीहिः।

भवतु—The Nom. is कन्दुकक्रीड़नम् understood.

अधिकसञ्जातरागौ—सञ्जातः रागः ययोः तौ—बहुव्रीहिः; अधिकं सञ्जातरागौ—सहसुपा। The palms of Padmavati were naturally red and this redness is regarded as an auspicous sign, indicative of one's future fortune. Her hands grew more red on account of her playing long with a ball. There is a pun on the word राग which means 'love' also.

परकीयौ—परस्य इमौ इति परकीयौ। पर+छ (= ईय) with the augment कुक् by the rule 'कुग्, जनस्य परस्य च'। Thus—परकीय, जनकीय। The words परकीयौ &c. are addressed in jest also. The sense is—your hands appear to have been espoused by your bride-groom, hence they are no longer yours.

Rhetoric.—The dramatic peculiarity here is called नर्म। 'परिहासवचो नर्म'—साहित्यदर्पण।

Page 45. क्रीलदु क्रीलदु etc.

Sans. Expl.—'क्रीड़तु' कुमारीजनसुलभां क्रीड़ां करोतु। 'निर्वर्त्यतां तावत्' सुखेन याप्यताम् एव 'अयं' साम्प्रतिकः 'कन्याभाव-रमणीयः कालः' कौमारावस्थाहितः मधुर-समयः [शीघ्रमेव विवाहो भविष्यति, अतः कन्याजनसुलभां क्रीड़ां यावत् विवाहो न भवति तावत् करोतु इत्यर्थः]।

...'माम् अपहसितुम् इव' नर्मच्छलेन मां वक्तुम् इव 'निध्यायसि' चिन्तयसि। 'न हि न हि' उपहासविधिं नैव चिन्तयामि। 'अधिकम्' अत्यन्तम् 'अद्य शोभते' भवती इति शेषः—अद्य त्वयि अधिकतरां श्रियं लक्षयामि इत्यर्थः। 'अभितः इव' चतुष्पार्श्वतः इव 'ते अद्य' 'वरमुखं पश्यामि' तव सुन्दरं वदनं लक्ष्यामि। तव मुखश्रिरतीवाद्य सुन्दरी वर्त्तते; अथच, [परिहासपक्षे] त्वाम् अभितः तव भाविनः पत्युर्मुखं पश्यामि।

Notes.

क्रीड़तु—Repeated in the sense of हर्ष। 'विवादे विस्मये हर्षे खेदे दैन्येऽवधारणे। प्रसादने सम्भ्रमे च द्विस्त्रिरुक्तं न दुष्यति'॥

निर्वर्त्यताम्—निर्—वृत्+णिच्+कर्मणि लोट्, ताम्। Nom.—अनया understood.

कन्याभावरमणीयः—Adj. to कालः। रमयति इति रमणीयः। रम+अनीय—कर्तरि, बाहुलकात्। कन्यायाः भावः—६तत्, तेन रमणीयः—३तत्।

निध्यायसि—नि – ध्यै + लट्, सि। नि – ध्यै primarily means 'observation'—'निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणम्'। Also—'निध्यानमवलोकनम्'। Here it means 'reflection.'

शोभते—Nom. भवती—understood.

ते—शेषे ६ष्ठी, having connection with वरमुखम्।

वरमुखम्—वरम् मुखम्—कर्मधारयः; also. वरस्य (of the bridegroom) मुखम्—६तत्।

Rhetoric.—The dramatic peculiarity is नर्म in अभित इव etc

Page 46. अपेहि etc.

Sans. Expl.—'अपेहि' अपसर [प्रणयकोपोक्तिरियम्]।...'एषा अस्मि' 'तूष्णीका' सम्प्रति वाग्विरता भवामि 'भविष्यन्महासेनवधु' हे महासेनस्य प्रद्योतस्य भाविनि पुत्रवधु। [त्वं महासेनपुत्रस्य पत्नी भविष्यसि इत्युक्तेव वाग्विरता भवामि इत्यर्थः]।...

'उज्जयिनीयः' उज्जयिनीनगरीवासी—'बलपरिमाणनिर्वृत्तम्' सैनापरिमाणसञ्जातं 'नामधेयं' नाम 'महासेन इति' [तस्य अन्यापेक्षया अधिकतरा सेना अस्ति अतः स महासेनः इतिकथ्यते इत्यर्थः]।...'तेन राज्ञा सह' महासेनेन सह 'सम्बन्धं' पुत्रवधूसम्पर्कम् 'न इच्छति' [सा महासेनपुत्रस्य पत्नी भवितुं न इच्छति इत्यर्थः]।

Notes

अपेहि—अप—इ+लोट्, हि। This is affectionately said with feigned anger.

तूष्णीका—'तूष्णींशीलस्तु तूष्णीकः'—इत्यमरः। तूष्णीम्+क by the वार्त्तिक-rule 'शीले को मलोपश्च'। The ई of तूष्णीं does not become ह्रस्व on the strength of the मलोप, as otherwise the grammarian could have prescribed ड (i. e. अक) instead of क। The difference between the operations of the two affixes is with regard to स्वर (Vedic intonation).

भविष्यन्महासेनवधु—सम्बोधन। महासेनस्य वधूः—६तत्, भविष्यन्ती महासेनवधूः—कर्मधारयः।

उज्जयिनीयः—Adj, to राजा। उज्जयिनी+छ। [छ=ईय]।

बलपरिमाणनिर्वृत्तम्—बलस्य परिमाणम्—६तत्, तेन निर्वृत्तम्।—३तत्। निर्-वृत्+क्त—कर्त्तरि निर्वृत्त (meaning निष्पन्न)। Distinguish the word from निवृत्त (=stopped) and निर्वृत (=शान्त)।

महासेनः—महती सेना यस्य सः—बहुव्रीहिः।

Rhetoric.—In को एसो etc., there is the dramatic peculiarity called परिभावना। 'कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना' —साहित्यदर्पण।

Page 47. अय केण खु etc.

Sans. Expl.—'अभिलषति' इच्छति, सम्बन्धमिति शेषः।
...'तस्य गुणान्' पत्नी-प्रेमादीन् इत्यर्थः 'अभिलषति' इच्छति [तद्गुणानुरागात् तमेव पतित्वेन लब्धुमिच्छति इत्यर्थः] 'आर्य्यपुत्र' मत्पतिम् 'भर्त्तारम् अभिलषति' पतिरूपेण लब्धुं काङ्क्षति इत्यर्थः।

...'सानुक्रोशः इति' [वत्सराजः] सदयः इति [अतः भर्त्तारम् इच्छति]।

...'अयम् अपि जनः' एषोऽहमपि 'एवम् उन्मादितः' तद्गुणमुग्धा सती तमेव भर्त्तारं लब्धुं दृढाभिप्राया आसम् इत्यर्थः।

...विरूपः' सौन्दर्य्यहीनः [गुणवान् अपि यदि रूपहीनो भवेत्, ततोऽपि किं तस्मिन् ते अभिलाषः ?]

Notes

केन—३या with सह understood.

वत्सराजः—वत्सानां राजा—६तत्। टच्, as समासान्त, is added by the rule राजाहःसखिभ्यष्टच्'।

सानुक्रोशः—अनु-क्रुश+घञ्=अनुक्रोशः; pity. अनुक्रोशेन सह वर्त्तमानः—बहुव्रीहिः। 'कृपा दयानुकम्पा स्यादनुक्रोशः' इत्यमरः।

उन्मादितः—उत्-मद्+णिच्+क्त—कर्म्मणि Adj. to जनः।

विरूपः—विगतं विकृतं वा रूपं यस्य सः—बहुव्रीहिः।

Rhetoric.—In अयं वि जनो etc the dramatic peculiarity is निरुक्ति। "पूर्व्वसिद्धार्थकथनम् निरुक्तिरिति कीर्त्तितम्"—सा. द.।

Page 48—णहि णहि etc.

Sans. Expl.—'नहि नहि' नैव उदयनः असुन्दरः, 'दर्शनीय एव' सुन्दरः एव।
...'आर्य्यपुत्रपक्षपातिनं' स्वामिनं प्रति मम स्नेहवशात् 'अतिक्रान्तः' उल्लङ्घितः समुदाचारः'

न्याय्य-व्यवहार:, प्रच्छन्नवासानुकूल: समय: इत्यर्थ:। 'किम् इदानीं करिष्यामि' उपायं न पश्यामि इत्यर्थ:। 'भवतु' अस्तु [अनेन उपाय-प्राप्ति: सूचिता] 'इष्टम्' लब्धम् उत्तरानुकूलं वाक्यम् इत्यर्थ:।......'उज्जयिनीय: जन: मन्त्रयते' उज्जयिनी-वासिन: कथयन्ति।

Notes

दर्शनीय:— द्रष्टुं योग्यं इति दृश् + अनीय— कर्म्मणि।

आर्य्यपुत्रपक्षपातेन— करणे ३या। आर्य्यपुत्रस्य पक्ष:— ६तत्। तस्मिन् पात:— ७तत्, तेन। Or आर्य्यपुत्रे पक्षपात: (७तत्)।

अतिक्रान्त:— अति – क्रम + क्त— कर्म्मणि। Nom.—मया understood.

समुदाचार:—Obj. of अतिक्रान्त:। सम् – उत् – आ – चर + घञ्। उदाचार: आचार:। सम्यक् उदाचार: इति समुदाचार:— प्रादि: ; proper course of conduct.

इष्टम्—सामान्ये नपुंसकम्, the object being a word meaning उपाय।

Rhetoric.—In हला ! एवं etc. the dramatic peculiarity is अभूताहरणम्। "[तत्र] व्याजाश्रयं वाक्यमभूताहरणं मतम्"।—साहित्यदर्पण।

Page 49. जुज्जइ etc.

Sans. Expl.—'युज्यते' उपपन्नं भवति [तव वाक्यमिति शेष:]। कथं युज्यते ? तदाह— न खल्वित्यादि)........'उज्जयिनीदुर्लभ:' उज्जयिनीयैर्जनैर्दुरापः [उज्जयिनी-राजस्य जामाता उदयन: इत्यतो न तत्रासौ दुर्लभ इत्यर्थ:]। 'सर्व्वजन-मनोऽभिराम" सकललोकप्रियं 'खलु' 'सौभाग्य' नाम' सौन्दर्य्यं भवत्येव [अत: आवन्तिकाया अपि तद्दर्शनं नासम्भवम् इत्याशय:]।...'दत्ता असि' वाग्दत्ता भवसि [विवाहविधिना सम्प्रदानात् पूर्व्वतरो विधिविशेष: वाग्दानमिति कथ्यते]।

Notes

उज्जयिनीदुर्लभ:— उज्जयिन्यां दुर्लभ:—७तत्। दुर्—लभ + खल्— कर्म्मणि।

सर्व्वजनमनोऽभिरामम्—सर्व्वे जना: – कर्म्मधारय:; मनस: अभिरामम्— ६तत्; सर्व्वजनानां मनोभिरामम् – ६तत्। अभिरमते अत्र इति अभिरामम्, अभि – रम + घञ्— अधिकरणे।

सौभाग्यम्—सुभगस्य भाव: इति सुभग + ष्यञ्। उभयपदवृद्धि is by the rule 'हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च'। सुभग has a technical meaning which is intended here. 'स खलु सुभगो यम् अङ्गना: कामयन्ते'।

Rhetoric.—The sudden appearance of the धात्री—with

the words 'भेदु भट्टिदारिआ etc.' to relate the good news of Padmávati's सौभाग्य (in getting Udayana as her husband), just when she was thinking of the सौभाग्य (beauty) of Udayana is an instance of dramatic peculiarity called पताकास्थान which is defined thus :—

"यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते ।
आगन्तुकेन भावेन पताकास्थानकं तु तत् ॥" —साहित्यदर्पण ।

Here it is a case of प्रथम पताकास्थान as Padmávati's सौभाग्य (good fortune) comes to her all on a sudden.

"सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्तितम् ॥"—साहित्यदर्पण ।

Page 50. वत्सराजस्य etc.

Sans Expl.—'अथ' प्रश्ने, 'कुशली' क्षेमवान् [शोकजर्जरितहृदयस्य उदयनस्य पत्न्यन्तरग्रहणमतिः न स्यादिति मन्वानायाः वासवदत्तायास्तत्कुशलप्रश्नः]। ...'आगतः' राजगृहमिति शेषः।... प्रतीष्टा' ईप्सिता पत्नीत्वेन । 'अत्याहितम्' अतीव अमङ्गलं. ममेति शेषः [अल्पीयसा एव कालेन यदि विस्मृता अहं तदा मे दौर्भाग्यम् इत्यर्थः]। 'अत्र' उदयनस्य पद्मावती-परिणये— ।

Notes.

कुशली—कुशलं विद्यते अस्य इति कुशल + इनि ।

प्रतीष्टा प्रति—इष+क्त—कर्मणि । Accepted ; here, desired.

तस्य—कर्तरि षष्ठी in connection with the इच्छार्थक verb प्रतीष्टा ।

अत्याहितम्—'अत्याहितं महाभीतिः कर्म जीवानपेक्षि च'—अमरः ।

[Nothing is so afflicting to Vasavadatta as to hear that her husband has forgotten her within so short a period and is going to take another wife].

Rhetoric.—in 'अत्याहितं' there is the dramatic peculiarity called खेद । 'मनश्चेष्टा- समुत्पन्नः श्रमः खेद इति स्मृतः'—साहित्यदर्पण ।

Page 51. न खलु किञ्चित् etc.

Sans Expl.—'न खलु किञ्चित्' अत्याहितं किमपि नास्ति इत्यर्थः [मनसः समुद्‌घाटितभावेन प्रच्छादयितुम् कथितमेतत्] 'तथा नाम सम्भाव्य' वासवदत्तायाः तिरोधाने पूर्ववत् विलप्य 'उदासीनो भवति' [अधुना] विस्मृतशोकः भवति 'इति' अत्याहितमुक्तम् इति शेषः [पद्मावती-परिणये तु अत्याहितं नास्ति इति प्रकाश्यते]।... 'आगमप्रधानानि' 'आगमः' शास्त्रं 'प्रधानं' आश्रयः येषां तानि, शास्त्रोपदेशचालितानि

इत्यर्थः 'सुलभपर्य्यवस्थानानि' अनायासेन लब्धस्वस्थीभावानि 'महापुरुषहृदयानि' उन्नतमनसां जनानां चित्तानि 'भवन्ति'—उन्नतमनाः स उदयनः शास्त्रोपदेशानुसारी, अतः स्वल्पायासेनैव प्रकृतिस्थो जातः इत्यभिप्रायः ।...'वरिता' प्रार्थिता, पद्मावती इति शेषः । 'अन्यप्रयोजनेन' उद्देश्यान्तरम् आदाय [राज्योद्धरणार्थं सैन्यसाहाय्यं याचितुमिति परस्तात् अवगम्यते]' 'इह आगतस्य' राजगृहे उपस्थितस्य (उदयनस्य) 'अभिजनविज्ञानवयोरूप'' कुलं पाण्डित्यं यौवनं तथा सौन्दर्यञ्च 'दृष्ट्वा', 'स्वयमेव महाराजेन' दर्शकेन आत्मना एव 'दत्ता' [अत पूर्व्वं नाभूत् वत्सराजस्य प्रार्थना इति बोद्धव्यम्] ।

Notes.

न खलु etc.—These words were addressed to hide the mental agony of Vaasvadatta which had been disclosed when the word 'अत्याहितम्' by chance escaped from her mouth.

तथा नाम सन्तप्य—See the speech of the ब्रह्मचारी in Act I. 'इह तथा सह हसितम् etc.':(Page 36).

उदासीनः—उत्—आस + शानच् - कर्त्तरि ।

आगमप्रधानानि—Adj. to हृदयानि । आगमः प्रधानं येषां तानि—बहुव्रीहिः । When meaning 'best,' the word प्रधान is always neuter and singular. क्लीवे प्रधानं प्रमुखम् &c.'—इत्यमरः । 'प्रधानं स्यात् महामात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीवमेकत्वे तूत्तमे सदा' ॥—इति मेदिनी । When used as ordinnry adj. (and not as a विधेय) the word is held by some as taking the gendr of the noun ; cf. 'न जाने स प्रधानो मे यूरहस्ती मदामदः'—चण्डी (सप्तशती) । But there सप्रधानः is taken by some as a compound meaning—'प्रधानेन (=हस्तिपकेन) सह वर्त्तमानः' । The following note will be of interest :—"इदम् (viz. the word प्रधान) आविष्टलिङ्गं, स्वभावात् इति सुभूत्यादयः । तथाच—प्रधानं स्त्री, प्रधान पुमान् प्रधानं कुलम् इति ॥ प्रधाना हरिता मुद्रा इत्यादि-दर्शनात् प्रधानस्यापि द्वयी गतिरिष्यते इति श्रीपतिः ; द्वयी गतिरित्यनेन एको नपुंसकम्, अन्यो वाच्यलिङ्गः इत्यर्थतः अवगन्तव्यः इति" ।—Raghunath in his com. on Amara-kosha. So, also—आगमः प्रधानः येषां तानि । Also, cf. विष्णुसंहिता—chap. 98. "त्वमेव निद्रा जगतः प्रधाना" ।

आगम here means Shastra in general. आगमः or आगमम् sometimes means तन्त्रशास्त्र । आगतं शिववक्त्रेभ्यो गतं च गिरिजाश्रुतौ । मतं च वासुदेवस्य तस्मादागमम् 'ईरितम्' ॥

सुलभपर्य्यवस्थानानि—सु—लभ + खल्—कर्म्मणि = सुलभ। परि-अव—स्था + ल्युट्—भावे = पर्य्यवस्थानम् = स्वस्थीभावः। सुलभं पर्य्यवस्थानं यैः तानि—बहुव्रीहिः।

महापुरुषहृदयानि—महान्तः पुरुषाः—कर्म्मधारयः, तेषां हृदयानि—६तत्।

वरिता—वर (अदन्त—चुरादि) + क्त—कर्म्मणि। Obj.—पद्मावती understood. 'वर' ईप्सायाम् इति धातुः। From वृ the form would be वृता।

अन्यप्रयोजनेन—इेतौ ३या। अन्यत् प्रयोजनम्—कर्म्मधारयः, तेन।

अभिजन-विज्ञान-वयोरूपम्—अभिजनश्च विज्ञानञ्च वयश्च रूपञ्च—समाहारद्वन्द्वः।

Rhetoric.—In आश्रम-पदाणामि etc. there is the dramatic peculiarity called उदाहरण। 'उदाहरणम् उत्कर्षयुक्तं वचनमुच्यते'—साहित्यदर्पण। In अशुप्यभोशयेण etc., there is निरुक्ति। 'पूर्व्वसिद्धार्थ-कथनं निरुक्तिरिति कीर्त्तितम्'—साहित्यदर्पण।

Page 52. वासवदत्ता (आत्मगतम्)—एव्वं etc.

Sans Expl.—'अनपराद्धः' निर्द्दोषः...'अत्र' पद्मावती-विवाहे [स्वयं चेत् प्रार्थयेत पद्मावतीं तदा वासवदत्तायां सापराधो भवेत्, अन्यकर्त्तृकप्रार्थनावशात् विवाहे कृते न स्याद् दोषावकाश इत्यभिप्रायः]...'शोभनं नववम्' विवाहानुकूलस्य नववस्य अवस्थानम्...'कौतुकमङ्गलम्' विवाहसुत्रग्रन्थिधारणम्...'अस्माकं भर्त्तृनी' दर्शकपत्नी राज्ञी...'यथा यथा त्वरते' येषु येषु एव कर्म्मसु त्वरा क्रियते इत्यर्थः......'अन्धीकरोति' आकुलयति इत्यर्थः।

Notes.

एवम्।—Some omit the full stop after एवम्।

अनपराद्धः—अप—राध + क्त—कर्त्तरि = अपराद्धः। न अपराद्धः—नञ्तत्।

शोभनम्—शोभयति इति शुभ + णिच् + ल्यु—कर्त्तरि।

कौतुकमङ्गलम्—कौतुकम् एव मङ्गलम्—कर्म्मधारयः। कौतुक means 'the binding of an auspicious thread on the wrist (before the marriage ceremony). 'कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले' इति कोषः।

अन्धीकरोति—अनन्धं अन्धं करोति इति अन्ध + च्वि—कृ—लट्ति। Nom.—त्वराकारिणी understood.

एदु—Repeated to denote त्वरा।

Rhetoric.—In 'तुवरद etc. there is सन्धि (a peculiarity belonging to the निर्वहणसन्धि)। 'बीजोपगमनं सन्धिः'—साहित्यदर्पण।

Act III

Page 54. विवाहामोदसंकुले etc.

Sans. Expl.—'विवाहामोदसङ्कुले' परिणयोत्सवपूर्णे 'अन्तःपुरचतुःशाले' अन्तःपुरमध्यस्थे गृहचतुष्टयमध्यवर्त्तिनि अङ्गने 'परित्यज्य पद्मावतीम्' तत्र विवाहामोदसम्भोगाय पद्मावतीं रचित्वा—'प्रमदवनम्' क्रीडोपवनम्। [सपत्नीविवाहामोदपरिहाराय वासवदत्तायाः प्रमदवनगमनम् इति बोद्धव्यम्] ।...'भागधेयनिर्वृत्तं दुःखम्' दुरदृष्टघटितं मनःक्लेशम् 'विनोदयामि' लघयामि। ('परिक्रम्य' अग्रतो गत्वा) 'अहो अत्याहितम्' अतिकष्टं मे आपतितम् इत्यर्थः। [किं कष्टं तदेवाह—आर्यपुत्र इति]... परकीयः संवृत्त ' परस्याः भार्य्याः पतिः सञ्जातः। 'यावत् उपविशामि' अधुना निषीदामि [दुश्चिन्तावशात् वासवदत्तायाः कदापि विचरणं कदापि उपवेशनम् इति अस्थिरत्वं बोद्धव्यम्]...'धन्या खलु' भाग्यवती एव 'चक्रवाकवधूः' चक्रवाको नाम पक्षिविशेषः, तस्य स्त्री—चक्रवाकी, या' विरहिता' पतिवियुक्ता सती 'न जीवति'। 'आर्यपुत्रं पश्यामि इति' चिरविरहात् परं स्वामिनं पश्येयम् इति।...'मनोरथेन' आशया...।

Notes

विवाहामोदसङ्कुले—विवाहस्य आमोदः—६तत्, तेन सङ्कुलम्—३तत्, तस्मिन्।

अन्तःपुरचतुःशाले—चतस्रः शालाः यत्र तत् चतुःशालम्—बहुव्रीहिः (the yard surrounded on the four sides by four houses). अन्तःपुरस्य चतुःशालम्—६तत्, तस्मिन्।

भागधेयनिर्वृत्तम्—भागधेयेन निर्वृत्तम्—३तत्। 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः'—अमरः। भाग: एव इति भागधेयम्। भाग+धेय—स्वार्थे by the rule 'रूप-नाम-भागेभ्यो धेयः'। निर्—वृत्+क्त—कर्म्मणि= निर्वृत्त।

प्रमदवनम्—Note the spelling carefully—प्रमदवन and not प्रमोदवन। प्रमदानां वनम् इति प्रमदवनम्। The आ gets ह्रस्व by the rule 'ङ्यापोः संज्ञाछन्दसो र्बहुलम्'; *cf.* कालिदासः। 'पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्। स्यादेतदेव प्रमदवनमन्तःपुरोचितम्'।—इत्यमरः। 'विद्धि यं प्रमदवनं गुह्यान्तैः सह नृपो यत्र रमते'।

परकीयः—Adj. to आर्य्यपुत्रः। परस्य अयम् इति पर+छ, कुगागमः। Rule.—'कुक् अनस्य परस्य च'।

धन्या—धनं लब्धा (i. e. लभ्यते) इति धन्या। धन+यत्। Rule.—धन गणं लब्धा' Thus—धन्य, गण्य।

चक्रवाकवधू:—चक्रवाकस्य वधू: । The चक्रवाकs are described by poets to be highly afflicted by separation from their mates ; cf. 'दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्'—मेघदूत । Also see P. 42.

विरहिता—Some read अन्योन्य-विरहिता, but there is no कर्मव्यतिहार (reciprocity of action) here, as we are speaking of the female bird only. अन्य-विरहिता would give a good meaning ; अन्य meaning the male bird.

मनोरथेन—हेतौ or rather करणे तृया ।

पेक्खामि—प्र-ईक्ष is a root used in प्राकृत and is replaced by पश्य

प्राणान्—The word is always plural as the vital airs are 5 in number—प्राण, अपान, समान, उदान and व्यान । When meaning the प्राणवायु only, the word is singular. "प्राणो ह्यस्मावते योलि काव्य-जीवेऽनिलो बले' ।

मन्दाभागा—Abj. to अहम् । मन्द: भाग: यस्या सा—बहुव्रीहि: ।

Remarks.—In this soliloquy of V*a*savadatt*a* we should try te read her heart. She loves पद्मावती, yet she leaves her compnay as her heart is afflicted to think that her husband will be the husband of another woman. She considers this marriage of her husband as a great calamity to herself (अत्याहितम्) । She prefers death to separation from her husband. Still she desires to live in the hope of seeing him again.

Page 55. कहिं णु खु etc.

Sans. Expl.—'आवन्तिका' अवन्तिदेशागतया: नार्या वेशधारिणी शमत्र-दत्ता । 'अम्मो' हर्षे अव्ययम्...'चिन्ताशून्यहृदया' चिन्तया उद्वेगवशात् 'शून्यं' निष्क्रियं हृदयं यस्या: सा, 'नीहारप्रतिहतचन्द्रलेखा इव' 'नीहारेण' हिमेन 'प्रतिहता' आक्रान्ता 'चन्द्रलेखा' इन्दुकला इव [शोकाक्रान्तत्वात् हिमप्रच्छन्नचन्द्रतुल्या] 'अमण्डितभद्रकं वेषं' अमलङ्कृतमपि भद्रजनोचितं परिच्छदं 'धारयन्ती' वसाना 'प्रियङ्गुशिलापट्टके' प्रियङ्गुलताया: अधस्तात् प्रस्तरखण्डे 'उपविष्टा' निषण्णा ।...'क: काल:' महान् काल: अतिक्रान्त: इत्यर्थ: ।...

Notes.

आवन्तिका—अवन्तिभ्य: आगता इति अवन्ती ; अवन्ति+अण् ; ङीप् । अज्ञाता आवन्ती इति आवन्तिका ; आवन्ती+क by the rule 'अज्ञाते' । The ई is shortened by the rule 'के अण:' । V*a*savadrtt*a* came to

Rajagriha in the dress of a lady of Avanti and was called there by the name of *Avantika*.

चिन्ताशून्यहृदया– शून्यं हृदयं यस्याः सा – बहुव्रीहिः, चिन्तया शून्यहृदया—३तत् ।

नीहारप्रतिहतचन्द्रलेखा—नीहारेण प्रतिहता –३तत् ; चन्द्रस्य लेखा—६तत् ; नीहारप्रतिहता चन्द्रलेखा—कर्म्मधारयः । चन्द्रलेखा—lunar digit.

अमण्डितभद्रकम्—न मण्डितः अमण्डितः—नञ् तत्, अमण्डितः च भद्रकश्च—कर्म्मधारयः ; तम् । भद्रः एव भद्रकः, भद्र + कन्—स्वार्थे ।

प्रियङ्गुशिलापट्टके—प्रियङ्गोः शिलापट्टकम्—६तत्, तस्मिन् । प्रियङ्गु is a kind of creeper, described by poets as putting forth flowers when touched by a woman 'स्पर्शात् प्रियङ्गुर्विकसति'। This is a poetic fancy (कविसमय)। There are similar other कविसमयs :—

स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति बकुलः सीधुगण्डूषसेकात्
पादाघातादशोकस्तिलक-कुरवकौ वीक्षणालिङ्गनाभ्याम् ।
मन्दारो नर्म्मवाक्यात् पटुमृदुहसनाच्चम्पको वक्त्रवाता-
च्चूतो गीतान्नमेरुर्विकसति च पुरो नर्त्तनात् कर्णिकारः ॥

Page 56. वासवदत्ता—किं निमित्तं etc.

Sans Expl. – 'भट्टिनी' राज्ञी, दर्शकभगिनी इत्यर्थः 'भणति' कथयति—'महाकुलप्रसूता' महद्वंशजाता, 'स्निग्धा' स्नेहवती पद्मावत्याम् इति शेषः 'निपुणा इति' तथा च कार्य्यदक्षा [आवन्तिकेति शेषः]। [एभिर्विशेषणैः वासवदत्तायाः माङ्गलिककार्य्ये योग्यता सूचिता]। 'इमां तावत्' पद्मावतीविवाहोपयोगिनीम् इत्यर्थः 'कौतुकमालिकां' विवाहस्रजं 'गुम्फतु आर्य्या' रचयतु भवती [इति चेट्याः प्रार्थना, नाव राज्ञ्याः आज्ञा मन्तव्या]।...''कस्य किल इत्यादि' अस्मात् प्रश्नात् वासवदत्तायाः मालागुम्फने अनिच्छा सूचिता ।

Notes

महाकुलप्रसूता—Adj to आवन्तिका (वासवदत्ता) understood. महत् कुलम्—कर्म्मधारयः, तस्मिन् प्रसूता—७ तत् (सहसुपा)।

स्निग्धा—स्निह + क्त—कर्त्तरि ।

कौतुकमालिकाम्—माला एव मालिका, माला + कन्—स्वार्थे । कौतुकस्य (मङ्गलस्य विवाहोत्सवस्य, see notes— page 58) मालिका—६तत्, ताम् ।

कौतुकमालिकां गुम्फतु आर्य्या—In the story as given in the

Kathasaritsagara by Somodeva, the weaving of the garland by V. is an important factor as the garlands being unfading led U. to infer the presence of V. who had learnt from him the art of weaving such garlands. [cf. K. S. III. 70 ; See Appendix I] But in the Katha., this is at the fag end of the story when their union is too near to require such an infernce to be made.

Bhasa makes no mention of this point but must have meant that the unfading garlands would inspire in U's mind a mystic hope regarding the existence of V.

Some may conjcture that Bhasa's reference to the above has been dropped (of cou:es very slovenly) in the process of abridgement. See Intro. Sec. VII.

कार्ये—तादर्थ्ये ४र्थी।

गुम्फितव्यम्—गुम्फ तव्य...भावे। The Obj. being not mentioned the verb is intransitive.

Rhetoric.—In इमं दाव etc. there is the नाट्यालङ्कार named याच्ञा। 'याच्ञा तु क्वापियाच्ञाया: स्वयं दूत- मुखेन वा—साहित्यदर्पण।

Page 57. अम्हणं भट्टिदारिआए etc.

Sans. **Expl.**—'अस्माकं भर्तृदारिकायै' पद्मावत्यै, गुम्फितव्यम् इति शेष:।... 'एतत् अपि' सपत्न्या कौतुकमाला-गुम्फनमपि मया कर्तव्यम् आसीत्' ममैवकरणीयम् इति विधेर्विधानम् आसीत्? 'अहो' खेदे, 'अकरुणा: खलु' निर्दया एव 'ईश्वरा:' देवा: [यत् मद्भाग्या सपत्न्यै मालाग्रन्थनरूपम् असदृशं कर्म तैरेव विहितम्]। ...'अन्यत् चिन्तयित्वा' मालाग्रन्थनादृते अन्यस्मिन् विषये मनो नियुज्य इत्यर्थ:। 'एष जामाता' साम्प्रतमेव वर: 'मणिभूम्यां मणिकुट्टिमे 'स्नायति' स्नाति (स्नानात् परमेव मालाया: उपयोग: इति बोद्धव्यम्]...। 'न शक्नोमि' न समर्थोस्मि 'अन्यत् चिन्तयितुम्' आत्मन: दुर्भाग्यविषये चिन्तां वर्तुम् इत्यर्थ:।...'हला' सम्बोधने, 'किं दृष्ट:' त्वयेति शेष:...।

Notes

अकरुणा:—अविद्यमाना करुणा येषां ते—बहुव्रीहि:। Opt. form—अविद्यमानकरुणा:। Rule—'नञोऽस्त्यर्थानां वाच्यो वा चोत्तर पदलोप:'।

चिन्तयित्वा—The use of क्त्वा in connection with मा is not supported by grammar (Panini) though such uses are sanctioned in connection with अलम् and खलु by the rule 'अलं-खल्वोः प्रतिषेधयोः प्राचां क्त्वा' This would indicate the anteriority of the poet to Panini.

मणिभूम्याम्—मणिबद्धा भूमिः—शाकपार्थिवादिवत् तत्पुरुषः, तस्याम्।

स्नायति—स्नै (भ्वादि-परस्मैपदी), लट्, ति। The root means वेष्टन, but here it has been used in the sense of 'bathing.' Or, स्नायति is a scribe's error for स्नाति which comes from the root स्ना (अदादि-परस्मै.)।

The statement that the bridegroom is taking his bath, indicates that the garland will be immediately required.

इदमपि कर्त्तव्यमासीत्—This grudging is quite natural. सोमदेव (in his कथासरित् सागर) makes वासवदत्ता weave the garland of her own accord. 'अथासन्न विवाहायाः पद्मावत्या मनस्विनी। अम्लानमाला-तिलकौ दिव्यौ भूयश्चकार सा'। There she is of a more philosophic mentality than she is here. There is said that she saw the life-history of Rama and Sita painted on the walls of Padamavati's room and reconciled herself completely to her lot by constantly keeping in her mind the fate of Sita. 'तत्र वासवदत्ता च प्रविष्टा चित्रभित्तिषु। पश्यन्ती रामचरिते सीतां सेहे निजव्यथाम्'॥

Page 58. आम, दिट्ठो etc.

Sans. Expl.—'आम' अथकिम् इत्यर्थे अव्ययम्; आम् इति संस्कृतम्। 'दृष्टः' जामाता इति शेषः [दर्शनस्य कारणमाह]—'भर्तृदारिकायाः स्नेहेन' पद्मावत्यां प्रेम्णा इत्यर्थः 'अस्माकं कौतूहलेन च' तथाच नवजामातृदर्शने नारीसुलभेन व्यग्रत्वेन।...'न हि ईदृशः दृष्टपूर्व्वः' तत्सदृशः मया पूर्व्वं कोऽपि न दृष्ट इत्यर्थः।...'भण भण' ब्रूहि ब्रूहि, 'किं दर्शनीयः' अपि स जामाता सुन्दरः? 'शक्यं भणितुम्' जामातृवर्णने एतत् वक्तुं शक्यते [यत् सः] 'शरचापहीनः' त्यक्तधनुःशरः 'कामदेव इति' मदन इति, सः सौन्दर्य्ये वा मदन एव, केवलं तस्य धनुः वाणाश्च न सन्ति एतन्मात्रमेव मदनात् पार्थक्यम् इत्यर्थः।

Notes

भर्त्तृदारिकायाः—षष्ठी। With स्नेह, दया, अनुराग, etc. the objects of these emotions genarally take सप्तमी (अधिकरणे)।

खेदेन—इतौ इया।

कौतूहलेन—इतौ इया। कुतूहल+अण्—स्वार्थे।

दृष्टपूर्व्वः—पूर्व्वं दृष्टः इति दृष्टपूर्व्वः—सहसुपा। पूर्व्वनिपात of the word पूर्व्व in the compound is on the authority of a similar use by Panini in his rule 'भूतपूर्व्वे चरट्'।

दर्शनीयः—द्रष्टुं योग्य इति दृश+अनीय—कर्म्मणि।

शक्यम्—शक् यत्—भावे। Nom.—मया understood.

शरचापहीनः :—शराश्च चापश्च इति शरचापम्—समाहार-द्वन्द्वः, तेन हीनः—३तत्।

कामदेवः—कामनामा देवः—शाकपार्थिवादिवत् तत्पुरुषः। काम is a name of मदन। "...कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः..."—इत्यमरः।

Rhetoric.—In इला, भर्त्तृदारिके etc. there is a नाटक-लक्षण named पृच्छा। 'अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मतम्'—साहित्यदर्पण। In सकं भणिदं etc. there is the dramatic peculiarity called अनुक्तसिद्धि। 'विशेषार्थोह्यविस्तारोऽनुक्तसिद्धिरुदीर्य्यते'—साहित्यदर्पण।

Page 59. होदु एत्तकं etc.

Sans. Expl.—'भवतु एतावत्' अतोऽधिकं न श्रोतुम् इच्छामि इत्यर्थः।... 'वारयसि' श्रामातुर्वर्णनम् न शृणोषि इत्यर्थः। 'अयुक्तम्' अविधेयम् सत्या नार्य्या इति शेषः, परपुरुषसङ्कीर्त्तनं अन्यजनस्य रूपगुणादेः वर्णनं 'श्रोतुम्' आकर्णयितुम् [सती नारी परपुरुषगुणवर्णने कर्णं न दद्यात् इत्यर्थः] ।...'गुम्फतु' ग्रथ्नातु ।...'आनय' पुष्पादीनि इति शेषः। 'ददातु' अनेन मालारचनार्थं पुष्पादिकं ददाति इति बोद्धव्यम्।

Notes.

परपुरुषसङ्कीर्त्तनम्—Obj. of श्रोतुम्। परः पुरुषः—कर्म्मधारयः, तस्य सङ्कीर्त्तनम् (प्रशंसाम्)—६तत्।

Rhetoric.—in अजुत्तं etc. there is the dr. peculiarity called नीति। 'नीतिः शास्त्रेण वर्त्तनम्'—साहित्यदर्पण।

Page 60. (वर्ज्जयित्वा विलोक्य) इमं दाव etc.

Sans. Expl.—('वर्ज्जयित्वा') करण्डकात् निःसार्य्य, पुष्पादिकमिति शेषः, [तत्] 'विलोक्य' दृष्ट्वा) 'इदं' तावद् औषधम्' किमपि प्रदर्श्य एतत् पृच्छति इति बोद्धव्यम्। 'अविधवाकरणम्' एतस्मिन् औषधे मालायां धृते सति, नारी विधवा न भवेत् इति गुणयोगतः औषधस्य एतन्नाम।...'बहुशः गुम्फितव्यम्' बहुसंख्यकानि मालायां सन्निवेशयितव्यम् [तथा सति पद्मावती अविधवा भविष्यति, ततोऽहमपि

अविधवा भविष्यामि इत्याशयः] [ततोऽपरं प्रदश्य पृच्छति] 'इदं' तावदित्यादि। 'सपत्नीमर्द्दनम्' मालायां घृते तस्मिन् औषधं नारी सपत्नीं पराजेतुं शक्नोति इत्यस्य तन्नाम इति बोद्धव्यम्।

Notes.

वर्ज्जयित्वा – वृज् + णिच् + क्त्वा। The root वृज् (चुरादि) with णिच् is used in the sense of 'leaving out', but here it has been used in the sense of आ – वृज् + णिच् i. e. to lower down [i. e. वर्ज्जयित्वा = आवर्ज्य]। cf. 'हविरावर्ज्जितं होतस्त्वया विधिवदग्निषु'—रघुवंश।

औषधम्—ओषधि means 'herb.' ओषधि रेव इति औषधम्। ओषधि + अण्—स्वार्थे by the rule 'ओषधेः अजातौ'।

अविधवाकरणम्—करोति इति करणम्, कृ + ल्युट्—कर्त्तरि, बाहुलकात्। विगतः धवः (= पति) यस्याः सा विधवा – बहुव्रीहिः, न विधवा—नञ्तत्, तस्याः करणम् (i. e. कारकम्)—६तत्।

मम—शेषे ६ष्ठी (with कृते understood).

सपत्नी-मर्द्दनम्—मर्द्दयति इति मर्द्दनम्। मृद + णिच् ल्यु – कर्त्तरि। सपत्न्याः करणम्—६तत्।

Remarks.—Vasavadatta longs for a long life of her husband, though he was going to marry another wife but at the same time she cannot suffer herself to be surpassed by a co-wife.

Page 61. इदं च गुम्फितव्यं etc.

Sans. Expl.—'उपरता' मृता 'तस्य भार्य्या' उदयनस्य वासवदत्तानाम्नी या महिषी, 'तत्' तस्मात् 'निष्प्रयोजनम्' निरर्थकम् सपत्नीमर्द्दनाख्यस्य औषधस्य गुम्फनमिति शेषः।...'एष जामाता', 'अविधवाभिः' जीवद्भर्त्तृकाभिः [विवाहे सधवानामेव आचारात् माङ्गल्यकार्य्येषु उपयोगिता विद्यते] 'अभ्यन्तरचतुःशालम्' अन्तपुरमध्यवर्त्ति प्राङ्गणं 'प्रवेश्यते' नीयते [अतः अविलम्बेनैव मालया प्रयोजनं वर्त्तते]। 'गृहाण एतत्' मालाग्रहणं समाप्तमेव इति उक्त्वा चेटीहस्ते ददाति।

Notes.

उपरता—उप—रम + क्त – कर्त्तरि, स्त्रियाम् आप्।

निष्प्रयोजनम्—Adj. to औषधम् [सपत्नीमर्द्दनम्]। नास्ति प्रयोजनं यस्य तत् – बहुव्रीहिः।

जामाता—Obj. of प्रवेश्यते by the rule 'गति-बुद्धि etc.'

अभ्यन्तरचतुःशालम्—अभ्यन्तरस्य चतुःशालम्—इतत् ।

प्रवेश्यते—प्र – विश + णिच्—कर्मणि, लट ते ।

Rhetoric.—In उवरदा तत्र etc. there is the dramatic peculiarity called अधिबल । '—अधिबलमभिसन्धिश्छलेन यः' ।

Paga 62. सोहण' etc.

Sans. Expl.—'शोभनम्' सुन्दरम् माल्यमिति शेषः ।·· 'उभे' चेव्यौ इत्यर्थः ।' 'गता एषा' चेटी अभ्यन्तर-चतुःशाल' गता इत्यर्थः [अतः एकाकिनी वासवदत्ता आत्म-दुःखचिन्तावसरं लभते इति बोद्धव्यम्] ।...'आर्य्यपुत्रः अपि नाम' मम पतिरपि एवं 'परकीयः' अन्यदीयः, अपरस्याः नार्य्याः पतिरित्यर्थः 'सं वृत्तः' जातः । 'आवदा' विषादे अव्ययम् । 'शय्यायां' शयनीये 'मम दुःखं विनोदयामि' मम क्लेशम् उपशमयामि, 'यदि निद्रां लभे' शयिताया मे निद्रागमात् क्लेशोपशमः स्यादित्याशंसे इत्यर्थः ॥

Notes.

परकीयः—परस्य अयम् इति परकीयः । पर+छ (=ईय) with the augment कुक् by the rule 'कुक् जनस्य परस्य च' ।

अविदा—अव्यय in the sense of 'Alas !' This word is generally found in Prakrit—probably a corruption from अविद्धा ।

यदि—This need not be taken to mean strictly 'if'. The second sentence beginning with यदि does not mention a condition to the first, but is only a repetition of the same ; cf. Bengali—দেখি যদি ঘুমাইতে পারি ।

Rhetoric.—In अहो अत्याहितम् etc. there is the नाट्यालङ्कार named आक्रन्द । '—आक्रन्दः प्रलपितं शुचा'—साहित्यदर्पण ।

Remarks.—N. B. The maid takes leave of Vasavadatta to attend the marriage festivity of Padmavati, but does not request her to go there, because she knew that Avantika would be the last person to resort to a crowded place.

End of Act III.

Act IV

Sans. Expl.—'भोः' इति 'दिष्ट्या' भाग्येन 'तत्रभवतः' पूज्यस्य 'वत्सराजस्य' "अभिप्रेत-विवाहमङ्गलरमणीयः' ईप्सितेन विवाहरूपेण मङ्गल्योत्सवेन प्रीतिप्रदः 'कालः दृष्टः' समयः लब्धः, मयेति शेषः। 'भोः! को नाम एतद् जानाति' मम स्वप्नेऽपि' अगोचरः आसीत् इत्यर्थः।...'अनर्थ-सलिलावर्त्ते' विपद्रूपायां जलभ्रम्यां वासवदत्ता-विरहशोक-संघटितायाम् 'उन्मज्जितास्मः' विपत्सलिलात् उद्धारं लभामहे। 'इदानीम् इत्यादिना राज्ञः पुनर्दारग्रहणात् साम्प्रतिकं सुखं वर्णयति। 'प्रासादेषु उष्यते' पूर्ववत् न यत्र तत्र इत्यर्थः, 'अन्तःपुर-दीर्घिकासु' राजान्तःपुरस्थितासु वापीषु 'स्नायते' स्नानं क्रियते, 'प्रकृति-मधुर-सुकुमाराणि' स्वभावतः मिष्टानि कोमलानि च 'मोदकखाद्यानि' लड्डुकादिसुभोज्यानि।...'अनप्सरःसंवासः' अप्सरसाम् अवस्थानेन हीनः 'उत्तरकुरु-वासः' स्वर्गवासः...। 'महान् दोषः' विषमोऽनिष्टपातः...'सुष्ठु न परिणमति' सम्यक् परिपाकं न गच्छति, 'सुप्रच्छदनायां शय्यायां' कोमलास्तरणविशिष्टे शयने [अपि]... 'यथा' यस्मात् 'वातशोणितम्' वातरक्तव्याधिः 'अभितः इव वर्त्तते' सर्व्वशरीरम् आक्रम्य तिष्ठतीव 'इति पश्यामि' इति मन्ये। 'भोः' अहो! 'सुलभं न' सुखहेतुनं भवति 'आमयपरिभूतम्' रोगाभिभवः 'अकल्यवर्त्तं च' तत्सहकारि सुभक्ष्यप्राचुर्य्यं च [देहे यदि रोगो वर्त्तते तदा सुखाद्यानां प्राचुर्य्यमपि सुखाय न कल्पते, प्रत्युत दुःखायैव इत्यर्थः]।

Notes. Page 63.

विदूषकः—The jester. A विदूषक has been defined thus :—'कुसुम-वसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः। हासकरः कलहरतिर्विदूषकः स्यात् स्वकर्म्मज्ञः॥ सा. द.। [स्वकर्म्मज्ञः=भोजनादिपटुः]। The विदूषक plays the part of a buffoon, exciting humour and laughter by his actions, movements of the body, dress and speech. 'विकृताङ्गवचोवेषैर्हास्यकारी विदूषकः'—दशरूपक। He is always an ease-loving fellow who cares only for his belly. For his murmuring character, cf. *Sakuntala*. Act II.

अभिप्रेत-विवाहमङ्गल etc. —विवाह एव मङ्गलम्—कर्म्मधारयः, अभिप्रेतं विवाहमङ्गलम्—कर्म्मधारयः, तेन रमणीयः—३तत्। अभि—प्र—इ+क्त—कर्म्मणि= अभिप्रेत। रम+णिच्+अनीय—बाहुलकात् कर्त्तरि।

अनर्थसलिलावर्त्ते—अधिकरणे ७मी। सलिलस्य आवर्त्तः—६तत्, अनर्थ एव सलिलावर्त्तः—कर्म्मधारयः। 'स्यादावर्त्तोऽम्भसां भ्रमः—अमरः। The अनर्थ is the calamity suffered by the king (and thereby his friends and attendants) for the loss of *Vasavadatta*.

उन्मङ्क्ष्याम:—उत्—मस ज + लृट्, स्याम: । लृट has been used in the sense of अनवक्लृप्ति (i. e. improbability) by the rule 'अनवक्लृप्त्यमर्षयो: अ-किंवृत्ते ऽपि' ।

इदानीम् etc,—The present pleasures reminded the jester of the great sufferings experienced before. इदानीम् means 'after the king's marriage with Padm*a*vat*i*.' इदम्+दानीम् for ७मी by the rule 'दानीं च' ।

प्रासादेषु—अधिकरणे ७मी । प्र – सद् + घञ् – अधिकरणे । प्र is lengthened by the rule 'उपसर्गस्य घञि अमनुष्ये बहुलम्' ।

उष्यते – वस + भाववाच्ये लट्, ते । Nom — मया ।

अन्त:पुर-दीर्घिकासु—अन्त:पुरस्य दीर्घिका:—६तत् ; तासु ।

प्रकृतिमधुर etc.—मधुराणि च तानि सुकुमाराणि—कर्मधारय:, प्रकृत्या मधुर-सुकुमाराणि—३तत् (or सहसुपा) ।

मोदकखाद्यानि—उक्ते कर्मणि १मा । मोदका: एव खाद्यानि--कर्मधारय: ।

अनप्सर:संवास:—Adj. to उत्तरकुरुवास: । अप्सरसां संवास:—६तत्, अविद्यमान: अप्सर:संवास: यत्र स:—बहुव्रीहि: । For the mode of expression, cf. 'द्यूतं हि नाम पुरुषस्य असिंहासनं राज्यम्'—मृच्छकटिक । Similar expressions abound in K*a*dambar*i* also.

अद्भ्य: सरन्ति (=उद्गच्छन्ति) इति अप्सरस: ; अप् + सृ + असि (औणादिक:) । Except when referring to a single अप्सरस् the word is always plural (even when denoting the जाति) । 'आप: सुमनसो वर्षा अप्सर:-सिकता-समा: । एतेस्त्रियां बहुत्वे स्यु रेकत्वे ऽप्युत्तरत्रयम्' । For the singular use cf. 'मेनका नाम अप्सरा: प्रेषिता' – *S*ak., Act I ; 'गच्छन्तं चाप्सरा: प्रीत्या समुवाच तिलोत्तमा'—कथासरित्सागर: ।

उत्तरकुरुवास:—Obj. of अनुभूयते । कुरूणां निवासो जनपद: इति कुरव: ; कुरु+अण् ; the अण् is elided by the rule 'जनपदे लुप्' । The word is then used in plural by the rule 'लुपि युक्तवद् व्यक्ति-वचने' । उत्तरा: कुरव:—कर्मधारय: by the rule 'दिक्संख्ये संज्ञायाम्' ; तेषु वास:—७तत् ।

उत्तरकुरु is probably the same as North Siberia which is in the northernmost part of the globe and beyond which there is practically no human habitation. While instructing the monkey-chiefs regarding the search for S*i*t*a*, Sugr*i*va said as follows :—

न कथञ्चन गन्तव्यं कुरूणामुत्तरेण वः ।
अभास्करम् अमर्यादं न जानीमस्ततः परम् ॥—Ramayana. किष्किन्धा, ४३ ।

Also cf. Mallinatha's note on Kirata 1. 35— 'उत्तरान् कुरून् मेरोः उत्तरान् जनपदान् देशविशेषान्' । This मेरु is Mt. Meru (which is to be identified with the modern Altai, in the north-west of Mongolia) and should not be confused with सुमेरु or the North Pole. For the different divisions (वर्ष) of the globe, see भागवत V. 16. The Kuru-land is described as the abode of gods and a country of beauty, peace and happiness and is perhaps the same as स्वर्ग । It has been alluded to in the Aitareya Brahmana, Mahabharata, Ramayana and the Puranas.

परिणमति—परि—नम + लट् ति । परि—नम is here used in the sense of 'being digested'. णत्व is by the rule 'उपसर्गादसमासेऽपि णोपदेशस्य' ; [similarly—प्रणमति] ।

सुप्रच्छदनायाम्—प्र – छद + ल्युट्—करणे = प्रच्छदनम् ; a bed-sheet. सु प्रच्छदनं यस्याः—बहुव्रीहिः, तस्याम् ।

यथा—The word here denotes अनुमान । 'यथाशब्दस्तु निर्दिष्टे त्वनुल्ययोगा-नुमानयोः'—विश्वः ।

वातशोणितम्—Nom. of वर्त्तते । Name of a kind of gout caused by a derangement of the blood and wind in the body. वातयुक्तं शोणितम्—कर्मधारयः ; then by लक्षणा, the disease. This disease is mainly caused by indigestion due to injudicious diet and conduct, and men of the विदूषक-type are generally the victims.—

प्रायशः सुकुमाराणां मिथ्याहार-विहारिणाम् ।
स्थूलानां सुखिनां वापि कुप्यते वातशोणितम् ॥

आमय-परिभूतम्—Nom. of भवति understood. परि—भू + क्त—भावे = परिभूतम् (= परिभवः) । आमयस्य परिभूतम्—६तत् ।

अकाल्यवर्त्तम्—काल्य means 'morning'. 'प्रत्यूषोऽहर्मुखं काल्यम् उषः-प्रत्युषसी अपि'—इत्यमरः । (i) काल्यस्य वर्त्तः—६तत् ; a small quantity of food for breakfast. नास्ति काल्यवर्त्तः यत्र तत्—बहुव्रीहिः ; not of a small (i. e. of a *sufficient*) quantity of food. Or, (ii) the word is an adj. to आमयपरिभूतम्—an attack of disease in which even the breakfast or a little quantity of food is forbidden. Or, (iii)

कल्यवर्तम् (neuter) means 'a trifle'; cf. 'ननु कल्यवर्तमेतत्'—मृच्छकटिक। 'स्त्रीकल्यवर्तस्य कारणेन'—*Ibid.* न कल्यवर्तम्—not a trifle, i. e. a sufficient quantity of food.

Rhetoric.—In इदानीं प्रासादेषु etc. there is the dramatic peculiarity called दिष्ट। 'देशकाल-स्वरूपेण वर्णना दिष्टमुच्यते''—सा. द.।

Pages 64-65.

Sans. Expl.—'कुत्र न खलु' इत्यादिना चेट्या वसन्तकस्यान्वेषणम् उच्यते। 'कः कालः, त्वाम् अन्विष्यामि' बहुकालं यावत् तव अन्वेषणपरा अस्मि इत्यर्थः।... 'भट्टिनी भणति' भर्त्री दर्शकमहिषी पृच्छति इत्यर्थः...'स्नातः जामाता' वत्सराजस्य स्नानं समापितं न वा इति प्रश्नः।

Notes.

कः कालः—Nom. of अतिक्रान्तः understood.

अपि स्नातः &c.—अपि here denotes प्रश्न। 'गर्हासमुच्चय-प्रश्न-शङ्का-सम्भावनास्वपि'...अमरः। स्नातः—स्ना+क्त—कर्तरि। Here जामाता means the bride-groom [*not* a son-in-law].

Remarks.—अपि स्नातः etc. indicates the affectionate manner of the king and the queen (or, rather all of the royal family) of Maghadha with which Udayana and his party were received.

Pages 66—67.

Sans Expl.—किं निमित्तम् etc.—'किं निमित्त'' केन प्रयोजनेन. 'भवति' मान्ये [चेट्याः सम्बोधनम् एतत्] 'पृच्छति' भट्टिनीति शेषः। 'सुमनोवर्णकम्' 'सुमनांसि' पुष्पाणि 'वर्णकानि' अङ्गरागाः च इति सुमनोवर्णकम् 'आनयामि' जामातुराराधनार्थम् उपहरामि...। 'वर्जयित्वा भोजनम्' भक्ष्याद् अन्यत् इत्यर्थः।... 'वारयसि भोजनम्' भक्षाद्रव्यस्य आनयनं निषेधसि इत्यर्थः। 'अधन्यस्य' दुर्भागस्य 'मम कोकिलानाम्' परभृतानाम् 'अक्षिपरिवर्तः इव' चक्षुरागविकृतिः इव 'कुक्षि-परिवर्तः' उदरावस्थाविकृतिः 'संजातः' संघटितः [यथा वसन्ते नानाविध-पुष्पासव-पानेन कोकिलानां नयनानि रक्तानि जायन्ते, तथैव दुरदृष्टवशात् प्रभूतान्नपानादिना मे कुक्षिविक्षोभः जातः इत्यर्थः]। 'ईदृश एव' कुक्षिपीडायस्त एव इत्यर्थः [सोल्लुण्ठ-वचनमेतदिति बोद्धव्यम्]...। 'तत्रभवतः सकाश'' राज्ञ उदयनस्य समीपमित्यर्थः।

Notes.

भवति—सम्बोधन। The maid is so addressed. 'वदेत् राज्ञीव चेटीश्च भवतीति विदूषकः'—साहित्यदर्पण।

पृच्छति—The Nom. is भट्टिनी।

सुमनोवर्णकम्—सुमनांसि च वर्णकानि च—समाहार-द्वन्द्वः।

वर्जयित्वा भोजनम्—वृज + णिच् + क्त्वा। The विदूषक being generally सकर्मंज्ञ i. e भोजनपट्, these words sound strange to the spectators and are enjoyed by them.

अधन्यस्य—धनम् लब्धा (i. e. लप्स्यते) इति धन्यः, धन + यत् by the rule 'धनगणं लब्धा'। न धन्यः—नञ् तत्, तस्य। [लब्धा = लभ् + तृन्]।

अक्षि-परिवर्त्त:—परि— वृत + घञ्—भावे = परिवर्त्त: ; a change. अक्ष्णोः परिवर्त्त:—६तत्। The cuckoos get the colour of their eyes changed (red) in the spring, when they are intoxicated with the honey of different flowers. Or, it may be that the jester is thinking of the crow which has only one eye-ball which revolves both sides according to reqnirements To make such a confusion is characteristic of his conduct.

कुक्षिपरिवर्त्त:—कुक्षे: परिवर्त्त:—६तत्। By the comparison with the अक्षिपरिवर्त्त he means to say that such disorder of bowels is natural to him, when he gets an abundance of food.

ईदृश एव भव—This is said in jest.

प्रवेशक:—See *Ante*, in the beginning of Act III. This inter-lude indicated that the king's marriage with Padm*a*vat*i* is already celebrated, for which the preparations have been described in the previous Act. Thus it prepares us for hearing of the mental condition of the king from the mouth of Padm*a*vit*i* and for seeing the union of the two as will be described in the next Act.

Pages 68—69.

Sans. Expl.—ततः प्रविशतीत्यादि। 'सपरिवारा' चेटीसहिता...'आवन्तिका-वेशधारिणी' अवन्तीदेशीय-नारीपरिच्छदधारिणी...। 'भर्तृदारिका' राजपुत्री भवती पद्मावती इत्यर्थः 'प्रमदवनम्' उद्यानम्। [कामान्तरम् अभ्यन्तरचतुःशालं गतं पतिं विहाय तस्याः उद्यानागमनकारणं पृच्छति इति बोद्धव्यम्]...'शेफालिकागुल्मकाः' तन्नामपुष्पवृक्षसमूहाः 'कुसुमिताः' समुद्गतपुष्पाः...'प्रवालान्तरितैः' विद्रुमसच्छवत्तिभिः 'मौक्तिकलम्बकैः इव' मुक्ताफलगुच्छैः इव 'आचिताः' आच्छन्नाः व्याप्ता इति यावत् 'कुसुमैः' पुष्पैः। 'किम् इदानीं विलम्बसि' अविलम्बितमेव कथं पुष्पाणि न चिनोषि इत्यर्थः।...'शिलापट्टके' प्रस्तरखण्डके 'मुहूर्त्तकम्' अल्पम्...'कुसुमावचयं' पुष्पसंग्रहणम्

... । 'किमत्र उपविशाव:' अत्रोपवेशनं भवत्यै रोचते न वा इति प्रश्न: । 'एवं भवतु' अत्र उपविशाव: इत्यर्थ: ।...

Notes.

किं निमित्तम् etc.—The maid expected the princess in the inner apartment where the husband would come after taking his bath.

अभ्यन्तर-चतु:शालम्—चतसृषु दिक्षु शाला: (गृहाणि) यस्य तत्—बहुव्रीहि:, अभ्यन्तरे चतु:शालम्—७तत् ।

शेफालिका-गुल्मका:—Nom. of भवति understood. गुल्मा: एव गुल्मका:, गुल्म + कन्—स्वार्थे । शेफालिकानां गुल्मका:—६तत् । Technically speaking, शेफालिका is neither a गुच्छ nor a गुल्म but a plant of the वृक्ष class. (For the different classes, see Manu I. 4.—43).

पश्यामि—The object is इति । वर्त्तमानसामीप्ये लट् ।

कुसुमिता: —कुसुमानि जातानि एषाम् इति कुसुम + इतच् by the rule 'तदस्य सञ्जातं तारकादिभ्य इतच्' ।

प्रवालान्तरितै:—प्रवालै: अन्तरिता:—३तत्, तै: । 'प्रवालो वल्लकीदण्डे विद्रुमे बालपल्लवे'—विश्व: ।

मौक्तिकलम्बकै:—उपमान to the अनुक्तकर्त्तृ—'कुसुमै:' । मुक्ता एव मौक्तिकम्, मुक्ता + ठक्—स्वार्थे by the rule 'विनयादिभ्यष्ठक्' । मौक्तिकानां लम्बका:—६तत्, । तै: ।

आचिता:—Adj. to ते । आ—चि + क्त...कर्मणि ।

शिलापट्टके – शिलाया: पट्टक: —६तत्, तस्मिन् ।

मुहूर्त्तम्—व्याप्तौ २या by the rule 'कालाध्वनोरत्यन्तसंयोगे' ।

कुसुमावचयम्—अव—चि + अच्—भावे = अवचय: । कुसुमानाम् अवचय:—६तत्, तम् । *N. B.* When the flowers are within the reach of the hand and are not had by stealth, the affix to be used is घञ् giving the form अवचाय ।'The rule is—'हस्तादाने चे: अस्तेये' । Otherwise. the form is अवचय with अच् (by the rule 'एरच्') ।

अर्थ्ये किं एत्य etc.—With these words Padmavati wishes to take the permission of *Avantika*. Padmavati's sincere devotion to *Avantika* is also indicated here.

Pages 69—71.

Sans. Expl.—...'अर्द्धमन:शिलापट्टकै: इव' अर्द्ध: अंशविशेष: मन:-

शिलापट्टक: मन:शिलावत् पीतवर्णाकृति: 'पट्टका:' आसन' येषां तै:, इव,...'अञ्जलिम्' युक्तकरमध्यभागम्। 'अहो' विस्मये। 'विचित्रता' सौन्दर्यम्।......'मा मा भूय: अवचित्य' अलं पुनरपि पुष्पावचयेन इत्यर्थ:, 'वारयसि' निषेधसि। 'आर्यपुत्र:' दयित: 'इह आगत्य' अस्मिन् प्रमदवने प्रविश्य 'इमां कुसुमसमृद्धिं दृष्टा' इमं पुष्पराशिम् अवलोक्य, यदा स: अवलोकयिष्यति इत्यर्थ: [तदा] 'सम्मानिता भवेयम्' समादृता भवेयम्'

Notes

अर्धमन:शिलापट्टकै:—मन:शिला (धातुविशेष:—'मनछाल' in Bengali) is a mineral (viz. arsenic) of a reddish yellow colour. मन:शिलाया: पट्टका:—इतत् ; अर्धै: मन:शिलापट्टका: येषाम्—बहुव्रीहि:, तै:।

पूरितम्—पूर (दिवादि) + णिच् (चुरादि) + क्त—कर्मणि। Alt. form.—पूर्णम्। Rule—'वा दान्त-शान्त &c.' 'पूर्णस्तु पूरिते'—अमर:।

अवचित्य—अव—चि + ल्यप्। Here ल्यप् has been used in connection with 'मा'। This use of ल्यप् (or क्त्वा) with मा is not supported by Panini and perhaps points to an earliar date of the poet when क्त्वा or ल्यप् was used with all such particles of prohibition and at the time of Panini came to be restricted in connection with अलम् and खलु only for which Panini's rule is 'अलंखल्वो: प्रतिषेधयो: प्राचां क्त्वा'।

कुसुमसमृद्धिम्—कुसुमानां समृद्धि:—इतत्, ताम्।

अय्यउत्तो इह आगच्छिअ etc.—The Nom. of the incomplete verbs आगत्य and दृष्टा, being not the same with the finite verb the construction is faulty. This also points to an earlier date of the poet. See the other reading given in the foot note—P. 71.

सम्मानिता—सम्—मन + णिच् + क्त—कर्मणि।

भवेयम्—लिङ् here denotes प्रार्थना।

Rhetoric.— अय्यउत्तो इह आगच्छिअ etc.—Here the conversation about the *Sephalikā* flowers comes to an end and a fresh topic of conversation is introduced to reveal Udayana's love for *Vasavadatta* even after his marriage with Padm*a*vat*i*. Hence the dramatic peculiarity here is बिन्दु। 'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्'—साहित्यदर्पणे।

Pages 71—73

Sans. Expl.—'हला' सम्बोधनार्थमव्ययम्, 'प्रियः ते भर्त्ता अपि प्रणयात्पदं तव पतिरिति प्रश्नः !...'आर्य्यपुत्रेण विरहिता' भर्त्रा विच्छिन्ना 'उत्कण्ठिता' उद्विग्ना:... 'दुष्करं करोमि' पतिविरहितापि स्थातुं शक्नोमि इत्येतत् अनन्यसाध्यम् इत्यर्थः [अतः] 'इयम् अपि' पत्यु स्वल्पकालं लब्धपरिचया अपि। पद्मावती 'नाम' वितर्के 'एवं मन्त्रयति' आर्य्यपुत्रेण विरहिता उत्कण्ठिता भवामीति वदति। 'अभिजातम्' सर्वदग्धाम् 'सन्देहः' संशयः प्रतिविषयकः...'तथा एव आर्य्यायाः वासवदत्तायाः' प्रियः आर्य्यपुत्रः इति शेषः। 'अतः अपि' यथा तव ततोऽपि अधिकतरं वासवदत्तायाः प्रियः इत्यर्थः। ...'हम्' प्रकृतार्थ-निद्धारणसूचकम् अव्ययम् आर्य्यपुत्रपक्षपातेन' आर्य्यपुत्रे प्रणयस्य प्रकटनेन 'अतिक्रान्तः' लङ्घितः 'समुदाचारः' देशकालानुयायी व्यवहारः। 'एवं तावत्' अनेन प्रकारेण 'भणिष्यामि' कथयिष्यामि, समुचितार्थ-गोपनार्थम् इति शेषः।—'अल्पः स्नेहः' अनधिकः प्रणयः आर्य्यपुत्रे भवेत्...'स्वजनं' पित्रादिकं न परित्यजति' त्यक्त्वा स्वामिनम् न अनुगच्छति।

Notes.

हला ! मा मा भूयः &c. हला is an—अव्यय। A lady of the same rank or position is addressed with this term 'हलेति सदृशी [वाच्या]'—साहित्यदर्पण। Padmavati uses 'हला' to address the maid out of courtesy only.

प्रियः—प्री+क—कर्त्तरि by the rule 'इगुपध-ज्ञा-प्री-किरः कः'।

विरहिता—Adj. to अहम्। वि—रह+क्त—कर्म्मणि। Nom.—आर्य्यपुत्रेण।

उत्कण्ठिता—उत्कण्ठा जाता अस्याः इति उत्कण्ठा+इतच्।

दुष्करम्—दुस्—कृ+खल्—कर्म्मणि। Cf. the sentiment expressed by शकुन्तला in Act IV—*Sak*.

अभिजातम्—Adverb, modifying मन्त्रितम्। अभि—जन+क्त—कर्त्तरि 'अभिजातः कुलीने स्यान्न्याय्य-पण्डितयोरपि'—मेदिनी।

किं किम्—Repeated to indicate an excess of eagerness

"विवादे विस्मये हर्षे खेदे दैन्येऽवधारणे।
प्रसादने सम्भ्रमे च द्विस्त्रिरुक्तं न दुष्यति"॥

अतः—५मी in connection with अधिक on the authority of the use ५मी by Panini in the rule 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी'।

इम्—A particle expressive of the comprehension of one's own situation.

आर्य्यपुत्र- पक्षपातेन—इतो श्यां। पक्षे पातः—७तत्, आर्य्यपुत्रे पक्षपातः—७तत्; तेन।

अतिक्रान्तः—अति - क्रम—क्त—कर्म्मणि। Nom.—मया understood.

समुदाचारः—Obj. of अतिक्रान्तः। सम् - उत् - आ - चर् + घञ्—भावे।

स्वजनम्—स्वः जनः—कर्म्मधारयः, तम्। स्वजनं न परित्यजति—refers to her elopement with Udayana.

Rhetoric. In 'हला! पिओ दे भत्ता' there is the dramatic peculiarity called परिभावना। 'कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना।'—साहित्यदर्पण। In 'अय्यउत्ते ण विरहिदा उक्कण्ठिदा होमि' there is the dramatic peculiarity called निर्णय। ....'निर्णयः पुनः। अनुभूतार्थकथनम्'—साहित्यदर्पण। Also, the dr. peculiarity called मार्ग। 'तत्त्वार्थकथनं मार्गः'—साहित्यदर्पण। In जह मम अय्यउत्तो etc. there is रूपम्। 'रूपं वाक्यं वितर्कवत्'—साहित्यदर्पण।

Pages. 74—75

Sans. Expl.—'भवितव्यम् युज्यते इत्यर्थः।—'साधु भर्त्तारं भण' मधुरभावेन पतिं कथय··· 'वीणां शिक्षिष्ये', वीणावादन-शिक्षां ग्रहीष्यामि [वीणाशिक्षया वासवदत्ता तस्य प्रेयसी अभूदिति मत्वा चेटी एवम् उपदिशति इति बोद्धव्यम्]।...'अभणित्वा किञ्चित्' किमपि न उक्त्वा। 'दीर्घं निःश्वस्य' दीर्घनिःश्वासं शोकवशात् मुक्त्वा 'तूष्णीकः' निर्व्वाक् 'संवृत्तः' तस्थौ इत्यर्थः। 'ततः' पश्चात्: दीर्घनिःश्वासात् तूष्णीम् अवस्थानात् च...'तर्कयसि' अनुमन्यसे?...'दक्षिणतया' अनुकूलत्वहेतुना 'मम अग्रतः' मत्समक्षम् ...'धन्या' सौभाग्यशालिनी, अधुनापि स्वामी मां स्मरतीति...'एवं सत्यं भवेत्' पद्मावत्याः वाक्यं मृषा न भवेत्...'ह्री ह्री' आनन्दसूचको ध्वनिः 'प्रचितपतित-बन्धुजीवकुसुम-विरलपातरमणीयम्' 'प्रचिते' चयनकाले पतितानि यानि बन्धुजीवाख्यानि रक्तपुष्पाणि तेषां 'विरलपातेन' अल्पशः पतनेन 'रमणीयं' सुन्दरं 'प्रमदवनम्' क्रीड़ोद्यानम्। 'इतः तावत्' अस्मिन् स्थाने, आगच्छतु इति शेषः।

Notes.

भवितव्यम्—भू + तव्य—भावे। Padmavati accepts the argument given by Vasavadatta.

साधु—Adverb.

शिक्षिष्ये—शिक्ष + लृट् स्ये। शिक्ष to learn, शिक्षते। Cf. 'अशिक्षितानां'

पितुरिव मन्यवत्'—रघु। *Vasavadatta* could win the heart of Udayana by her skill in playing on the lute ; so, the maid advises Padma. to learn the same art.

अभविला—नञ्—भव+क्ता।

दीर्घं निश्वस्य—दीर्घं is an adverb. निस्—श्वस्+ल्यप्। The mention of ths reminds him of *Vasava.* ; so he heaved a sigh in sorrow.

तूष्णीकः—Adj. to भर्त्ता। तूष्णीम्+क। See Notes on तूष्णीका—page 64.

दक्षिणतया—इतौ श्या। The नायक who loves all the नायिकाs equally is called a दक्षिणनायक। "एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः"—साहित्यदर्पण। [एषु=Among the sixteen kinds of नायक]।

धन्या—Adj. to अहम्। धन+यत् in the sense of लब्धा See *Ante.*

प्रचितपतित etc.—प्र—चि+क्त—भावे=प्रचितम् (=प्रचयनम्—plucking of flowers). बन्धुजीव—a kind of red flower also called बन्धुली ; *Pentapetes phœnicia.* रम+णिच्+अनीय—कर्त्तरि बाहुलकात्=रमणीयम्। प्रचिते पतितानि—७तत्, तादृशानि बन्धुजोवकुसुमानि—कर्म्मधारयः। विरलं पातः—सह्सुपा ; प्रचितपतितबन्धुजीवकुसुमानां विरलपातः—६तत्, तेन रमणीयम्—३तत्। The reading विरलवात (instead of विरलपात) will mean 'gentle breeze.' In Sanskrit poetry whenever the wind is referred to, there is often a reference to the three qualities. viz, मान्द्य, शैत्य and सौगन्ध्य।

Rhetoric.—In साहु भद्दार अणाहि etc., there is the नाट्यालङ्कार called उपदेशन। 'शिक्षा स्यादुपदेशनम्'—साहित्यदर्पण। In तक्केमि etc. there is युक्ति। 'युक्तिः केनचिदंशेन किंचिद् यत्रानुमीयते'—साहित्यदर्पण। Also the dr. peculiarity named अनुमान। 'लिङ्गादूहोऽनुमानता'—साहित्यदर्पण।

Page 76. (Sloka 1.)

Sans. Expl.—'मयि उज्जयिनीं गते' हृतिमहस्तिप्रयोगेण उज्जयिनीराजेन धृतोऽहं' यदा तत्र गतः, 'तदा' 'स्वैरम्' स्वच्छन्दम् 'अवन्तिराज-तनयाम्' अवन्तिराजस्य प्रद्योतस्य कन्यां वासवदत्ताम् इत्यर्थः 'दृष्ट्वा' आलोक्य 'कामपि अवस्थां गते' अनिर्व्वचनीयां दशां प्राप्ते 'कामिनि' मदनेन 'पञ्च इषवः' पञ्चबाणाः 'पातिताः' निक्षिप्ताः [पञ्चेषोः सर्व्वेषाम् एव इषूणां पातात् वासवदत्तायां मम पूर्वानुरागो जात इत्यर्थः]।

'तैः' पञ्चभिरपि-बाणैः 'अद्यापि' अधुना अपि 'हृदयं' मदीयमिति शेषः 'सशल्यम् एव' शङ्कुयुक्तम् एव [अतः न ते बाणाः मदनेन मम हृदयात् पुनरुद्धृताः, नापि च मम अनुरागः ह्रासं प्राप्तः]। 'भूयश्च वयं विद्धाः' पुनरपि अस्मासु मदनबाणः प्रयुक्तः, [पद्मावत्याम् अनुराग-सञ्चारादिति बोद्धव्यम्]। 'यदा मदनः' 'पञ्चेषुः' पञ्चबाणः [तद्व्यतिरिक्त-बाणाभावात्] 'कथ' केन उपायेन 'अयं षष्ठः शरः' पञ्चभ्यः अन्योऽपि अधिको बाणः 'पातितः' मयि प्रयुक्तः [यत्प्रभावात् पद्मावत्याम् अनुरागः जायते] ? ॥१॥

Notes

मयि—अधिकरणे ७मी।

स्वैरम्—Adverb, modifying दृष्टा See Notes on स्वैरम्—page 26.

अवन्तिराजतनयाम्—अवन्तीनां राजा—६तत्, तस्य तनया—६तत्, ताम्। अवन्ति is spelt both short इ and long ई।

सशल्यम्—Adj. to हृदयम्। शल्येन सह वर्त्तमानम्—बहुव्रीहिः। सह is changed into स optionally in बहुव्रीहि-समास by the rule 'वोपसर्ज्जनस्य'।

वयम्—Plural used for the singular, by the rule 'अस्मदो द्वयोश्च'।

विद्धाः—व्यध + क्त—कर्म्मणि। व्यध—to pierce. (दिवादि) —विध्यति; विव्याध, विविधतुः, etc. ; व्यत्स्यति, अव्यात्सीत्।

पञ्चेषुः—पञ्च इषवः यस्य सः—बहुव्रीहिः। An epithet of मदन, the god of love (corresponding to Cupid of the Roman mythology). 'कामः पञ्चशरः स्मरः'—अमरः। The 5 arrows of मदन are the following :—

अरविन्दमशोकञ्च चूतञ्च नवमल्लिका।
नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः॥

From a different stand-point the five arrrows are—

उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा।
सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्त्तिताः॥

पातितः—पत + णिच् + क्त—कर्म्मणि। Nom.—मदनेन।

Rhetoric.—मदन having five arrows only, cannot have a sixth arrow. Hence the fig. of speech is अतिशयोक्ति having असम्बन्धे सम्बन्धः।

Metre.— शार्द्दूलविक्रीडित। See Sl. 3, Act I.

Ch. of Voice.—···बाण: पञ्च इषून् पातितवान्।......हृदयेन सम्मोहन [भूयते]......अश्वान् विद्धवान् [काम:]......मदनेन पञ्च वृथा [भूयते]. इमं षष्ठं शरं पातितवान् [स:]?

Page 77.

Sans. Expl.—कुत्र नु इत्यादि। 'तत्रभवती' मान्या···'लतामण्डपं' प्रमदवनस्थितं लतागृहम्···'उताहो' अथवा 'असनकुसुमसञ्चितं' बन्धूकपुष्पाकीर्णं 'व्याघ्रचर्म्मावगुण्ठितमिव शार्द्दूलचर्म्मणा आच्छादितम् इव 'पर्व्वततिलकं नाम' शिलापट्टकं' प्रस्तरासनम्······'अधिक-कटुक-गन्ध-सप्तच्छदवनम्' अत्युग्रगन्धयुक्तं सप्तपर्णवनम्······ 'आलिखित-मृगपक्षि सङ्कुलम्'—'आलिखिता:' चित्रिता: ये मृगपक्षिण: पशुपक्षिण:, तच्चित्राणि इत्यर्थ:, तै:व्याप्तम् 'दारुपर्व्वतकं' पर्व्वताकृति काष्ठगृहम्··· [अनिश्चितत्वात् सम्भाव्यस्थानानि उल्लिख्यन्ते]। 'ऊर्द्ध्वम् अवलोक्य' आकाशं प्रति दृष्टिं दत्त्वा, 'ह्री ह्री' हर्षे, 'शरत्काल-निर्म्मले' शरत्समये प्रसन्ने 'अन्तरिक्षे' गगने 'प्रसारित-बलदेवबाहुदर्शनीया' 'प्रसारित:' दीर्घीकृत: बलदेवस्य बाहु:, तम् इव दर्शनीयाम् तद्वत् विशदां दीर्घाञ्च; प्रसादिते इति पाठे—'प्रसादित:' सन्तोषित: बलदेव:, तस्य बाहुमिव मनोज्ञां, [प्रसन्नत्वादपि जनोऽधिकतरां श्रियं धत्ते] 'प्रसाधित' इति पाठे अलङ्कृत इत्यर्थ:, 'सारसपङ्क्तिं', सारसपक्षिणां श्रेणीम् 'यावत् समाहितं गच्छन्तीं' यत्कालं व्याप्य समभावेन उत्पतन्तीं 'पश्यतु तावत् भवान्' तावत् तां भवान् आलोकयतु। [अनेन नायकस्य दृष्टिपथात् नायिकाया अपसरणावसर: लभ्यते इति बोद्धव्यम्]।

Notes.

लतामण्डपम्—Obj. of गता। लतानां मण्डप:—६तत्, तम्।

उताहो—अव्यय। 'आहो उताहो किमुत विकल्पे किं किमुत च'—अमर:।

असनकुसुमसञ्चितम्— Adj. to शिलापट्टकम्। असनाख्यानि कुसुमानि—कर्म्मधारय:, तै: सञ्चित:—३तत्, तम् '...अथ पीतशालके सर्ज्जकासनबन्धूकपुष्पप्रियकजीवका:—अमर:। *Terminalia Alata Tomentosa.*

व्याघ्रचर्म्मावगुण्ठितम् इव—अव – गुण्ठ + क्त—कर्म्मणि = अवगुण्ठित। व्याघ्रस्य चर्म्म—६तत्, तेन अवगुण्ठितम्—३तत्। The stone-seat having Asana flowers on it appears to be covered with a tiger-skin marked with red and black streaks.

पर्व्वततिलकं नाम—The very mame of the stone-seat indicates its lofty situation.

शिलापट्टकम्—शिलाया: पट्टक:—६तत्, तम्।

अधिकटुक etc.—सप्तच्छदानां वनम्—६तत्, अधिकं कटुका:—सहसुपा,

अधिककटुकः गन्धः यस्य—बहुव्रीहिः, तादृशं सप्तच्छदवनम्—कर्मधारयः। सप्त सप्त छदाः (-पत्राणि) यस्य सः सप्तच्छदः—बहुव्रीहिः। सप्त here means सप्त सप्त (i. e. seven in *each* stalk). 'वृत्तिविषये संख्यावाचक-शब्दस्य क्वचिद् वीप्सार्थत्वम्" । सप्तच्छद is called 'छातिम' in Bengali.

आलिखितमृगपक्षिसङ्कुलम्—मृगाश्च पक्षिणश्च—द्वन्द्वः, आलिखिताः मृगपक्षिणः—कर्मधारयः, तैः सङ्कुलः—३तत्, तम्।

N. B. मृगाश्च पक्षिणश्च will be compounded in इतरेतरयोग only and not in optional समाहार available by the rule 'विभाषा वृक्ष-मृग &c.' On the rule Bhattoji says—'मृगाणां मृगैरेव, शकुनीनां तैः (i. e. शकुनिभिः) एव उभयत्र (i. e. in समाहार and इतरेतरयोग द्वन्द्वः' ।

दारुपर्व्वतकम्—पर्व्वतः एव पर्व्वतकः, पर्व्वत+कन्—स्वार्थे। दारुमयः पर्व्वतकः—कर्मधारयः, तम्।

शरत्कालनिर्म्मले—Adj to अन्तरिक्षे। निर्गतः मलः यस्मात् तत् निर्म्मलम्—बहुव्रीहिः, शरत् एवकालः—कर्मधारयः, तस्मिन् निर्म्मलम्—७तत्, तस्मिन्।

अन्तरिक्षे—अधिकरणे ७मी। 'अन्तः' स्वर्ग-मर्त्त्ययोः मध्ये ईक्ष्यते इति अन्तरीक्षम् अन्तर्—ईक्ष+घञ—कर्मणि। तस्मिन्। The word is also spelt with short इ—पृषोदरादित्वात्। यास्क, the author of the Vedic निरुक्त, spells it with short इ with various fanciful derivations.

प्रसारित etc.—Adj. to सारसपङ्क्तिम्। प्र—सृ+णिच्+क्त—कर्मणि—प्रसारित। बलदेवस्य बाहुः—६तत्। प्रसारितः बलदेवबाहुः—कर्मधारयः, स इव दर्शनीया—उपमान-तत्, ताम्। (Or, प्रसादितः बलदेवः, तस्य बाहुः, etc—Balarama was well known for his irascible temper.)

सारसपङ्क्तिम्—Obj. of पश्यतु। सारसानां पङ्क्तिः—६तत्, ताम्। सारस is the crane or the swan. "सारसो मैथुनी कामी गोनर्द्दः पुष्कराह्वयः"—यादवः।

समाहितम्—Adverb, modifying गच्छन्तीम्। सम्—आ—धा+क्त।

गच्छन्तीम्—Adj. to सारस-पङ्क्तिम्।

यावत्…तावत्—The use of these two words here is rather peculiar. 'यावत् गच्छति तावत् तां पश्यतु' would be a more normal form तावत् here is out of place and seems to be a careless addition by an unintellegent reader due to the presence of the word यावत्। The expression occurs again without तावत् at page 79. Or, both यावत् and तावत् are to be taken in वाक्यालङ्कार which would be rather unusual.

Rhetoric.—In व्याघ्रचर्मावगुण्ठितम् इव, the fig. of speech is उत्प्रेक्षा ।

Remarks.—By this time the king and the jester came to the very spot where Padm*a*vat*i* and her companions were staying. But the jester himself looking at the row of S*a*rasas in the sky and making the king cast glance there, gives sufficient opportunity to Padm*a*vat*i* and her companions to avoid their sight.

Page 78. Sloka 2.

Sans. Expl.—[वयस्य], 'ऋज्वायतां च' सरलां दीर्घां च 'विरलां च' अघनसन्निविष्टां च 'नतोन्नतां च' क्वचिच्च अवनतां 'विवर्त्तनेषु' गतिपरिवर्त्तनेषु' सप्तर्षिवंशकुटिलां च' सप्तर्षिमण्डलाख्य-नक्षत्रमालावत् वक्रां च 'निर्मुच्यमानभुजगोदर-निर्म्मलस्य' निर्मुच्यमानस्य त्वचं परित्यजतः 'भुजगस्य' सर्पस्य उदरवत् विशदस्य 'अम्बर-तलस्य' आकाशतलस्य 'विभज्यमानां' स्पष्टं दृश्यमानां' 'सीमाम् इव' विभागं कुर्व्वतीम् उभयोरिव आकाशखण्डयोः मध्ये स्थितां प्रान्तरेखाम् इव [एनां' सारसपङ्क्तिं 'पश्यामि'] ॥२॥

Notes.

ऋज्वायताम्—Adj. to एनाम् [सारसपङ्क्तिम्] । ऋजुश्च आयता च—कर्म्मधारयः, ताम् । 'खञ्जकुब्जादिवत् अन्यतरस्य प्राधान्यविवक्षया 'विशेषणं विशेष्येण बहुलम्' इति कर्म्मधारयः । अर्ज्जि + उ = ऋजु ! Fem.—ऋजुः or—ऋज्वी । आ – यम + क्त = आयत ।

नतोन्नताम्—नता च उन्नता च—कर्म्मधारयः (like ऋज्वायताम्) ताम् । उत्-नम + क्त = उन्नत ।

सप्तर्षिवंशकुटिलाम्—सप्त च ते ऋषयश्च इति सप्तर्षयः—कर्म्मधारयः by the rule 'दिक्संख्ये संज्ञायाम्' । तेषां वंशः (collection)—६तत्, स इव कुटिला —उपमान्-तत् by the rule 'उपमानानि सामान्यवचनैः' ताम् । The constellation Ursa Major or the Great Bear is called सप्तर्षिमण्डल । वंश here means गण । 'वंशः पृष्ठास्थि, गेहोर्द्ध्वकाष्ठे वेणौ गणे कुले' —इति केशवः ; cf 'साम्द्रीकृतः स्यन्दनवंशचक्रैः'—Raghu VII. 39.

निर्मुच्यमान etc.—Adj. to अम्बरतलस्य । निर् – मुच + कर्म्म-कर्त्तरि शानच् = निर्मुच्यमान ; casting off the slough. निर्मुच्यमानः भुजगः—कर्म्मधारयः, तस्य उदरं—६तत्, तत् इव निर्म्मलम्—उपमान-तत्, तस्य ।

गगनतलस्य—शेषे षष्ठी। गगनस्य तलः or तलम्—षतत्, तस्य।

विभज्यमानाम्—Adj. to सीमाम्। वि—भज् + कर्मणि शानच्, स्त्रियामाप्। Distinguishable; marked. विभज्यमानां cannot mean विभागं कुर्व्वतीम्। Even if it were taken in कर्म्मकर्तृवाच्य, it would qualify the thing that is being divided (viz. the sky).

एनाम्—Refers to the सारसपङ्क्ति। एन is ordered by the rule 'द्वितीयाटौस्सु एनः'।

Rhetoric.—The fig. of speech is स्वभावोक्ति and वस्तूत्प्रेक्षा in the last line.

Metre.—वसन्ततिलक। 'ज्ञेया वसन्ततिलका तभजा जगौ गः'।

Ch. of voice.—ऋज्वायता...विरला...नतोन्नता...सप्तर्षिवंशकुटिला... विभज्यमाना सीमा...[एषा दृश्यते मया]।

Pages 79-80.

Sans. Expl.—'कोकनदमाला-पाण्डुर-रमणीयाम्' श्वेतपद्ममालावत् शुभ्रां मनोज्ञां च 'सारसपङ्क्ति'' सारसश्रेणीं 'यावत् समाहितं गच्छन्तीम्' यावत्कालं समभावेन उत्पतन्तीम्। [सहसा वयस्येन सह समागतं विलोक्य] 'अहो' सम्भ्रमे अव्ययम्, 'भर्त्ता' प्रभुः समागत इति शेषः। 'हम्' निर्णये अव्ययम्। 'आर्य्यपुत्रः' आगत इति शेषः। 'आर्य्ये' पूज्ये आर्वाल्लिके, 'तव कारणात्' त्वमन्यपुरुषगोचरा न भवसि इत्यतः 'आर्य्यपुत्रदर्शनं परिहरामि' स्वामिनं दर्शनपथात् अन्तर्हिता भवामि, 'तत् इमं माधवीलतामण्डपं' वासन्तीलतावेष्टितं गृहं प्रविशाम...'निर्गता भवेत्' अस्मात् स्थानात् गता भवेत्।

Notes

भर्तृदारिका—'वाच्या प्रकृतिभी राज्ञः कुमारी भर्तृदारिका'—साहित्यदर्पण। The term भर्तृदारिका is used by the menials to address a princess.

कोकनदमाला etc.—कोकनद is generally used in the sense of the red lotus. 'रक्तोत्पलं कोकनदम्'—अमरः। But here the word has been used in the sense of 'lotus in general', and for its comparison with the सारस, it is to be taken in the sense of 'a white lotus' कोकनदानां माला—षतत्, पाण्डुरा च सा रमणीया च—कर्मधारयः। (See *Ante*, notes on ऋज्वायताम् Sl. 2). कोकनदमाला इव पाण्डुररमणीया—उपमान-तत्।

समाहितं गच्छन्तीम्—See notes on page 79.

कारणात्—हैती प्रमी ।

आर्य्यपुत्रदर्श नम्—आर्य्यपुत्रस्य दर्श नम्—इतत् । Padm*a*vat*i* does not intend to be seen by her husband here, as in that case, *A*vantik*a* also might be seen by him.

माधवीलतामण्डपम्—माधवीलतानां मण्डपः—इतत्, तम् । 'मण्डपोऽस्त्री जनाश्रयः' —अमरः । माधवीलता'—*Banisteria Bengalensis.*'अतिमुक्तः पुण्ड्रकः स्याद् वासन्ती माधवीलता'—अमरः ।

Rhetoric.—In तत्तद्दोदी पदुमावदी etc. there is अनुमान । 'लिङ्ग-दृष्टोऽनुमानता'—साहित्यदर्पण । From the sign viz. the *S*eph*a*lik*a* clusters from which flowers had been plucked, the jester infers that Padm*a*vati had come there.

Pages 81—82.

Sans. Expl.—'अवचितकुसुमान्' अवचितानि संगृहीतानि 'कुसुमानि' पुष्पाणि येभ्यः तान् 'शेफालिका-गुच्छकान्' शेफालिकागुल्मकान् 'प्रेक्षतां पश्यतु...[न हि पद्मावतीमन्तरेण कोऽपि एतेभ्यः पुष्पाणि आहरेत् इत्याशयः]...'विचित्रतां' विविध-वर्णत्वात् रमणीयतां... । 'वसन्तकसङ्कीर्तनेन' वसन्तकस्य नामोच्चारणेन 'अहं' पुनर्जानामि' पुनरपि मे प्रतिभातीत्यर्थः...'वत्ते' वसामि ।...'आसीनौ शिलापट्टके उपविष्टौ आवाम् 'प्रतीक्षिष्यावहे' पद्मावत्यै अपेक्षां कुर्मः इत्यर्थः ।...'शरत्कालतीक्ष्णः' शरत्समये तीव्रः 'दुःसहः' क्लेशेन सहनीयः असह्य इत्यर्थः 'आतपः' सूर्य्यकिरणः । 'इमं' तावत् 'माधवीमण्डपम्' वासन्तीलतागृहम्... । 'बाढम्' तथास्तु .. ।

Notes

अवचितकुसुमान्—अवचितानि कुसुमानि येभ्यः—बहुव्रीहिः, तान् ।

शेफालिकागुच्छकान्—शेफालिकानां गुच्छकाः—इतत्, तान् । See notes *Ante*. गुच्छ and गुल्म are पुं or क्लीव ।

विचित्रता—Nom. of भवति understood. विविधं चित्रं (=वर्णः) यस्य तत् विचित्रम् ; तस्य भावः इति विचित्र+तल् ।

वसन्तकसङ्कीर्तनेन—हैतौ श्या । सम्—कृत्+ल्युट्—भावे=सङ्कीर्तनम् (=नामग्रहणम्) । वसन्तकस्य सङ्कीर्तनम्—इतत्, तेन ।

उज्जयिन्याम्—अधिकरणे ७मी । V*a*savadatt*a* became acquainted with वसन्तक, the jester, in her own apartment at Ujjayin*i* (in company with the king) and now that name reminded her of Ujjayin*i* by association.

प्रतीक्षिष्यावहे—Nom.—आवाम् (आसीनौ)। प्रति—ईक्ष+लृट्, स्यावहे।

शरत्कालतीक्ष्णः—Adj. to आतपः। शरत् एव कालः—कर्म्मधारयः। तस्मिन् तीक्ष्णः—७तत्।

दुःसहः—दुस्—सह+खल्—कर्म्मणि।

इमं माधवीमण्डपम्—The jester points to the same bower, where Padm*a*vat*i* has entered.

बाढ़म्—अव्यय ; 'भृशप्रतिज्ञयोर्बाढ़म्'—अमरः।

Rhetoric.—In वसन्तकसङ्कीर्त्तनेन etc, there is the fig. of speech called स्मरण। 'सदृशानुभवाद् वस्तुस्मृतिः स्मरणमुच्यते'—साहित्यदर्पण।

Remarks.—The jester suddenly gets up on perceiving that the stone-seat was warm. The seat was not heated by the rays of the sun, as the jester thinks, but was a bit hot as it had been so long occupied by Padm*a*vati and V*a*savadatt*a*. See *Infra* Sl. 4.

Pages 83—84

Sans. Expl.—'सर्व्वम् आकुलं कर्त्तुकामः' आवन्तिकाया नियमविशेषस्य परिरक्षणार्थं यदेव किञ्चिदनुष्ठितं तत् सर्व्वं विघातयितुम् इच्छुः [माधवीमण्डपे प्रवेशेन]...।...'मधुकर-परिनिलीनां' भ्रमरैः परिव्याप्ताम् 'अवलम्बलतां' आश्रयवल्लीम् 'अवधूय' कम्पयित्वा 'भर्त्तारं वारयिष्यामि' प्रभोः प्रवेशे बाधां जनयिष्यामि।...'तथा करोति' लतां कम्पयित्वा भ्रमरान् उद्भ्रान्तान् करोति। 'अविहा' कष्टमापतितम् इति सूचयितुम् अव्ययम्। 'तिष्ठतु' बहिरिति शेषः, न माधवीलतागृहं भवता प्रवेष्टव्यम् इत्यर्थः। 'दास्याः पुत्रैः' दुरात्मभिः इत्यर्थः।...। 'मा मा भवान् एवं,' कार्षीत् इति शेषः, मधुकरान् नैव पीड़य इत्यर्थः। 'मधुकरसन्त्रासः' भ्रमराणां भयोद्रेकः 'परिहार्यः' परित्यक्तव्यः [भ्रमराणां भीतिं न जनय इत्यर्थः]।

Notes.

सर्व्वम्—Obj. of कर्त्तुकामः। सर्व्वम् means 'all steps taken for avoiding the husband's sight.'

कर्त्तुकामः—कर्त्तुं कामः यस्य सः—बहुव्रीहिः। The म् of तुम् in कर्त्तुम् is dropped by the dictum 'तुं काम-मनसोरपि'।

मधुकरपरिनिलीनाम्—Adj. to अवलम्बलताम्। परि—नि—ली+क्त—कर्त्तरि=परिनिलीन। परिनिलीनाः (=उपविष्टाः) मधुकराः यत्र सा—बहुव्रीहिः। In spite of the rule 'निष्ठा' the क्त प्रत्ययान्त word takes परनिपात

by the special Varttika-rule—'जाति-काल-सुखादिभ्यः परा निष्ठा वाच्या'। मधुकर is a जातिवाचक word. [निष्ठा is a technical term for क्त and क्तवतु].

अवलम्ब-लताम्—अव—लम्ब + घञ्—कर्म्मणि—अवलम्बः (=आश्रयः)। अवलम्बः एव लता—कर्म्मधारयः, ताम्। If अवलम्ब is derived in भाववाच्य, then अवलम्बस्य (=अवलम्बनस्य) लता—६तत्।

अवधूय—अव—धू + ल्यप्। Opt.—वधूय। The अ of अव and अपि is optionally elided by the dictum—'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः', cf. 'पूर्व्वापरौ तोयनिधी वगाह्य'—Kumara I. 1. The root धू (with long ऊ) is variously conjugated. The different possible forms have been noted in the following verse in the कविरहस्य—

धूनोति चम्पकवनानि धुनोत्यशोकं
चूतं धुनाति धुवति स्फुटितातिमुक्तम्।
वायुर्विधूनयति चम्पकपुष्परेणून्
यत्कानने धवति चन्दनमञ्जरीश्च॥

वारयिष्यामि—वृ + णिच् + लृट् स्यामि।

दास्याः पुत्रैः—Nom of पीड़ितः। दास्याः पुत्राः—अलुक् (६तत्) समासः in the sense of censure (आक्रोश)। Optionally— दासीपुत्राः by the rule 'पुत्रे अन्यतरस्याम्' [which is in continuation of the rule 'षष्ठ्या आक्रोशे']।

मा मा भवान् एवम्—This is an elliptical sentence, कार्षीत्, (i. e. अकार्षीत्) is to be understood. N. B. In connection with माङ्, लुङ् is used always and the augment अ does not come in.

मधुकरसन्न्यासः—Obj. of परिहार्य्यः। सम्—न्यस् + घञ्—भावे = सन्न्यासः। मधुकराणां सन्न्यासः—६तत्।

परिहार्य्यः—परि—हृ + ण्यत्—कर्म्मणि। Nom—त्वया understood.

अविद्दा—Sometimes found as अविदा, See Page 62.

Rhetoric. In मा मा भवान् एवम् etc. there is the dr. peculiarity called उपदेश। 'शिक्षा स्यादुपदेशनम्'—साहित्यदर्पण।

Page 84. Sloka 8.

Sans. Expl.—'मधुमदकलाः' मधुपानेन मत्ततावशात् गुञ्जनरताः 'मदनार्त्ताभिः प्रियाभिः' कामपीड़िताभिः मधुकरीभिः 'उपगूढ़ाः' आश्लिष्टाः 'मधुकराः' भ्रमराः

'पादन्यासविषण्णाः' [लतागृहप्रवेशकाले लतया कर्षणेन] चरणविक्षेपेण खिन्नाः सन्तः 'वयम् इव' यथा अहम् वासवदत्ता-विरहितोऽस्मि तद्वत् 'कान्तावियुक्ताः' प्रियाभिः विरहिताः 'स्युः' भवेयुः। [जाने स्वकं विरहदुःखम् अपरांस्तेन योजयितुं नेच्छामि इत्यर्थः] ॥ ३ ॥

'आसिष्यावहे'—उपवेक्ष्यावः।

Notes

मधुमदकलाः—कलः (अव्यक्तमधुरध्वनिः) एषाम् अस्तीति कलाः, कल + अच् by the rule 'अर्श-आदिभ्योऽच्'। मदेन कलाः—३तत्, मधुना मदकलाः—३तत्। 'मदमत्तो मदकलो मदेनाव्यक्तवाक् च यः'—कोषः।

मदनार्त्ताभिः—मदनेन कृताः आर्त्ताः वा—३तत्, ताभिः।

उपगूढ़ाः—Adj. to मधुकराः। उप—गुह + क्त—कर्म्मणि।

पादन्यासविषण्णाः—पादस्य न्यासः—६तत्, तेन विषण्णाः—३तत्। नि—अस + घञ् —भावे = न्यासः। वि—षद + क्त—कर्त्तरि = विषण्ण; the षत्व is by the rule 'सदिः अ-प्रतेः'।

कान्तावियुक्ताः—कान्ताभिः वियुक्ताः—३तत्। वि—युज् + क्त—कर्म्मणि = वियुक्त।

स्युः—अस + लिङ् युस्। The लिङ् here denotes सम्भावना।

आसिष्यावहे—अस् + लृट् स्यावहे। Nom.—आवाम् understood.

Rhetoric.—The fig. of speech is उपमा। Also, पादन्यासविषण्णत्व being a हेतु of कान्तावियुक्तत्व, there is पदार्थहेतुकं काव्यलिङ्गम्। The figures of speech, being independent of each other (मिथोऽनपेक्ष), it is an instance of संसृष्टि of the two अलङ्कारs. 'मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते'—सा. द.।

N. B. The reverse of it is सङ्कर। But दण्डी speaks of सङ्कीर्ण (सङ्कर) alone with its two kinds—अङ्गाङ्गिभाव (inter-dependence) and समकक्षता (independence),

Metre—आर्या। See स्थापना, Sloka 1.

Ch. of Voice.—मधुमदकलैः... उपगूढ़ैः मधुकरैः पादन्यासविषण्णैः अस्माभिः...कान्तावियुक्तैः भूयेत।

Page 85. Sloka 4.

Sans. Expl.—'पुष्पाणि' शेफालिकाकुसुमानि 'पादाक्रान्तानि' चरणदलितानि 'इदम्' अस्माभिः अध्यासितं शिलातलं च प्रस्तरासनं च 'सोष्म' उत्तापयुक्तं, वर्त्तते इति शेषः; 'ननम्' ध्रुवम्, तर्कयामीत्यर्थः, 'इह आसीना' अत्र शिलापट्टे उपविष्टा

'काचित्' नारी 'मां दृष्ट्वा' माम् अवलोक्य 'सहसा' सत्वरम् 'गता' निष्क्रान्ता। सत्वरगमनात् पुष्पाणि पददलितानि बभूवुः इति बोद्धव्यम्] ॥ ४ ॥

Notes.

पादाक्रान्तानि—पादाभ्याम् आक्रान्तानि—३तत् ।

सोष्म—Adj. to शिलातलम् । ऊष्मणा सह वर्त्तमानम्—बहुव्रीहिः ।

नूनम्—Here it denotes 'surmise.' 'नूनं तर्केऽर्थनिश्चये'—अमरः । [तर्क = surmise. अर्थनिश्चय = certainty].

आसीना—Adj. to काचित् । आस् + शानच् । The root आस्—means 'to sit down' and the root स्था means 'to stand up').

Metre.—अनुष्टुप् । See Sloka 2. Act I.

Rhetoric.—This is an instance of the dramatic peculiarity called अनुमान । 'लिङ्गादूहोऽनुमानता'—the लिङ्ग sign being the flowers trodden under feet and the warmth of the stone-seat. Or, there is प्राप्ति which is one of the 36 नाट्यलक्षणs. In the absence of any वैचित्र्य, it cannot be an instance of the fig. of speech called अनुमान । 'अनुमानं तु विच्छित्या ज्ञानं साध्यस्य साधनात्'—साहित्यदर्पण । [विच्छित्ति means वैचित्र्य] । The हेतु or cause of the action indicated in the first half of the stanza is stated in the second half. But yet we cannot say that there is वाक्यार्थहेतुकं काव्यलिङ्गम् or [कार्येण कारण-समर्थनरूपः] अर्थान्तरन्यासः ; for, every अलङ्कार depends upon वैचित्र्य or विच्छित्ति i.e. a striking mode of expression. [वैचित्र्यस्यैव अलङ्कारत्वात्] ।

Ch. of Voice.—पुष्पैः पादाक्रान्तैः, अनेन शिलातलेन...सोष्मणा [भूयते] । ...आसीनया कयाचित्...गतम् ।

Pages 86—87.

Sans. Expl.—...'रुद्धाः' लतागृहे आबद्धाः बहिर्गमनोपायहीनाः इत्यर्थः । ...'दिष्ट्या' भाग्येन 'उपविष्टः आर्य्यपुत्रः' न तु लतागृहं प्रविष्टः मे भर्त्ता।... 'प्रकृतिस्थशरीरः' स्वस्थदेहः... । 'सास्रपाता' सबाष्पा 'खलु' निश्चये 'आर्य्यायाः' आवन्तिकायाः 'दृष्टिः' चक्षुः [चिरात् स्वामिनं दृष्टवत्या वासवदत्तायाः तत्कृतपद्मावतीर-परिग्रहक्षोभात् अश्रुपातः समजनि । पद्मावत्या चेष्टायाः अश्रुकारणवितर्कं निरासयितुम् व्याजेन कारणान्तरं दर्शयति 'एसा ख़ु' इत्यादि]...'अविनयात्' दौरात्म्यात् 'काशकुसुम-रेणुना पतितेन' मम चक्षुषि पतितेन काशपुष्परजसा 'सोदका मे दृष्टिः' मम चक्षुः साश्रु वर्त्तते । 'युज्यते' अश्रुकारणं तथैव भवितुमर्हति इत्यर्थः ।...'शून्यं खलु' निर्जनम् एव...'प्रष्टव्यं' जिज्ञास्यम्... ।

Notes.

बद्धा:—बध् + क्त—कर्मणि ।

दिष्ट्या—अव्यय । Padm*a*v*a*t*i* is glad to be thus imprisoned in the bower when her husband takes his seat outside.

N. B. One might take दिष्ट्या as the ३या of दिष्टि which means आनन्द । 'दिष्टिर्मुत्-परिमाणयो:'—इति मेदिनी । [मुद्=आनन्द] ।

प्रकृतिस्थशरीर:—प्रकृतौ तिष्ठति इति प्रकृतिस्थम्, प्रकृति—स्था + क । प्रकृतिस्थं शरीरं यस्य स बहुव्रीहि: । V*a*savadatt*a* is happy to see her husband in good health.

साश्रुपाता—Adj. to दृष्टि: । अश्रूणां पात:—६तत्. अश्रुपातेन सह वर्त्तमाना ...बहुव्रीहि: । The sight of her husband and the grief for his marriage with Padm*a*vat*i* is the cause of tears.

अविनयात्—हेतौ ५मी । वि—नी + अच्=विनय:, न विनय:—नञ् तत्, तस्मात् । Here नञ् is used in the sense of विरोध ।

काशकुसुमरेणुना—हेतौ ३या । काशस्य कुसुमम्—६तत्, तस्य रेणु:—६तत्, तेन । By adducing this हेतु V*a*asvadatt*a* puts a stop to their guessing the real cause.

सोदका—Adj. to दृष्टि: । उदकेन सह वर्त्तमाना—बहुव्रीहि: ।

शून्यम्—Lonely ; hence, there was none to overhear them.

प्रष्टव्यम्—प्रच्छ + तव्य—कर्मणि । Nom.—मया understood.

Rhetoric.—In दिट्ठिया पकिदित्थ etc., there is the dr. peculiarity called प्रहर्ष, and in एसा खु महुअराणं etc. there is अभूताहरण । 'प्रहर्ष: प्रमदाधिकम्' and '...व्याजाश्रयं वाक्यम् अभूताहरणं मतम्' —साहित्यदर्पण ।

Pages 88—89

Sans. Expl.—'छन्दत:' स्वेच्छानुसारेण, इति शेष: ।...'प्रिया' प्रेयसी इत्यर्थ: 'तदानीं' पूर्व्वं...'इदानीम्' सम्प्रति, पद्मावत्या सह विवाहात् परम् इत्यर्थ: ।...'महति बहुमानसङ्कटे' क्लेशकरे बहुमानविषयके प्रणयतारतम्य-विचाररूपे सङ्कटे विपदि 'मां न्यस्यसि' मां निपातयसि ?...'तादृशे सङ्कटे' उपायरहितायाम् अवस्थायाम् इत्यर्थ: ।... 'मन्दभागा' भाग्यहीना [सङ्कटे निक्षिप्ता इति शेष: । तुलनया आत्मनि राज्ञ: प्रीतिर्यदि ऊना भवेत् इति अवधाशङ्कया एतदाह इति बोद्धव्यम्] । 'स्वैरं स्वैरं भवतु' स्वच्छन्दत: प्रकाशयतु...'एका' वासवदत्ता 'उपरता' मृता 'अपरा' पद्मावती 'असन्निहिता' न

समीपवर्त्तिनी—[अतो निर्भयं कथयतु इति शेषः]।...'मुखरः' वाचालः अन्यसमक्ष प्रकाशयिष्यसि। 'एतावता भणितम्' एतस्मादेव वाक्येन प्रकाशितम [प्रणय-तारतम्यम् इति शेषः]। 'सत्येन शपामि' सत्यकथनफलम् अन्तरा कृत्वा शपथं करोमि...'आख्यास्ये' वक्ष्यामि, 'एषा सन्दष्टा मे जिह्वा' दन्तैः निश्चलं धृता, अतः प्रकाशने सामर्थ्य रहिता कृता इत्यर्थः

Notes

छन्दतः—छन्द+तस् for ३या। प्रकृत्यादित्वात् ३या। 'अभिप्राय-वशौ छन्दौ'—अमरः।

बहुमानसङ्कटे—अधिकरणे ७मी। बहुः मानः—कर्म्मधारयः, तत्र सङ्कटम्—७तत्, तस्मिन् सम्+कटच् by the rule 'सम्प्रोदश्च कटच्'। 'सङ्कट' ना तु सम्बाधः' —अमरः।

न्यस्यति—नि-अस्+लट् ति। Nom.—भवान्।

यादृशी—Adj. to सङ्कटे। यद्-दृश+कञ+कर्त्तरि। यादृश has its correlative in the suppressed part of the sentence 'तादृशे कोऽपि न निक्षिप्यते'।

मन्दभागा—मन्दः भागः यस्याः सा—बहुव्रीहिः। Vasav. is afraid of hearing that anybody else is more loved by her husband.

स्वैरम्—Adverb. See notes on page 26.

उपरता—उप-रम+क्त, स्त्रियामाप्—कर्त्तरि।

असन्निहिता—सम्-नि-धा+क्त—कर्त्तरि इति सन्निहिता—न सन्निहिता—नञ्तत्। These words are enjoyed by the spectators, for both Vasav. and Padma. are present there to over hear the conversation.

मुखरः—मुखम् अस्य अस्ति [सर्व्वस्मिन् वक्तव्ये] इति मुखरः, मुख+र by the rule 'र-प्रकरणे ख-मुख-कुञ्जेभ्य उपसंख्यानम्'। These very words indicate as to who is more loved by the king. When Vasava. has been taken to be dead, the king cannot have any cause of hesitation in indicating his love for Padmavati.

एतावता—करणे ३या।

भणितम्—भण+क्त-कर्म्मणि। Padma. understood [from the words of the king] whom he loves more.

सत्येन—करणे ३या। The jester being very talkative, his swearing by truth has no value.

आख्यास्ये—आ - चक्ष+लृट् स्ये। चक्ष् धातु—लृट्—ख्यास्यति, ख्यास्यते; क्शास्यति क्शास्यते। लिट्—चख्यौ, चक्शौ; चक्शे; चचक्षे।

सन्दष्टा—सम्—दंश+क्त, स्त्रियामाप्—कर्म्मणि। The jester bites his tongue to keep it fixed, so that the secret may not be disclosed by it [*N. B.* His swearing by truth and biting his tongue is quite in keeping with the character of a jester! 'कर्म्मवपुर्वेशभाषाद्यैः हास्यकरः'—साहित्यदर्पणे।]

Rhetoric—In किमिदानीं भवान् etc. the dr. peculiarity is तापन। 'उपायादर्शनं यत्तु तापनं नाम तद् भवेत्'—साहित्यदर्पणे।

Remarks.—Though the words of the king were sufficient to indicate that V*a*savadatt*a* was dearer to him, yet the dull-headed jester urges for a more disinct avowal of his love.

Pages 90—91.

Sans. Expl.—'न उत्सहे' न साहसी भवामि, नेच्छामि इत्यर्थः.... 'पुरोभागिता' दोषैकदर्शित्वम् [निर्बुद्धित्वम् इत्यर्थः] 'एतावता' न खलु ब्रूयाम् इत्यादिवाक्येनापि इत्यर्थः 'हृदयं न जानाति' आर्य्यपुत्रः कस्यामधिकतरमनुरक्त इति न बुध्यते।...'न भणति मम' न भवान् मह्यं कथयति? 'अनाख्याय' न उक्त्वा। 'अस्मात् शिलापट्टकात्' एतस्मात् प्रस्तरासनात् 'न शक्यम्' भवतेति शेषः 'एकपदम् अपि' एकचरणार्द्ध-मात्रम् अपि 'गन्तुम्'। 'रुद्धः' मया सबलं संयन्त्रितः [इत्युक्त्वा विदूषकः राजानं बाहुभ्यां वेष्टयितुम् उपक्रमते इति बोद्धव्यम्]।...'बलात्कारेण' बलप्रयोगेण... 'पश्यामः तावत्' आवयोः कः स्वोद्धृत्यसिद्धौ प्रभवतीति शेषः [अत्र च राज्ञा वयस्यहस्तात आत्ममोचने प्रयत्नः बोद्धव्यः]। 'प्रसीदतु' मयि सदयो भवतु...'वयस्यभावेन' सौहार्द्दवशात् 'शापितः' शपथपूर्व्वकं प्रार्थितः इत्यर्थः:... 'का गतिः' सत्यहाने उपक्रमात् हृदयम् आवेदयितुम् एव स्वीकरोमि इत्यर्थः।

Notes.

पुरोभागिता—पुरस् - भज+णिनुण् =पुरोभागी। 'दोषैकदृक् पुरोभागी'—अमरः। Malevolent ; (here) stupid पुरोभागिन्+तल्।

एतावता—करणे ३या। The words नोत्सहे सखे वक्तुम् are sufficient to reveal his love for V*a*savadatta.

एकपदम्—Obj of गन्तुम्। एकं पदम् - कर्म्मधारयः।

रुद्धः - रुध+क्त - कर्म्मणि। Nom.—मया understood.

बलात्कारेण – करण of व्यवृणि understood. बलात् – कृ + घञ् – भावे ।

प्रसीदतु etc.—These words indicate that the jester gesticulated efforts to keep the king confined to his seat and the king exerted to free himself from his clasp, when the jester is thus compelled to yield.

शापितः – शप + णिच् + क्त – कर्मणि ।

Rhetoic.—In का गतिः etc. the dr. peculiarity is तापन । 'उपायादर्शनं यत्तु तापनं नाम तद् भवेत्' – सा. द. ।

Page 92. Sloka 5.

Sans. Expl.—'यद्यपि' 'रूपशीलमाधुर्यैः' सौन्दर्येण चारित्र्येण मिष्टभाषितया च इत्यर्थः 'पद्मावती मम' 'बहुमता' प्रेमादरपात्रभूता, [तथापि सा] 'न तु' 'तावत्' वाक्यालङ्कारे 'वासवदत्ताबद्धम्' वासवदत्तायाम् आसक्तं 'मे मनः' मम चित्तं 'हरति' आकर्षति । [वासवदत्तायां दृढ़ं निबद्धं मे मनः पद्मावती तस्याः रूपशीलादिभिः नाक्रष्टुमलम् इति सरलार्थः] ॥ ५ ॥

Notes.

रूपशीलमाधुर्यैः—करणे ३या । रूपञ्च माधुर्यञ्च—द्वन्द्वः, तैः ।

मम—Nom of बहुमता by the rule 'क्तस्य च वर्त्तमाने' ।

बहुमता—बहु मता—सहसुपा । मन + क्त—कर्मणि, वर्त्तमाने, स्त्रियामाप् ।

वासवदत्ताबद्धम्—Adj. to मनः । आ – बन्ध + क्त—कर्मणि = आबद्ध ।

वासवदत्तया or वासवदत्तायाम् आबद्धम्—३तत् or ७तत् ।

Ch. of Voice—...पद्मावत्या बहुमतया [भूयते]...[१या]...वासवदत्ता-बद्धम्...मनः क्रियते ।

Rhetoric—The fig. of speech is विशेषोक्ति [उक्तनिमित्ता] Def.—'सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा'—सा. द. । [द्विधा means उक्तनिमित्ता and अनुक्तनिमित्ता] ।

Metre.—आर्या । See स्थापना, Sl. 1.

Pages 92—93.

Sans. Expl.—'भवतु भवतु' मम क्लेश इति शेषः, सोढ़पूर्व्वः मे क्लेशोऽपि वरम् इत्यर्थः । 'दत्तं वेतनम्' प्रापितं सुफलम् 'अस्य परिखेदस्य' मयानुभूतस्य क्लेशस्य [आत्मनि स्वामिनः प्रेम पूर्णमात्रया एव विद्यते इत्यवगम्य वासवदत्तायाः उक्तिरियम्] । ...'अज्ञातवासः' आत्मगोपनपूर्व्विका अवस्थितिः...'अत्र पद्मावतीसमीपे 'बहुगुणः' भूरिफलोत्पादकः 'सम्पद्यते' जायते [पद्मावत्या सह राज्ञः परिणयः, तेन च राज्योद्धारस्य

उपायदर्शनम् भर्तृ प्रेम्णश्च अज्ञातवासनम् इति अनेका: गुणा: जाता:] ।...'अदाक्षिण्य:' अननुकूल: । '..मा एवम्' कथयेति शेष: 'सदाक्षिण्य:' तुल्यानुरागवात् ।...'भद्रे' सत्स्वभावे [पद्मावत्या: सम्बोधनमेतत्] 'अभिजनस्य सदृशम्' आत्मन: उच्चकुलस्य अनुरूपम् 'मन्त्रितम्' कथितमित्यर्थ: ।...'उक्त' मया' का मम बहुमता इति मया कथितं 'भवान् इदानीम्' इत्यादिना विदूषकं प्रति राज्ञ: स एव प्रश्न: ।

Notes.

दत्तम्— दा + क्त—कर्मणि । Nom—आर्यपुत्रेण understood.

वेतनम्—'कर्मण्या तु विधा-भृत्या-भृतयो भर्म वेतनम्'—अमर: ।

परिखिदस्य—शेषे षष्ठी । परि – खिद् + घञ् । Vasava. considers the avowal of her husband's love for her as ample remuneration for all the hardships she has undergone.

अज्ञातवास:—न ज्ञात: – नञ् तत्, अज्ञात: वास:—कर्मधारय: ।

बहुगुण:—Adj. to अज्ञातवास: । बहव: गुणा: यस्य स:—बहुव्रीहि: । Vasavs.'s अज्ञातवास: has been fruitful in various ways—

(i) It has facilitated the king's marriage with Padma., (ii) it will help the king te recover his lost kingdom, and (iii) it gives her an opportunity to know the king's and Padma.'s mind intimately.

सम्पद्यते—सम् – पद् + लट् ते ।

अदाक्षिण्य'—दक्षिणस्य भाव: दाक्षिण्यम्, दक्षिण + ष्यञ् । अविद्यमानं दाक्षिण्यं यस्य स:—बहुव्रीहि: । A दक्षिण-नायक is defined thus :—'...अनेकमहिलासु समरागो दक्षिण: कथित:'—सा. द. ।

सदाक्षिण्य:—दाक्षिण्येन सह वर्त्तमान: – बहुव्रीहि: । Padma. is utterly free from jealousy even against her co-wife.

अभिजनस्य—षष्ठी with सदृशम् by the rule 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' ।

Rhetoric.—In सदाक्षिण्य एव etc. there is the dr. peculiarity called दृष्टान्त । Def.—'दृष्टान्तो यस्तु पक्षार्थसाधनाय निदर्शनम्' । The fig. of speech here is काव्यलिङ्ग ।

Pages 94—95.

Sans. Expl.—...'वसन्तक: संवृत्त:' वसन्तकवत् प्रणयतारतम्यं जिज्ञासु: वर्त्तते इत्यर्थ: । 'विप्रलपितेन' इथाभाषणेन...'तत्रभवत्यौ' मान्ये वासवदत्ता पद्मावती च

'बहुमते' प्रीतिभाजनम् इत्यर्थः। 'वैधेय' रे मूर्ख...माम् एवं बलात् श्रुत्वा' अनेन प्रकारेण सबलात्कारं मम: हृदयगतं विदित्वा इत्यर्थः...'न अभिभाषसे' तव स्वहृदयगतं न प्रकाशयसि।...'तेन हि' यदि बलात् श्रोतुमिच्छसि ततः 'न शक्यं श्रोतुम्' मम हृदयगतं न वक्ष्यामि इत्यर्थः।...'महाब्राह्मणः' ब्राह्मणश्रेष्ठः, साक्षेपोक्तिरियम्। 'स्वैरं' स्वच्छन्दम् 'अभिधीयतां' कथ्यताम्, त्वयेति शेषः। 'इदानीं' यदि मत्प्रश्नं जिज्ञाससे तदा इत्यर्थः...'तरुणी' युवती 'दर्शनीया' सुन्दरी 'अकोपना' क्रोधरहिता 'अनहङ्कारा' गर्वशून्या 'मधुरवाक्' मिष्टभाषिणी 'सदाक्षिण्या' सानुरागा। [अथ वासवदत्तायां बहुमाने हेतुमाह—अयञ्चेत्यादिना]...'महान् गुणः' वासवदत्तायाः आसीदिति शेषः 'स्निग्धेन भोजनेन' उपादेय-भक्ष्यद्रव्येण 'मां प्रत्युद्गच्छति' माम् अभ्यर्थयते...।

Notes.

विप्रलपितेन—तृतीया with किम्। Acc. to पाणिनि, करण of the verb साध्यते understood. वि–प्र+लप्+क्त=भावे।

मे—कर्त्तरि ६ष्ठी by the rule 'क्तस्य च वर्त्तमाने'। कर्त्ता of बहुमते।

बहुमते—Adj. to उभे। बहु–मन+क्त—कर्म्मणि, स्त्रियामाप, १मा—२वचन।

वैधेय—सम्बोधन। 'अज्ञे मूढ़-यथाजात-मूर्ख-वैधेय-बालिशाः'—अमरः।

माम्—Obj. of श्रुत्वा। Here माम् means मद्वचः by लक्षणा।

बलात्—ल्यब्लोपे कर्म्मणि ५मी।

शक्यम्–शक+यत्—भावे। Nom—त्वया understood.

महाब्राह्मणः—महान् ब्राह्मणः—कर्म्मधारयः। *N. B*- The समास of महत् is prohibited with the word द्विज and not with the word ब्राह्मण। "शङ्खे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे। यात्रायां पथि निद्रायां महच्छब्दो न दीयते॥" Or, a slight taunt may have been intended here

अकोपना—कुप+युच्—कर्त्तरि शीलार्थे, स्त्रियामाप्,। इति कोपना by the rule 'क्रुधमण्डार्थेभ्यश्च'। न कोपना—नञ् तत्।

अनहङ्कारा—अविद्यमानः अहङ्कारः यस्याः सा—बहुव्रीहिः।

मधुरवाक्—मधुरा वाक् यस्याः सा—बहुव्रीहिः।

स्निग्धेन—स्निह+क्त—अधिकरणे।

Rhetoric.—In तत्रभवती पद्मावती etc. there is the dr. AOculiarity विलोभन। Def.—'गुणाख्यानं विलोभनम्'। In अयं चापरः

etc. there is the नाट्यलक्षण named विशेषण। Def.—'अर्थान् सिद्धान् बहूनुक्त्वा विशेषोक्ति विशेषणम्'—सा. द.।

Page 96.

Sans. Expl.—'भवतु भवतु' साधु साधु इत्यर्थः, अथवा भवतु इति: तव मनसि उदेतु।...'एताम्' माम्।...'कथयिष्ये देव्यै वासवदत्तायै' तव बहुमानं ज्ञापयिष्यामि। 'अविहा' खेदे अव्ययम्।...'उपरता' मृता।

Notes.

कथयिष्ये—'णिचश्च' इत्यात्मनेपदम् (कर्त्रभिप्राये क्रियाफले)।

वासवदत्तायै—क्रियायोगे ४र्थी।

उपरता—उप – रम + क्त—कर्त्तरि, स्त्रियामाप्।

Remarks.—सर्व्वमेतत् कथयिष्ये etc.—His love for Vasvadatta was so deep seated in his heart, that he could not believe even for a moment that Vasava. was dead.

Page 97. Sloka 6.

Sans. Expl.—'अनेन परिहासेन' प्रणयतारतम्य-प्रश्नरूपेण नर्म्मणा 'त्वया मे मनः' 'व्याक्षिप्तम्' अप्रस्तुतविषये आकृष्टम् 'ततः' मनोविक्षेपात् 'पूर्व्वाभ्यासेन' पूर्व्वम् एतादृशां वाक्यानाम् कथनेन 'इयं वाणी' सर्व्वमेतत् कथयिष्ये देव्यै वासवदत्तायै इति वचनम् 'तथा एव' पूर्व्ववद् एव 'निःसृता' मुखात् बहिर्गता [न तु सम्यक् विनिश्च उक्ता इत्यर्थः] ॥ ६ ॥

Notes

परिहासेन—करणे ३या।

व्याक्षिप्तम्—वि—आ – क्षिप् + क्त—कर्म्मणि। Nom.—त्वया।

पूर्व्वाभ्यासेन—हेतौ ३या। पूर्व्वः अभ्यासः—कर्म्मधारयः, तेन।

निःसृता—निस् – सृ + क्त—कर्त्तरि स्त्रियामाप्।

Ch. of Voice.—...त्वम्...व्याक्षिप्तवान्, मनः।...अनया वाण्या... निःसृतम्।

Rhetoric—The fig. of speech is वाक्यार्थहेतुकं काव्यलिङ्गम्।

Metre—अनुष्टुप्।

Pages 97—98.

Sans. Expl.—रमणीय इत्यादि। 'रमणीयः' चित्ताकर्षकः 'कथायोगः' वचनक्रमः पत्नीप्रणयसम्बन्धः वाक्यसमूह इत्यर्थः 'नृशंसेन' निष्ठुरेण दवनकेन ,विसंवादितः खलु' बाधित एव [वासवदत्ता-मरण-आरव्यात् इति बोद्धव्यम्]...'विश्व स्ता

स्मि' निःसन्देहा भवामि, मयि आर्य्यपुत्रस्य प्रीतिह्रासः नास्ति इत्यत्र निःशङ्का भवामीत्यर्थः। 'भट्टो' हर्षे, 'प्रियं नाम' मदनुकूलमेतत् [यत्] 'ईदृशं वचनं' आर्य्यपुत्रोक्तं प्रणयज्ञापकं वाक्यम् 'अप्रत्यक्षम्' असमक्षम् अगोचरे इत्यर्थः 'श्रूयते' मयेति शेषः। [प्रत्यक्षस्तुतौ सत्यामपलापः सम्भवति, न त्वत्र तथा इत्यर्थः]...'धारयतु' धैर्य्यम् अवलम्बताम्...'अनतिक्रमणीयः' अपरिहरणीयः 'हि' यतः 'विधिः' भवितव्यता (भाग्यवशम् एव सर्व्वम् इत्यर्थः)। 'ईदृशम्' 'दुःखकारणम्' 'इदानीम्' 'एतत् विधेर्विधानम् [अतः धैर्य्येण तत् सोढ़व्यम् इत्यर्थः] ।...'अवस्थाम्' मम चित्तस्य इति शेषः।

Notes.

रमणीयः—Adj. to कथायोगः। रम् + णिच् + अनीय – कर्त्तरि बाहुलकात।

रमणीयः &c —Cf. 'रमणीयः खलु अवधिः विधिना विसंवादितः'-Sak. VI.

कथायोगः—Obj. of विसंवादितः। कथानां योगः—६ष्ठीतत्।

नृशंसेन—नॄन् शंसति (=छिनत्ति) इति नृ – शंस + अण्—कर्त्तरि, तेन। The jester is called नृशंस as he destroyed the charming conversation.

विसंवादितः—वि ~ सम्—वद् + णिच् + क्त—कर्म्मणि। Nom.—नृशंसेन।

विश्वस्ता—वि—श्वस + क्त—कर्त्तरि, स्त्रियामाप्। Now Vasava. is confident of her husband's love for her.

अप्रत्यक्षम्—Adverb. अक्ष्णोः समीपे इति प्रत्यक्षम्—अव्ययीभावः, न प्रत्यक्षम्—नञ्तत्।

अनतिक्रमणीयः—अति – क्रम + अनीय—कर्म्मणि। न अतिक्रमणीयः—नञ्तत्।

Remark—The conversation between the king and the jester was interesting to Padma, as she got an opportunity to measure the depth of conjugal love in her husband; and it is so to Vasav., as she was over-hearing the avowal husband's love from behind.

Page 91. Sloka 7.

Sans. Expl.—'बद्धमूलः अनुरागः' हृदये दृढबद्धम् प्रेम त्यक्तुं 'दुःखम्' तस्य त्यागः दुःखकरः, नैव भक्तं शेन निराकर्त्तुं शक्यते इत्यर्थः। 'स्मृत्वा स्मृत्वा, पुनः पुनः स्मरणेन 'दुःखं' क्लेशः 'नवत्वं याति" नवीभवति। वासवदत्ताप्रणयं कथमपि नाहमस्मि विस्मर्त्तुम्, पुनः पुनः तस्याः संस्मरणात् शोकः अचिरजात इव माम् अभिभवति इत्यर्थः]। 'एषा तु यात्रा' संसारस्थितिः तु ईदृशी भवति 'यत्' 'इह' एतादृशे दुःखे 'बाष्पं विमुच्य' अश्रु पातयित्वा 'प्राप्तानृण्या' प्रणयस्य ऋणात् लब्धनिष्कृतिः 'बुद्धिः'

मनोवृत्तिः 'प्रसादं याति' निर्मलतां भजते। [अतोऽहमपि अश्रूणि विमुच्य दुःखम् अपनोदयामि इत्यर्थः] ॥ ७ ॥

• Notes.

दुःखम्—Adverb, modifying त्यक्तुम्। See सुखम् in Sl.10, Act I.

त्यक्तुम्—त्यज्+तुम्। The infinitive has been used here as a verbal noun, the Nom. of भवति understood. अनुरागः त्यक्तुं दुःखम्=अनुरागस्य त्यागः दुःखं यथा भवति तथा। Similar use of तुम् is in 'सुखमर्थो भवेत् दातुम्—Act. I, Sl. 10.

बद्धमूलः—बद्धं मूलं यस्य सः बहुव्रीहिः।

अनुरागः—Nom. of भवति understood. अनु–रञ्ज्+घञ्–भावे। See notes on सुखमर्थो भवेद् दातुम् in Act. I. Sl. 10.

स्मृत्वा—The repetition implies the continuousness of recollections. क्त्वा is used even in the absence of समानकर्तृकत्व, on the authority of similar ancient uses in expressions such as 'रथे च वामनं दृष्ट्वा पुनर्जन्म न विद्यते' etc.; the solution of the difficulty is as follows:—वामनं दृष्ट्वा "स्थितस्य" पुनर्जन्म न विद्यते। Similarly—स्मृत्वा स्थितस्य जनस्य etc.

नवत्वम्—Obj. of याति। नवस्य भावः इति नव+त्व।

यात्रा—Here यात्रा means 'लोकाचारः; cf. 'एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः परा'—मनुः।

विमुच्य—वि–मुच्+ल्यप्। Here also ल्यप् has been used in the absence of समानकर्तृकत्व, like क्त्वा in स्मृत्वा।

प्राप्तानृण्या—Adj. to वृष्टिः। अविद्यमानम् ऋणं यस्य सः अनृणः—बहुव्रीहिः; अनृणस्य भावः आनृण्यम्, अनृण+ष्यञ्। प्राप्तम् आनृण्यम् यया सा—बहुव्रीहिः।

प्रसादम्—Obj. of याति। प्र–सद्+घञ्—भावे।

Rhetoric.—The fig. of speech is समासोक्ति।

Metre.—The metre is शालिनी। 'मात्तौ गौ चेच्छालिनी वेदलोकैः'।

Ch of Voice.—बद्धमूलेन अनुरागेण...[भूयते], दुःखेन नवत्वं यायते। एतया...यात्रया [भूयते] प्राप्तानृण्यया वृष्ट्या प्रसादः यायते।

Page 99.

Sans. Expl.—'अश्रुपातक्लिन्नम्' नयनाम्बुनिर्गमेन क्लेदयुक्तम्....'तत्रभवतः' पूज्यस्य उदयनस्य 'मुखोदकं' वदनप्रक्षालनार्थं जलम्।...'बाष्पाकुलपटान्तरितम्'

वाष्पाकुलं अश्रुव्याप्तं तथा पटान्तरितम् वस्त्रावृतं [पटेनेव अश्रुप्रवाहेण, अथवा अश्रुमार्जनार्थम् वस्त्रेण आवृतम् इत्यत: वहिर्गच्छन्ती मां न द्रक्ष्यति इत्याशय:]। 'निष्क्रामाम:' बहिर्गच्छाम:, लतागृहादिति शेष:'।

Notes.

अश्रुपातक्लिन्नम्—अश्रूणां पात:—६तत्, तेन क्लिन्नम्—३तत्। क्लिद्+क्त—कर्त्तरि = क्लिन्न।

मुखोदकम्—मुखस्य उदकम्...अश्वघासादिवत् तादर्थ्ये षष्ठी-समास:।

वाष्पाकुलपटान्तरितम्—Adj. to मुखम्। वाष्पेण आकुलम्—३तत्; पटेन अन्तरितम्—३तत्; वाष्पाकुलञ्च तत् पटान्तरितञ्च—(पटान्तरितमिव इत्यर्थ:) कर्मधारय:। Or, वाष्पेण आकुलं यत् पटं तेन अन्तरितम्। The second exposition would suggest that the king had a handkerchief in his hand.

Remarks.—The jester goes away to fetch water, and the king gets his eyes obstructed by the tears [or a piece of cloth to wipe off his tears]. This presents a fine opportunity to Padma. and her party to slip away from the bower of creepers.

Pages 100—101

Sans. Expl.—'एवं भवतु' लतागृहात् निष्क्रामाम इत्यर्थ:। 'अथवा तिष्ठ त्वम्' सर्व्वासाम् एव निष्क्रमणं न युक्तम् इत्यर्थ: [कुत इत्याह उत्कण्ठितमित्यादि]—'उत्कण्ठितम्' दु:खाभिभूतम् इत्यर्थ: 'भर्त्तारं' स्वामिनम् 'उज्झित्वा' त्यक्त्वा 'अयुक्तं' निर्गमनम्'—अस्माकं गमनं न शोभते इत्यर्थ:। 'सुष्ठु' न्याय्यम् इत्यर्थ: 'उपसर्पतु' पतिसकाशं गच्छतु... कं नु खलु' इत्यादिना आवन्तिकाया: अनुमतिम् अपेक्षते। 'नलिनीपत्रेण' पद्मपत्रमध्ये कृत्वा 'एषा तत्रभवती' उपयुक्तकाले एव आगता इति शेष:। 'किम् एतत्' कथमार्य्यपुत्रो रोदिति भवांश्च तदर्थं जलम् आनयति इत्यत किं कारणम् 'एतत् इदम् इदम् एतत्' [पद्मावत्या: सहसाविर्भावेन अश्रुकारणप्रश्नेन च हृतबुद्धेर्विदूषकस्य कारणान्तरविभावनायां पाटवराहित्यात् इयमुक्ति:]। यथैव भवती पश्यति तथैव इदम् इत्यर्थ: [सर्व्वमात्मो: परिहत्या तदर्थमेव उक्ता स्वाधिकवर्णरसम् अन्तरा हास्योद्रेकार्थम् विदूषको विदग्धानां मनो रञ्जयति]। 'भणतु' कथयतु अश्रुकारणम् इति शेष:. [अलीककारणोद्भावनावसरं न दातुकामा पद्मावती सोद्वेगम् तत् परीपृच्छति]।

उत्कण्ठितम्—उत्कण्ठा जाता अस्य इति उत्कण्ठितः ; उत्कण्ठा+इतच्, तम्।

उज्झित्वा—उज्झ्+क्त्वा। Conj.—उज्झति, उज्झाञ्चकार, लुङ्—औज्झीत्।

नलिनीपत्रेण—करणे ३या। नलिन्याः पत्रम्—६तत्, तेन।

Rhetoric.—In उत्कण्ठितं भर्त्तारम् etc. there is the नाट्यालङ्कार called 'उपदेशन'। Def.—'शिक्षा स्यादुपदेशनम्'—सा. द.।

Remarks.—एतत् इदम् etc.—The jester is confounded at the sudden entrance of Padma. and being unable to give promptly a satisfactory explanation of the tears in the eyes of the king says 'that is this, this is—that'. But Padma. insists on his speaking out the fact immediately, so that the jester may not get any opportunity of thinking out a false explanation.

Pages 102—103.

Sans Expl.—...'वातनीतेन' पवनचालितेन 'काशकुसुमरेणुना' काशपुष्पपरागेण 'अक्षि-निपतितेन' चक्षुषोर्मध्यपतितेन 'साश्रुपातं खलु' नयनाश्रुप्लावितमेव 'तत्रभवतः मुखम्' वयस्यस्य वदनम्। 'इदं मुखोदकम्' मया आनीतं मुखप्रक्षालनाय जलम् [सत्यकारणगोपनपूर्व्वकम् कारणान्तरप्रदर्शनार्थम् इयम् उक्तिः] 'सदाक्षिण्यस्य जनस्य' तुल्यानुरागवतः उदयनस्य इत्यर्थः 'परिजनः अपि' विदूषकरूपः अनुचरोऽपि 'सदाक्षिण्यः एव' प्रभुवत् समानुरागवान्। ('उपेत्य' उदयनसकाशं गत्वा)। 'अये पद्मावती' चक्षुषोरश्रुकलुषतया प्राक् अदृष्टां पद्मावतीं प्रेक्ष्य राजा ससम्भ्रममाह इति बोद्धव्यम्। ('अपवार्य्य' पद्मावती यथा न शृणुयात् तथा परावृत्य विदूषकं प्रति 'किम् इदम्' किं मत्वा पद्मावती मुखोदकम् आनयति ? ('कर्णे' काशकुसुमरेणुना साश्रुपातं भवतो मुखम् इति उक्ता प्रतारिता एव मया पद्मावती इति राज्ञः कर्णे कथयति) 'साधु' सत्यगोपनचातुर्य्येण प्रशंसार्हः भवान् इत्यर्थः। ('आचम्य' मुखं प्रक्षाल्य) 'आस्यताम्' उपविश्यताम्।

Notes.

वातनीतेन—वातेन नीतः—३तत्, तेन।

काशकुसुमरेणुना—हेतौ ३या। काशस्य कुसुमम्—६तत्, तस्य रेणुः—६तत्, तेन।

अक्षिनिपतितेन—Adj to काशकुसुमरेणुना। अक्ष्णोः निपतितः—७तत्, तेन।

साश्रुपातम्—Adj. to मुखम्। अश्रूणां पातः—६तत्. तेन सह वर्त्तमानम् —बहुव्रीहिः। In the mean-time the jester gains self-possession to explain thus the cause of tears.

सदाक्षिण्यः—दाक्षिण्येन सह वर्त्तमानः—बहुव्रीहिः। Padma. does not find fault with the jester for his transparent falsehood, but finds rather courtesy in him.

अपवार्य—अप – वृ + णिच् + ल्यप्। Turning aside to speak out a secret. अपवारित is a नाट्योक्ति and is thus defined in the साहित्यदर्पण—

……'तद् भवेदपवारितम्।
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते' ॥

एवम् इव—It is a technique of dramaturgy. 'कर्णे एवमिवेत्युक्त्वा शाप्यः पश्चात् प्रसङ्गतः'। The jester whispers into the ears of the king how he has explained the cause of tears.

साधु etc.—The king praises the jester for his ingenuity.

आस्यताम्—आस् + भावे लोट् ताम्। Nom.—भवत्या understood.

Page 103 Sloka 8.

Sans. Expl.—'भामिनी' प्रिये 'वाताविद्धेन' वायुचालितेन 'शरच्छशाङ्कगौरेण' शरत्कालचन्द्रवत् शुभ्रेण [अतश्चक्षुःपतितेनापि स्पष्टतोऽदृश्येन इत्यर्थः] 'काशपुष्पलवेन' काशकुसुमरेणुना 'इदं मम मुखम्' 'साश्रु पातम्' नयनाम्बु व्याप्तम्, वर्त्तते इति शेषः [इति दाक्षिण्यवशात् विदूषकवाक्यम् एव अनुवदति] ॥८॥

Notes

शरच्छशाङ्कगौरेण—Adj. to काशपुष्पलवेन। शरदः शशाङ्कः—६तत्, स इव गौरः—उपमान-तत्, तेन। The pollen being white is not clearly visible in the eye.

N. B. Vamana in his काव्यालङ्कार-सूत्रवृत्ति quotes this verse (without giving any reference) with the reading शरच्चन्द्रांशुगौरेण which is better in as much as much as it corresponds better to काशपुष्पलवेन ((अंशु and लव corresponding to each other).

वाताविद्धेन—आ—व्यध + क्त – कर्मणि = आविद्ध। वातेन आविद्धः—६तत्, तेन। व्यध—ताडने, दिवादिः।—विध्यति, विव्याध, व्यत्स्यति, अव्यात्सीत्।

भामिनि—सम्बोधन। A term of endearment, like चण्डी। 'सुन्दरी रमणी रामा कोपना सैव भामिनी—अमरः।

काशपुष्पलवेन—हेतौ ३या। काशस्य पुष्पम्—६तत्, तस्य लवः—६तत्, तेन। Rhetoric—The fig. of speech is व्याजोक्ति। Def.—'व्याजोक्तिर्गोपनं व्याजाद् उद्भिन्नस्यापि वस्तुनः'। This, too, is based on पदार्थहेतुकं काव्यलिङ्ग in काशपुष्पलवेन and समासगता उपमा in शरच्छशाङ्कगौरेण। Thus it is a case of सङ्कर (mixture).

Metre—अनुष्टुप्।

Ch of Voice.—सुखेन अनेन साश्रुपातेन [भूयते]

Page 104. Sloka 9.

Sans. Expl.—[अतः असत्यभाषणे हेतुमाह—] 'इयं' बालेति। 'इयं' पद्मावती 'बाला' अपरिणतवयस्का 'नवोदुवाहा' अचिरसम्पादित-विवाहमङ्गला [अतः] 'सत्यं' श्रुत्वा' यथार्थकारणम् आकर्ण्य, मम अश्रुपातस्य इति शेषः, 'व्यथां व्रजेत्' मनः-पीड़ां लभेत्। 'कामम्' सत्यम् एव 'इयं' 'धीरस्वभावा' धैर्यशीला [अतः सत्यश्रवणे अविचलिता भवेदपि, तथापि] 'स्त्रीस्वभावस्तु' स्त्रीजनसुलभा प्रकृतिः तु 'कातरः' धैर्यहीनः [अतः स्त्रीजनसुलभम् अधैर्यमपि अस्यां सम्भाव्यते इति सत्यश्रावणे आपत्तिर्विद्यत एव] ॥ ९ ॥

Notes.

नवोद्वाहा—नव उद्वाहः यस्याः सा—बहुव्रीहिः। This adj. indicates that she should be treated with nothing but tenderness.

कामम्—Adverb. 'अकामानुमतौ कामम्'—अमरः।

धीरस्वभावा—धीराः स्वभावः यस्याः सा—बहुव्रीहिः।

Rhetoric.—The fig of speech is काव्यलिङ्ग in the first line (the expression नवोद्वाहा supplying the हेतु of व्यथां व्रजेत्)।

Metre—अनुष्टुप्।

Ch. of Voice—अनया बालया नवोद्वाहया......व्यथा व्रज्येत। अनया धीरस्वभावया [भूयते] स्त्रीस्वभावेन कातरेण [भूयते]।

Pages 104—105.

Sans. Expl.—उचितम् इत्यादि। स्वल्पकालव्यापी क्रीड़ितयोर्नायकनायिकयोः मध्ये सामयिकी विच्छेदः आवश्यकः इति मत्वा आह—'उचितम्' युक्तम् 'तत्रभवतः मगधराजस्य' पूज्यस्य मगधनृपतेः दर्शकस्य 'अपराह्णकाले' मध्यदिवसाद् उत्तरस्मिन् समये 'भवन्तम् अग्रतः कृत्वा' त्वां पुरतः संस्थाप्य 'सुहृज्जनदर्शनम्' बन्धुजनैः सह

साचात्कारः [एतत्करणेन उदयनं प्रति दर्शकस्य समादरातिशयः वर्णितः]। 'सत्कारो हि नाम' पूजा एव च, केनापि विहितः समादर इत्यर्थः 'सत्कारेण' समादरेण समाहृतकर्त्तकेण इति शेषः 'प्रतीष्टः' स्वीकृतः 'प्रीतिम् उत्पादयति' सन्तोषं जनयति, सत्कारकर्त्तुरिति शेषः। [दर्शकौ भवन्तं पुरतः संस्थाप्य समाद्रियते, भवान् अपि यदि समादरपूर्व्वकं तत्सम्मानं स्वीकरोति, तदा दर्शकस्य प्रीतिर्भवेद् इत्यर्थः]। 'तत' तस्मात्, दर्शकस्य प्रीतिं जनयितुम् इत्यर्थः 'उत्तिष्ठतु तावद् भवान्' दर्शकसमीपं गच्छतु इत्यर्थः।......'वाढम्' तथास्तु। 'प्रथमः कल्पः' उदारः प्रस्तावः [इति दर्शकसमीपगमनं स्वीकरोति]।

Notes.

मगधराजस्य—कर्त्तरि ६ष्ठी ; Nom. of सुहृज्जनदर्शनम्। मगधानां राजा ६तत्, तस्य।

अपराह्णकाले—अपरम् अह्नः इति अपराह्णः—एकदेशि-तत् by the rule 'पूर्व्वापराधरोत्तरमेकदेशिनैकाधिकरणे'। अहन् is changed into अह्न by the rule 'अह्नोऽह्न एतेभ्यः'। The णत्व is by the rule 'अह्नः अदन्तात्'। अपराह्ण एव कालः—कर्म्मधारयः, तस्मिन्।

अग्रतः—अग्र+तस् for ७मी।

सुहृज्जनदर्शनम्—शोभनं हृदयम् अस्य इति सुहृत्—formed by the rule 'सुहृद्दुर्हृदौ मित्रामित्रयोः'। [In the ordinary sense, the form will be सुहृदय]। सुहृदः एव जनाः—कर्म्मधारयः, तेषां दर्शनम्—६तत्।

सत्कारेण—करणे ३या। सत्—कृ+घञ्—भावे।

प्रतीष्टः—Adj. to सत्कारः। प्रति—इष+क्त—कर्म्मणि। Nom.—जनेन understood.

कल्पः—Here कल्प means 'a proposal'. cf. 'उदारः कल्प :—Sak. V.

Rhetoric.—In उचितं तत्रभवतः etc., there is the dr. peculiarity called परिवर्त्तक (of the सात्त्वती वृत्ति)। Def.—'प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकः' and in सत्कारो हि नाम etc. there is the dramatic peculiarity called उदाहरण (of the गर्भसन्धि). Def.—'उदाहरणमुत्कर्षयुक्तं वचनमुच्यते—सा. द.

Page 105. Sloka 10.

Sans.Expl.—'लोके' भुवने 'विशालानां गुणानां वा' दयादाक्षिण्यादिश्रेष्ठगुणानां च 'निश्चयः' प्रत्यक्षम् एव 'सत्काराणाञ्च' समादराणां च 'कर्त्तारः' अनुष्ठातारः 'सुलभाः'

भूयिष्ठो लभ्याः, 'विज्ञातारः तु' परकृतसमादरस्य उपलब्धारः तु 'दुर्लभाः' विरलाः। ये हि स्वेच्छया दयादाक्षिण्यादिगुणान् प्रदर्शयन्ति प्रीतिपात्राणि च समाद्रियन्ते तादृशाः जनाः जगति बहव एव सन्ति, किन्तु परकृतसत्कारं लब्ध्वा सत्कर्त्तुः गुणान् ये प्रशंसन्ति तादृशा लोका जगति दुर्लभा एव इत्यर्थः ॥ १०॥

Notes

विशालानाम्—Adj. to गुणानाम्। वि+शालच् by the rule 'वेः शालच्छङ्कटचौ'।

गुणानाम्—(i) शेषे षष्ठी, if कर्त्तारः and विज्ञातारः are formed with the affix तृन्, and (ii) कर्म्मणि षष्ठी, if कर्त्तारः and विज्ञातारः are formed with the affix तृच्।

नित्यशः—Adverb. नित्य+शस्।

कर्त्तारः—कृ+तृन् or तृच्—कर्त्तरि।

सुलभाः—Adj. to कर्त्तारः। सु—लभ+खल्—कर्म्मणि।

विज्ञातारः—वि—ज्ञा तृन् or तृच्—कर्त्तरि।

दुर्लभाः—दुर्—लभ्+खल्—कर्म्मणि।

Rhetoric.—The fig. of speech is अप्रस्तुतप्रशंसा as from the अप्रस्तुत statement, viz. कर्त्तारः सुलभाः etc. the प्रस्तुत facts, viz. Magadharaja's treatment and Udayana's behaviour, are indicated Def.—'अप्रस्तुत-प्रशंसा सा, या सैव प्रस्तुताश्रया'। Also, सत्कार and गुण being mentiond to have the same धर्म्म or क्रिया (एकधर्म्माभिसम्बन्ध), viz. कर्त्तारः and विज्ञातारः, there is तुल्ययोगिता। Def.—'पदार्थानां प्रस्तुतानाम् अन्येषां वा यदा भवेत्। एकधर्म्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता'।

Metre—अनुष्टुप्

Ch. of Voice.—···कर्त्तृभिः सुलभैः, विज्ञातृभिः···दुर्लभैः [भूयते]।

End of Act IV.

Act V

Pages 107—109.

Sans. Expl.—'पद्मिनिका मधुकरिका च' पद्मावत्याः चेट्यौ ।.. 'किं क्रियताम्' मयेति शेषः ।...'शीर्षवेदनया' शिरःपीड़या 'दुःखिता' क्लिष्टा ।...'आर्याम् आवन्तिकाम्' मगधराजगृहे आवन्तिकेति नाम्ना वसन्तीं वासवदत्ताम् इत्यर्थः 'शब्दापय' आह्वय । 'शीर्षवेदनाम् एव निवेदय' 'ततः' पद्मावत्याः शीर्षवेदनावार्त्तया एव आवन्तिका स्वयम् एव आगमिष्यति इत्यर्थः ।...'मधुराभिः कथाभिः' मिष्टैः वचनैः...'विनोदयति' अपनोदयति । 'युज्यते' आवन्तिका मधुरवाक्यैः शीर्षवेदनामपनोदयितुं समर्था एव इत्यर्थः ।...'शयनीयं रचितं' शय्या आस्तीर्णा... । 'समुद्रगृहके' तन्नामके गृहविशेषे, जलसामीप्यात् शीतलत्वाच्च गृहस्यैतन्नाम इति बोद्धव्याम् ।...'गच्छ इदानीम्' आवन्तिकाह्वानार्थम् ।...'भर्त्रे' स्वामिने, उदनाय इत्यर्थः निवेदनार्थम्' पद्मावत्या शिरःपीड़ावार्त्ता-ज्ञापनार्थम्...'एवं भवतु' तथा कुरु इत्यर्थः ।

Notes.

शीर्षवेदनया—हेतौ ३या । शीर्षस्य वेदना—६तत्, तथा ।

शब्दापय—शब्द (नामधातु) णिच् with पुक्, लोट् हि ।

N. B.—शब्दं करोति इति शब्दायते । शब्द+क्यङ् (नामधातु); शब्दाय+णिच्=शब्दाययति । शब्दाय is intransitive because the object is in the root itself and not separately mentioned ; शब्दायि is transitive exactly like all other intransitive roots which become transitive with णिच् । The य and प in Nagri characters are often confused with each other ; cf. पारियात्र and पारिपात्र—one of the seven कुलपर्व्वतs. Hence शब्दापयति (for शब्दाययति) which in course of time has come to be almost a recognised form. To put the discussion in brief, शब्दापयति is a licensed use for शब्दाययति (on the analogy of दापयति, ज्ञापयति, &c.). The २या, too, in आवन्तिकाम् should be regarded as a licensed use for ३या ; because the प्रयोज्य of शब्दाययति does not become कर्म्म owing to the prohibition by the rule 'शब्दायते र्न' ।

कथाभिः—करणे ३या ।

शयनीयम्—Obj. of रचितम् । शेते अस्मिन् इति शयनीयम् (=शय्या), शी+अनीय—अधिकरणे ।

समुद्रगृहके—गृहम् एव गृहकम्, गृह+कन्–स्वार्थे or अल्पार्थे। समुद्रे गृहकम्—७तत्, तस्मिन्। समुद्रगृहक is a term meaning a cool pleasure-house situated near or in the midst of water. 'समुद्रगृहमित्याहुर्जलयन्त्र-निकेतनम्' इति हारावली। The word occurs also in Bhasa's प्रतिमा (Act II) and Kalidasa's मालविकाग्निमित्र (Act IV).

आस्तीर्णा—आ–स्तृ+क्त–कर्मणि। Conj. स्तृणाति, स्तृणीते; तस्तार, तस्तरे; अस्तारीत्, अस्तरिष्ट, अस्तरीष्ट, अस्तीर्ष्ट। स्तृ (स्वादि) with short ऋ will give आस्तृत (in क्त) for which see Notes— page 109.

भर्त्रे—निवेदनक्रियायोगे ४र्थी।

निवेदनार्थम्—निवेदनाय इदं यथा स्यात् तथा–नित्यसमासः।

Rhetoric.—in गच्छ इदानीम् etc, there is the dr. peculiarity called उल्लेख। Def.—'कार्यग्रहणमुल्लेखः'—सा. द।

Pages 110—112.

Sans—Expl.—'कुत्र इदानीम्' इत्यादिना पद्मिनिकायाः वसन्तकान्वेषणम् उच्यते।...'देवीवियोग-विधुर-हृदयस्य' देव्याः वासवदत्तायाः वियोगेन' विरहेण 'विधुर' दुःखित' 'हृदय' मनः यस्य तादृशस्य 'तत्रभवतः वत्सराजस्य' पूज्यस्य उदयनस्य पद्मावती-पाणिग्रहण-समीरितस्य' पद्मावत्याः पाणिग्रहणेन, तथा सह विवाहेण इत्यर्थः समीरितस्य वर्द्धितभोगलालसस्य 'अत्यन्तसुखावहे' प्रचुरसुखकरे 'मङ्गलोत्सवे' इत्यर्थः 'मदनाग्निदाहः' कामानल-ज्वाला 'अधिकतरं वर्द्धते' भृशं विजृम्भते।.. 'किम् इह वर्त्तते' कथम् अत्र आगच्छति, भवतीति शेषः [अतिसुखदं पद्मावतीसामीप्यं विहाय अन्यत्रागमनस्य हेतुं पृच्छति]...'सत्यं न जानामि' पद्मावती-शीर्षवेदना-वृत्तान्तम् इति शेषः।...'भर्त्रे निवेदय' वत्सराजाय कथय 'एनाम' शीर्षवेदनाम्।... 'शीर्षानुलेपनम्' शिरःपीड़ाप्रतीकारार्थम्, अनुलेपनस्य औषधम्, 'त्वरयामि' शीघ्रम्, आनेष्यामि।...तत्रभवते 'निवेदयिष्यामि' वत्सराजाय कथयिष्यामि, पद्मावतीशिरः-पीड़ावार्त्ताम्, इति शेषः।

Notes.

देवीवियोगविधुरहृदयस्य—देव्याः वियोगः—६तत्, तेन विधुरम्—३तत्, तादृशं हृदयं यस्य–बहुव्रीहिः, तस्य। विधुर means विकल (दुःखित)। 'विधुर' विकले विधुः'–विकाण्डशेषः। विगता धूः यस्मात् तत् विधुरम्–बहुव्रीहिः, समासान्त अ is by the rule 'ऋक्पूरब्धूःपथामानक्षे'।

वत्सराजस्य—शेषे ६ष्ठी, connected with मदनाग्निदाहः। वत्सानां राजा –६तत् तस्य।

पद्मावतीपाणिग्रहण-समीरितस्य–Adj. to वत्सराजस्य। पाणेः ग्रहणम्—

६तत् ; पद्मावत्याः पाणिग्रहणम्—६तत्, तेन समीरितः—३तत्, तस्य । तम्—ईर क्त—कर्मणि = समीरित ; fanned. [The construction would be easier if this word were in प्रथमा विभक्ति and taken as an adj. to मदनाग्निदाहः] ।

अत्यन्तसुखावहे—आवहति इति आवहः । आङ्–वह + अच्—कर्तरि । सुखस्य आवहः—६तत्, अत्यन्तं सुखावहः—सहसुपा, तस्मिन् ।

मङ्गलोत्सवे—अधिकरणे ७मी । मङ्गलः उत्सवः—कर्मधारयः, तस्मिन् ।

मदनाग्निदाहः—मदन एव अग्निः—कर्मधारयः, तस्य दाहः—६तत् ।

भर्त्रे—[निवेदय इति] क्रियायोगे ४र्थी ।

शीर्षानुलेपनम्—Obj. of त्वरयामि [as the verb here means 'to bring in haste']. शीर्षस्य अनुलेपनम्—६तत् ।

त्वरयामि—त्वर्+णिच्+लट् मि ।

प्रवेशकः—See notes on page 51 ante.

Remarks.—Though for some reason or other Padm*a*vat*i* did not come to the bed in the समुद्रगृह, yet no trick is so be suspected on the part of Padminik*a* or any one else in asking V*a*savadatt*a* or Udayana to see Padm*a*vat*i* in the समुद्रगृह ।

Page 113. Sloka 1.

Sans. Expl.—'कालक्रमेण' समयगत्या [कालापगमे शोकापगमः स्यात्, तेन] 'पुनरागतदारभारः' भूयः अपि गृहीतकलत्र-भारः, कृतोद्वाहोऽहम् इत्यर्थः 'श्लाघ्याम्' श्लाघार्हाम् सर्वगुण-महीयसीम इत्यर्थः 'लावाणके' तदाख्ये ग्रामे 'हुतवहेन' अग्निना 'हृताङ्गयष्टिं' विलुप्तदेहां दग्धाम् इत्यर्थः 'ताम्' 'अवन्तिनृपतेः' अवन्तिराजस्य प्रद्योतस्य 'सदृशीं तनूजां' गुणैः पितुरनुकारिणीं कन्यां वासवदत्तां 'हिमहतां पद्मिनीम् इव' तुषारपातेन विकृतां पद्मलताम् इव 'चिन्तयामि' स्मरामि । गतेऽपि बहुतिथे काले कृतेऽपि नवदारपरिग्रहे नाहमलमस्मि वासवदत्तां विस्मर्तुमिति भावः ॥ १ ॥

Notes

श्लाघ्याम्—Adj. to तनूजाम् । श्लाघ + ण्यत्—कर्मणि ।

अवन्तिनृपतेः—शेषे ६ष्ठी । अवन्तीनां नृपतिः—६तत्, तस्य ।

सदृशीम्—समाना इव पश्यति या ताम् इति समान — दृश + कञ् (कर्मकर्तरि') ; then ङीप् in fem.

तनूजाम्—Obj. of चिन्तयामि । तनू—जन्+ड—कर्तरि । तनु is spelt with either short उ or long ऊ । 'स्त्रियां मूर्तिः तनुस्तनूः'—इत्यमरः ।

कालक्रमेण – प्रकृत्यादित्वात् ३या । कालस्य क्रमः—६तत्, तेन ।

पुनरागतदारभारः—Adj. to अहम् understood. पुनः आगतः—सह सुपा ; दाराणां भारः—६तत्, पुनरागतः दारभारः यस्य सः—बहुव्रीहिः ।

हुतवहेन—Nom. of हताङ्गयष्टिम् । वहति इति वहः, वह + अच्—कर्त्तरि (पचाद्यच्) । हुतस्य वहः—६तत्, तेन ।

हताङ्गयष्टिम्—Adj. to तनूजाम् । अङ्गं यष्टिरिव इति अङ्गयष्टिः —उपमित-तत्, हता अङ्गयष्टिः यस्याः – बहुव्रीहिः, ताम् ।

हिमहताम्—Adj. to पद्मिनीम् । हिमेन हता – ३तत्, ताम् ।

पद्मिनीम् – पद्म + इनि—अस्त्यर्थे + ङीप्, ताम् । A woman of the first of the four classes of women is also called a पद्मिनी नारी । She has been thus defined in the रतिमञ्जरी—

'भवति विमलनेत्रा नासिका क्षुद्ररन्ध्रा
अविरलकुचयुग्मा चारुकेशी कृशाङ्गी ।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥'

Vasavadatta probably belonged to this class of नारी ।

Rhetoric.—उपमा in the last line.

Metre.—वसन्ततिलक । See Act I, Sl. 4.

Ch. of Voice—···पुनरागतदारभारेण [मया] श्लाघ्या हताङ्गयष्टिः सा सदृशी तनूजा हिमहता पद्मिनी चिन्त्यते ।

Page 114.

Sans. Expl.—'त्वरताम्' त्वरा क्रियताम् 'किमर्थम्' कस्मै कर्म्मणे त्वरा कर्त्तव्या इति पृच्छति । 'पद्मिनिकया 'कथितम्' अतः शिरोवेदनावार्त्ता न व मिथ्या इति भावः । 'भोः कष्टम्' अहो दारुणं मे आपतितम् !

Remarks—The jester asks the king to be in haste but does not first indicate the matter. This is in keeping with his apparently stupid character.

Page 115 Sloka 2.

Sans. Expl.—'रूपश्रिया' देहसौन्दर्य्येण 'समुदितां' सम्पूर्णां' गुणतः युक्तां च' तथा च गुणैः समन्वितां 'प्रियां' पद्मावतीं 'लब्ध्वा' पत्नीरूपेण प्राप्य, पूर्व्वाभिघातसरुजः अपि' पूर्व्वेण प्राक् लब्धेन अभिघातेन वासवदत्ताविनाशरूपेण अर्थेन सरुजः पीड़ा-

युक्तस्य अपि 'मम' 'अद्य तु' पद्मावतीलाभात् परम् इत्यर्थ: शोक:' वासवदत्ताविरहकृतः शः 'मन्द इव' लघुतर इव, अभूदिति शेषः । 'अनुभूतदुःखः' प्राप्तशोकः, 'अहम्'' 'पद्मावतीम् अपि', 'तथा एव' वासवदत्ता यथा सहसा विनाशं गता तद्वत् एव पद्मावती अपि वा म्रियते [इति] 'समर्थयामि' सम्भावयामि, शङ्के इत्यर्थः । [प्राक् लब्धशोकः अहम् पद्मावत्या शीर्षवेदनावार्त्तयैव शङ्काकुलो भवामि इत्यर्थः] ॥ २ ॥

Notes

रूपश्रिया – कारणे ३या । रूपस्य श्रीः—६तत्, ३या ।

समुदिताम्—Adj. to प्रियाम् । सम् – उत् + इण् + क्त—कर्त्तरि ।

गुणतः—अनुक्तकर्त्ता of युक्ताम् । गुण + तस् for तृतीया ।

मन्दः – Here means अल्प ।—'मूढाल्पापटुनिर्भाग्या मन्दाः स्युः – अमरः ।

लब्ध्वा—क्त्वा has been used even in the absence of समानकर्त्तृकत्व as in श्रुत्वा श्रुत्वा याति दुःखं नवत्वम् in Sl. 7, Act IV.

पूर्व्वाभिघातसरुजः—Adj. of मम । पूर्व्वः अभिघातः—कर्म्मधारयः ; रुजा सह वर्त्तमानः सरुजः ; पूर्व्वाभिघातेन सरुजः—३तत्, तस्य ।

अनुभूतदुःखः—Adj. to अहम् understood. अनुभूतं दुःखं येन सः – बहुव्रीहिः ।

समर्थयामि—More commonly आत्मनेपदी in this sense. समर्थयति (परस्मैपदी) means 'confirms.'

Rhetoric—If पूर्व्वाभिघातसरुजः is taken as an adj. of मम, there is the defect of style called समाप्तपुनरात्तता as the sense, which is already complete in the first half of the stanza, is resumed in the third foot. To avoid this, पूर्व्वाभिघातसरुजः may be taken as an adj. to अनुभूतदुःखः [अहम्] – रुजया सह वर्त्तमानः सरुजः—बहुव्रीहिः । The fig. of speech is पदार्थहेतुकं काव्यलिङ्गम् ।

Metre.— वसन्ततिलक । Def.— 'ज्ञेयं वसन्ततिलकं तभजा जगौ गः' ।

Ch. of Voice.—...—शोकेन मन्देन...[अभावि] । अनुभूतदुःखेन [मया] पद्मावती . समर्थ्यते ।

Pages 115—117.

Sans Expl.—'अथ' प्रश्ने 'कस्मिन् प्रदेशे' कुत्र [यास्यामि इत्याशयः]... ...'मार्गम् आदेशय' पन्थानं प्रदर्शय...'पूर्व्वं प्रविश' आत्मरक्षावशात् स्वयं प्रवेष्टुम् अनुत्सहमानः विदूषकं प्राक् प्रवेशयति इति बोद्धव्यम् ।...'अविहा' त्राससूचकम् अव्ययम् । 'तिष्ठतु' बहिरिति शेषः, न प्रविशतु भवान् इत्यर्थः ।..."दीपप्रभावसूचितरूपः"

प्रदीपप्रभया दर्शिताकारः 'वसुधातले' भूतले, समुद्रगृहकुट्टिमे इत्यर्थः, 'परिवर्त्तमानः' विचेष्टमानः अयं 'काकोदरः' सर्पः पुरस्तात् विद्यते ।...'सखितम् ईषद्धास्येन सह [तोरणमालायां विदूषकस्य सर्पभ्रमात् राज्ञः सस्मितत्वम्]। 'अहो' विस्मये 'सर्पव्यक्तिः' सर्प इति धारणा वैधेयस्य मूर्खस्य विदूषकस्य । [एतेन एतद् बोद्धव्यम्—दीपप्रभा अतीव क्षीणा एव आसीत । अतः शय्यातलस्थस्य राज्ञः वासवदत्ताकृतमपगमनम् असमञ्जसं भवेद् इति किमत्र चित्रम् ?]

Notes.

अथ—Here used in the sense of प्रश्न । 'मङ्गलानन्तरारम्भ प्रश्न-कार्त्स्न्येष्वथो अथ'—अमरः ।

आदेशय—आङ्—दिश + णिच् + लोट्, हि ।

पूर्व्वम्—Adverb, modifying प्रविश । Through misgivings the king sends the jester first.

दीपप्रभावसूचितरूपः—(i) Adj. to काकोदरः । दीपस्य प्रभा—६तत्, तथा अवसूचितम्—३तत्, तादृशं रूपं यस्य सः—बहुब्रीहिः । Or. (ii) दीपस्य प्रभावः, तेन सूचितं रूपं यस्य सः । In (i), अव is redundant ; in (ii). प्रभाव is an unusual word for प्रभा । The actual reading seems to be दीपप्रभासूचितरूपः which occurs in one of the Mss. as noted by Ganapati.

वसुधातले—वसूनि धत्ते इति वसुधा, वसु + धा + क । वसुधायाः तलम्—६तत्, तस्मिन् ।

परिवर्त्तमानः—परि – वृत + शानच् ।

काकोदरः—A serpent. 'कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी'—अमरः ।

सर्पव्यक्तिः—वि – अञ्च + क्तिन्—भावे = व्यक्तिः meaning प्रकाशः । सर्पः इति व्यक्तिः—कर्म्मधारयः ।

Remarks.—The cause of the illusion of a snake in a garland is the dimness of light inside the room. So, there is nothing unnatural in Vasavadatta's failing to recognise the king lying down on the bed.

Page 117. Sloka 3.

Sans Expl.—'मूर्ख' रे बालिश, 'त्वं हि' 'क्षितौ भ्रष्टां' भूयते पतितां 'ऋज्वायतां' सरलां दीर्घां च 'मूर्खतोरण-लोलमालाम्' सम्मुखतोरणे [पूर्व्वं लम्बमानां मालाम् 'सर्पाम् अवगच्छसि' भुजगम् मन्यसे, 'या' तोरणमाला 'निशि' रात्रौ 'मन्दानिलेन

घोरसमीरणेन 'परिवर्त्तमाना' विचेष्टमाना सती 'किञ्चित्' ईषत् 'भुजगस्य विचेष्टितानि' सर्पस्य गमनादिकार्य्याणि 'करोति' अनुतिष्ठति। [मूर्खत्वात् तोरणमालायां ते सर्पभ्रान्तिः इति भावः] ॥ ३ ॥

Notes

ऋज्वायताम्—ऋजुश्च आयता च इति ऋज्वायता—कर्म्मधारयः, ताम्।

मुखतोरण—लोलमालाम्—मुखस्य (= सम्मुखभागस्य) तोरणम्—६तत्, तत्र लोला—७तत्, तादृशी माला—कर्म्मधारयः, ताम्। 'तोरणोऽस्त्री वहिर्द्वारम्'—अमरः।

भ्रष्टाम्—Adj. to—मालाम्। भ्रंश + क्त—कर्त्तरि।

मन्दानिलेन—हेतौ ३या। मन्दः अनिलः—कर्म्मधारयः, तेन।

निशि—अधिकरणे ७मी। The base is निशा (fem.) and is optionally declined with the form निश् in all except १मा विभक्ति—as well as in २या—१ वचन and २ वचन।

परिवर्त्तमाना—Adj to या [माला]। परि—वृत्+शानच्।

किञ्चित्—Adverb.

विचेष्टितानि—Obj. of करोति। वि—चेष्ट+क्त—भावे।

Rhetoric.—The fig. of speech is निदर्शना। Def.—'अभवन् वस्तु-सम्बन्ध उपमा-परिकल्पकः'।

Metre.—वसन्ततिलक। See sl. 2.

Ch of Voice.—...यया......भ्रष्टा ऋज्वायता मुखतोरणलोलामाला सर्पः अवगम्यते यया...परिवर्त्तमानया...विचेष्टितानि क्रियन्ते।

Pages 118—119.

Sans Expl.—('निरूप्य' निरीक्ष्य तोरणमालाम् इति शेषः) 'सुष्ठु' यथार्थम् ...'इह आगत्य निर्गता भवेत्' अत्र प्राक् आगतवती पश्चात् इतो वहिर्गता।... 'अनागतया' गृहमध्ये अप्रविष्टया......'ज्ञेयम् [अज्ञशेनैव ज्ञायते यत् प्रद्मावती इह नागता इत्यर्थः]।

Notes

सुष्ठु—Adverb. अव्यय।

ज्ञेयम्—ज्ञा+यत्—कर्म्मणि। Nom.—मया understood.

Rhetoric.—In अनागतया भवितव्यम् etc. there is the dr. peculiarity called अनुमान, the sign (लिङ्ग) of which has been mentioned in the sloka शय्या नावनता etc. 'लिङ्गाद्दृष्टोऽनुमानता'—सा. द.।

Page 119. Sloka 4.

Sans. Expl.—[पद्मावत्यास्तत्र अनंगमनस्य प्रमाणं दर्शयति—शय्या नेत्यादिना] 'शय्या' पद्मावत्यै तत्र रचितं शयनीयं 'न अवनता' न अवगाढ़ा], 'तथा आस्तृतसमा शयनात् पूर्व्वं यथा 'आस्तृता' आस्तरणोपेता 'समा' अविषमा च भवति तथैव विद्यते 'न व्याकुलप्रच्छदा' [गात्रसम्पर्काभावात्] अकुञ्चितावारणपटा। 'अमलं' केशतैलादीनां मालिन्यशून्यं शिरोपधानम्' हि मस्तकस्य उपबर्हः एव 'शीर्षाभिघातौषधैः' शिरः-पीड़ाप्रशमार्थैः उपलेपनैः 'न क्लिष्टम्' न मलिनीकृतम्। 'रोगे' व्याधिकृशसमये 'दृष्टिविलोभनं' जनयितुं' अत्र रञ्जनं कर्त्तुं [तथा पीड़ायाः किञ्चिदुपशमो भवति इति बोद्धव्यम्] 'काचित् शोभा न कृता' नयनरञ्जकं किमपि वस्तु न रचितम्। 'प्राणी' कोऽपि जीवः 'रुजा' रोगेण हेतुना 'शयनं प्राप्य' शय्याश्रयं कृत्वा 'न पुनः' शीघ्रम्' अचिरात् 'स्वयम्' आत्मना, स्वेच्छया इत्यर्थः 'मुञ्चति' त्यजति, शय्यामिति शेषः [रोगाभिभूतः जनः शय्याम् आश्रित्य तत्रैव सुचिरं शेते इत्यर्थः] ॥ ४ ॥

Notes.

आस्तृतसमा—Adj. to शय्या। आस्तृता चासौ समा चेति—कर्म्मधारयः। Some take तथास्तृता as compounded. तथास्तृता चासौ समा चेति (तथा meaning यथापूर्वम्)। The root is स्तृ (स्वादि) with short ऋ। Conj—स्तृणोति, स्तृणुते; अस्तार्षीत्, अस्तरिष्ट अस्तृत। स्तॄ (क्र्यादि) with long ॠ will give आस्तीर्ण in क्त। See Note—spage 103 ante.

व्याकुलप्रच्छदा—व्याकुलः प्रच्छदः यस्याः सा—बहुव्रीहिः। प्रच्छाद्यते अनेन इति प्रच्छदः; प्र–छद+ णिच्+घ—करणे। छादि becames छदि by the rule 'छादेर्घे अ-द्व्युपसर्गस्य'।

शिरोपधानम्—शिरस्य उपधानम्—६तत्। To mean 'head' the word is शिरस्। In some ancient writings it is sometime found as अकारान्त। When अकारान्त, the word is also used in masc. in which form it may also mean 'a bed'. Thus—शिरस् (neuter) or शिर (neuter or rarely masc.)=head. शिर (masc,)= bed. उप–धा+ल्युट्—अधिकरणे=उपधानम्; a pillow; 'उपधानन्तूपबर्हः' —अमरः।

शीर्षाभिधातौषधः—करणे ३या। शीर्षस्य अभिघातः—६तत्, तस्य औषधानि—६तत्, तैः।

दृष्टिविलोभनम्—वि–लुभ+णिच्–ल्युट्—भावे=विलोभनम्। दृष्टेः विलोभनम् =६तत्।

रुजा—हेतौ ३या। Decl,—रुक्, रुजौ, रुजः; etc. (fem.).

Rhetoric.—The fig. of speech is स्वभावोक्ति।

Metre.—शार्दूल-विक्रीड़ित। 'सूर्य्याश्वैर्यदि मः सजौ सततगाः शार्दूल-विक्रीड़ितम्।'

Ch of Voice.—शय्यया...अवनतया......आस्तृतसमया......व्याकुलप्रच्छदया [भूयते], अमलीन शिरोपधानेन...क्लिष्टेन [भूयते] ......कयाचित् शोभया...कृतया [भूयते], प्राणिना...शयनं...मुच्यते।

Pages 120—121.

Sans. Expl.—[पद्मावती यदि नागता ततः अचिरात् आगमिष्यति इत्याशया आह—तेन छौति...'मुहूर्तम् उपविश्य' चणमात्रोनो भूत्वा 'तत्रभवतीं प्रतिपालयतु' तदागमनप्रतीचः तिष्ठतु।......'निद्रा मां बाधते' निद्रा माम् अभिभवति......'हों' इति करोतु' हों इति कथाश्रवणे अवधानसूचकं शब्दं करोतु...'अधिक-रमणीयानि' अत्यं मनोरमाणि 'उदकस्नानानि' जलावगाहतीर्थानि...। 'कथम् उज्जयिनी नाम' यां विस्मर्त्तुकामः कथाश्रवणम् अभिनन्दामि तस्याः स्मृतिम् उद्दीपयन्ती उज्जयिनीकथा सा त्वया कथ्यताम् इत्यभिप्रायः।...'अनभिप्रेता' अनभीष्टा...। 'न खलु न अभिप्रेता उज्जयिनीकथा मम अभीष्टा एव, [तथापि प्रियास्मृति-समुद्दीपनात् क्लेशदायिनी इत्याशयः]।

तेन—हेतौ ३या।

मुहूर्त्तकम्—अत्यन्तसंयोगे (i. e. व्याप्तौ) २या। मुहूर्त्त + कन्—स्वार्थे।

बाधते—'बाध' पीड़ने। Conj.—बाधते, बबाधे, अबाधिष्ट।

हों—अव्यय। A particle uttered to indicate one's attention to a story.

अधिकरमणीयानि—रम + णिच् + अनीय—कर्त्तरि बाहुलकात्। अधिकं रमणीयानि...सहसुपा।

उदकस्नानानि—स्नान्ति अत्र इति स्ना + ल्युट्—अधिकरणे; a bathing ghat. उदके स्नानानि—७तत्।

अभिप्रेता—अभि – प्र – इण + क्त—कर्म्मणि।

Pages 121. Sloka 5.

Sans. Expl.—'अवन्त्याः' अवन्ति-कीर्त्तनेन 'अधिपतेः सुतायाः' अवन्तिराजस्य कन्यायाः वासवदत्तायाः 'प्रस्थानकाले' मया सह आगमनसमये [पित्रादिबान्धवजनान् विहाय यदा मत्प्रणयाकृष्टहृदया वासवदत्ता उज्जयिन्याः मया सह कौशाम्बीम्

आगतवती तस्मिन् समये इत्यर्थः] स्वजनं' पित्रादिकं 'स्मरन्त्याः' आध्यायन्त्याः, 'स्नेहात्' बान्धवेषु अनुरागात् 'नयनान्तलग्नं'' चक्षुषोः प्रान्तयोः स्थितं 'प्रहत'' विगलितम् 'बाष्पम्' अश्रु 'मम एव उरसि' ममैव वक्षःस्थले [स्वजनत्याग-दुःखविनोदार्थं माम् आश्लिष्य इत्यर्थः] 'पातयन्त्याः' मुञ्चन्त्याः [अद्य] 'स्मरामि' [अवन्तिनृपात्मजायाः स्मरणात् मत्प्रिया वासवदत्ता एव ताभिस्ताभिरवस्थाभिर्मत्समक्षं तौ उदेति इत्यर्थः] ॥ ६ ॥

Notes.

अवन्त्याः—हेतौ ५या । Here अवन्ति has been used in the sense of 'the capital' of Avanti (i. e. the city of Ujjayinī) and not the country ; hence, singular. While meaning the city, अवन्ति is fem. and is spelt either with short इ or long ई. While meaning the country, the word is masc. (plural) and is spelt with short इ only.

अवन्त्याधिपतेः—अवन्तीनाम् अधिपतेः would give अवन्त्याधिपतेः । So, this may be a slip-shod use by the poet ; cf. 'विनयादपेतपुरुषः' (Act I. 4.) &c. Some propcse to take the two words separately अवन्त्याः (हेतुना) अधिपतिः, तस्य । We may also take अवन्त्याः as the हेतु of स्मरामि ।

सुतायाः—कर्मणि शेषे ६ष्ठी by the rule 'अधिगर्थदयेशां कर्मणि' ।

प्रस्थानकाले—प्रस्थानस्य कालः—६तत्, तस्मिन् ; viz. when Udayana eloped with Vāsavadattā.

स्वजनम्—Obj. of स्मरन्त्याः । स्वः जनः—कर्मधारयः तम् । Singular is in the sense of the plural by the rule 'जात्याख्यायाम् एकस्मिन् बहुवचनम् अन्यतरस्याम्' ।

स्मरन्त्याः—Adj. to सुतायाः । स्मृ + शतृ स्त्री ६'१ ।

नयनान्तलग्नम्—Adj. to बाष्पम् । नयनयोः अन्तौ—६तत्, तत्र लग्नः—७तत्, तम् ।

स्नेहात्—हेतौ ५मी ।

पातयन्त्याः—Adj. to सुतायाः । पत + णिच् + शतृ । Obj.—बाष्पम् ।

Rhetoric.—The fig. of speech is स्मरण । The def. is—'सदृशानुभवाद् वस्तुस्मृतिः स्मरणमुच्यते' ।

Metre.—उपजाति i. e. a mixture of इन्द्रवज्रा and उपेन्द्रवज्रा

Ch. of Voice.—...मया स्मर्यते ।

Pages 122. Sloka 6.

Sans. Expl.—'उपदेशेषु' वीणावादनशिक्षाप्रदानकालेषु 'माम् ईक्षमाणया' मां प्रति दृष्टिं पातयन्त्या, मयि अनुरागातिशयात् इति बोद्धव्यम् 'यया' वासवदत्तया कर्णा 'स्रस्तकोणेन हस्तेन' 'स्रस्तः' विश्लिष्टः 'कोणः' सारिकापरनामा वीणावादनसाधन-विशेषः यस्मात्, तेन करेण करणेन 'बहुशः अपि' असकृत् अपि 'आकाशवादितं कृतम्' शून्ये वीणावादनचेष्टानुकरणं विहितम् अभूत् [तस्याः स्मरामि इति पूर्व्वश्लोकेन अन्वयः] ॥ ६ ॥

Notes

बहुशः—Adverb. बहु + शस् by the rule 'बह्वल्पार्थात् शस् कारकात् अन्यतरस्याम्' ।

उपदेशेषु—अधिकरणे ७मी। उप – दिश + घञ् – भावे = उपदेशः । Udayana taught Vasav. to play on the lute.

ईक्षमाणया – Adj to यया । ईक्ष + शानच् —कर्त्तरि ।

हस्तेन—करणे ३या ।

आकाशवादितम्—Obj. of कृतम् । वद + णिच् + क्त—भावे = वादितम् ; playing on a musical instrument. आकाशे वादितम्—७तत् ।

Metre—अनुष्टुप् ।

Ch. of Voice.—ईक्षमाणा या...आकाशवादितं कृतवती ।

Pages 123—125.

Sans. Expl.—...'अन्यां कथयिष्यामि' अन्यकथां वक्ष्यामि...'नगरं ब्रह्मदत्तं नाम...राजा काम्पिल्यो नाम' नगरस्य राज्ञश्च नाम्नोः परिवर्त्तनेन विदूषकस्य मूर्खत्वद्योतनात् हास्यकरत्वम् प्रकटितम् । 'किम् इति' अनवधानतावशात् मौर्ख्याद्वा उक्तम् इति परीक्षितुं राज्ञः प्रश्नः ।...'अभिधीयताम्' कथ्यताम् ।...'मुहूर्त्तकं प्रतिपाल-यतु भवान्' क्षणम् अपेक्षतां भवान्,......'ओष्ठगतं' नगरस्य राज्ञश्च नामाख्याने भ्रमो मा भूदिति मुखस्थं करिष्यामि ।......'अपि सुप्तः भवान्' निद्रितः भवान् इति प्रश्नः । [वयस्यो यावत् बहुशः पठति राजा ब्रह्मदत्तः इत्यादिकं, तावत् उदयनो निद्रितो बभूव इति बोद्धव्यम्] । 'अतिशीतला' शैत्यबहुला 'इयं वेला' एष समयः । 'आत्मनः स्वस्य मे 'प्रावारकं' गात्राच्छादनं 'गृहीत्वा आगमिष्यामि' [इत्थम् एकाकिनं राजानं विहाय गते वसन्तके वासवदत्तायाः वक्ष्यमाणा भ्रान्तिः सङ्गच्छते एव इति ज्ञातव्यम्]...

'इद' खलु' अतितीव्रम् एव 'भर्तृदारिका' पद्मावती 'शीर्षवेदनया दुःखिता' शिरः-पीड़या बाधिता ।...'समुद्रगृहके' इत्यादि पूर्वश्रुतं पद्मिनिका-वाक्यमेव मधुकरिका निवेदयति ।...'अग्रतः याहि' पन्थानं दर्शय, अहं त्वामनुसरामि इत्यर्थः । ('उभे' मधुकरिका वासवदत्ता च 'परिक्रामतः' गच्छतः, समुद्रगृहं प्रति इति शेषः) ।

Notes

नगरं ब्रह्मदत्तम् etc.—The jester reveals his own ignorance by the misnomer in his narration.

किम् इति etc.—The king intends to know whether this was a mere slip of tongue or a deep-rooted error.

काम्पिल्य—Kampilya was the capital of the पञ्चाल country which is situated around modern Kanoj near Farakkabad.

सुप्तः—स्वप + क्त—कर्त्तरि । The king is overtaken by sleep while the jester is engaged in committing the names to memory.

प्रावारकम्—प्र – वृ + घञ्—करणे इति प्रावारः, a wrapper. घञ् is added by the rule 'वृणोते राच्छादने' । प्र becomes प्रा by the rule 'उपसर्गस्य घञि अमनुष्ये बहुलम्' । प्रावार + कन्—स्वार्थे । The absence of the jester helps the occurrence of the incidents in the next scene in the समुद्रगृह ।

चेटी—This maid is मधुकरिका, previously sent by पद्मिनिका to call in वासवदत्ता (See Text page 108.)

Pages 126—127.

Sans. Expl.—...'शीर्षानुलेपनं त्वरयामि' शिरःपीड़ाप्रतीकारार्थम् अनुलेपनं सत्वरम् आनयामि ।...'अकरुणाः खलु' निष्ठुराः एव 'ईश्वराः' देवाः 'मे' मां प्रति । 'विरहपर्युत्सुकस्य' पत्नीविच्छेदेन सर्वथा पीड़ितस्य...'विश्रमस्थानभूता' शान्तिस्थलभूता 'अस्वस्था जाता' रोगेण अभिभूता इत्यर्थः । 'तावत् प्रविशामि' समुद्रगृहमध्यं गच्छामि । 'परिजनस्य प्रमादः' चेट्यादीनाम् अनवधानता [कुत इत्याह] 'अस्वस्थाम्' असुस्थदेहां ...'केवलदीपसहायां कृत्वा' दीपमात्रेणैव गृहे रक्षित्वा इत्यर्थः 'परित्यजति' न तु अत्र स्थित्वा शुश्रूषते इति भावः । 'इयं पद्मावती अवसुप्ता' अत्र शय्यायां निद्रिता पद्मावती तिष्ठति [दीपप्रभायाः अस्पष्टत्वात्, पद्मावत्यर्थमेव तत्र शय्या कृता इति दूरप्रत्ययवशात् तथा एकाकिन उदयनस्य तत्रागमनस्य असम्भावितत्वाच्च पद्मावती एव

तत्र सुप्ता इति वासवदत्ता मन्यते] 'यावत् उपविशामि' गृहमध्ये क्वचिदिति शेषः। 'अथवा' पक्षान्तरे 'अन्यासनपरिग्रहेण' पद्मावत्यधिष्ठितात् अन्यस्मिन् आसने उपवेशनेन 'अल्प इव' अनधिक इव 'स्नेहः' [पद्मावत्यां मम] आदरः 'प्रतिभाति' [भिन्नासन-ग्रहणेन पद्मावत्यां मे महानपि स्नेहः अल्पतर इव प्रकाशते इत्यर्थः] ।...'अस्यां शय्यायां' पद्मावत्या अधिशयितायाम् इत्यर्थः। 'किं नु खलु' सहर्षप्रश्ने 'एतया सह' पद्मावत्या सह 'उपविशन्त्याः' एकासने तिष्ठन्त्याः 'अद्य' 'प्रह्लादितम् इव' आनन्दरसाप्लुतम् इव 'मे हृदयम्' मम अन्तःकरणम् [अतिप्रेमास्पदस्य राज्ञः स्पर्शात् अबोधपूर्व्वेयम् अनुभूतिः]। 'दिष्ट्या' भाग्येन 'अविच्छिन्नसुखनिःश्वासा' न विच्छिन्ना अवकाशव्यवहिताः सुखाः उद्वेगरहिताः निःश्वासाः यस्याः तादृशी। 'निवृत्तरोगया' पीड़ामुक्तया...'एकदेश-संविभागतया शयनीयस्य' शय्यायाः एकदेशः एकांशः संविभागः आत्मशयनेन कल्पितः भागः यस्य तत्तया, प्रियजनाय शय्यायाः एकांशं रचित्वा स्वयम् च एकांशे स्थित्वा इत्यर्थः 'सूचयति' प्रकाशयति पद्मावतीति शेषः 'माम् आलिङ्ग' इति मां परिष्वजस्व इति [आलिङ्गनं याचते इव इत्यर्थः] ।...

Notes

त्वरयामि—त्वर + णिच् (causative) + लट् मि। 'I fetch quickly.' प्रयोज्य-कर्म—शीर्षानुलेपनम्। शीर्षानुलेपनं त्वरते ; अहं शीर्षानुलेपनं त्वरयामि For a similar use, cf. 'दूतास्त्वरयन्ति माम्'—Ramayana.

मे—(विवक्षया) शेषे षष्ठी।

विरहपर्य्युत्सुकस्य—विरहेण पर्य्युत्सुकः—३तत्, तस्य।

विश्रमस्थानभूता—विश्रमस्य स्थानम्—६तत्, तत् भूता—सहसुपा। वि—श्रम् घञ् (भावे) = विश्रमः। वृद्धि is barred by the rule 'नोदात्तोपदेशस्य मान्तस्य अनाचमेः'। However, विश्राम also is allowed ; cf. 'विश्रामो हृदयस्य यत्'—Bhavabhuti. The जैनेन्द्र-व्याकरण has the following rule—'विश्रामो वा'।

अस्वस्था—स्वस्मिन् तिष्ठति या सा स्वस्था। स्व—स्था + क—कर्त्तरि, न स्वस्था—नञ् तत्।

प्रमादः—प्र - मद + घञ्। 'प्रमादोऽनवधानता'—अमरः।

दीपसहायाम्—दीपः सहायः यस्याः—बहुव्रीहिः, ताम्।

अवसुप्ता—अव - स्वप + क्त—कर्त्तरि।

अन्यासनपरिग्रहेण—इती ३या। अन्यत् आसनम्—कर्म्मधारय, तस्य परिग्रहः—६तत्, तेन। परिग्रह is here used in the sense of आदान i. e. ग्रहण। 'पत्नी-परिजनादान-मूल-शापाः परिग्रहाः'—अमरः।

किं नु खलु &c.—V*a*savadatt*a* was peculiarly gladdened by the touch of Udayana (whose presence she did not know) owing to the mysterious working of the mind partly based on her past experience.

उपविशन्त्या:—Adj. to मे। उप—विश—शतृ + ङीप्।

प्रह्लादितम्—प्र – ह्लाद + क्त—कर्त्तरि। Adj. to हृदयम्।

दिष्ट्या—Luckily, happily. Adverb. अव्यय।

अविच्छिन्नसुखनि:श्वासा—Adj. to पद्मावती understood। वि – छिद् + क्त – कर्मणि = विच्छिन्न ; interrupted. न विच्छिन्ना—नञ्तत्, अविच्छिन्ना: सुखा: नि:श्वासा यस्या: सा—बहुव्रीहि:।

निवृत्तरोगया—Adj. to पद्मावत्या understood. निवृत्त: रोग: यस्या:—बहुव्रीहि:, तया।

एकदेशसंविभागतया—हेतौ ३या। एक: देश:—कर्मधारय:, एकदेश: संविभाग: यस्य तत् एकदेशसंविभागम् (शयनीयम्)—बहुव्रीहि:, तस्य भाव: इति तल्प्रत्यय: ; तया।

सूचयति—The Nom. is पद्मावती understood.

Remarks—Madhukarik*a* had gone away to fetch the ointment for Padm*a*vat*i*. So, there was none to supply any information to V*a*savadatt*a*. As the light was dim [See Text page **117**], V*a*savadatt*a*, fully convinced of the presence of Padm*a*vati in that room, had not the slightest apprehension that there might by any other person on the bed. Moreover, as the weather was chilly ['अतिशीतला खलु वेला'—page **124**], the king probably had his body well coverd. All these contributed to V*a*savadatt*a*'s mistake.

Rhetoric.—Here we see the नायक and the नायिका united together for the time being—the object of the plot is, as if fulfilled, after which there is to come an obstruction to the achievement of the final result. This is called the गर्भसन्धि of the drama. Def.—

'फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहु: ॥" सा. द.

Pages 128—129.

Sans. Expl.—('स्वप्नायते' स्वप्नवान् भूत्वा वदति)...'हम् आर्यपुत्रः' कण्ठस्वरेण राजानं ज्ञात्वा वासवदत्ता आह इति बोद्धव्यम्...'दृष्टा अस्मि' आर्यपुत्रेण इति शेषः... 'प्रतिज्ञाभारः' वत्सराजस्य राज्योद्धरणरूपः सङ्कल्प इत्यर्थः [अस्य च सिद्धिः वासवदत्तायाः प्रच्छन्नवर्त्तनेन एव लभ्या इति स्मर्त्तव्यम्] 'मम दर्शनेन' वत्सराजकर्त्तृकेण इति शेषः 'निष्फलः संवृत्तः' व्यर्थः जातः।...'दिष्ट्या स्वप्नायते' इति सुप्तं राजानम् उपलभ्याह... 'इष्टं हृदयस्य तोषयामि' नयनं चित्तं च प्रीणयामि, आर्य्यपुत्रदर्शनेन इति शेषः।... 'प्रियशिष्ये' वीणावादनकलायां सुनिपुणे शिष्ये।...'प्रतिवचनम्' प्रत्युत्तरम्।... 'आलपामि' कथयामि [राजा स्वप्नायते इति प्रत्ययादेव प्रतिवचनं यच्छति इति बोद्धव्यम्]।

Notes

स्वप्नायते—स्वप्न+अच्—अस्त्यर्थे इति स्वप्नः (=स्वप्नवान्), स्वप्न इव आचरति इति स्वप्न+क्यङ्+लट् ते। The sense of इव is not to be insisted upon.

प्रतिज्ञाभारः—प्रतिज्ञायाः भारः—६तत्।—The vow of recovering the kingdom of Vatsaraja which depended on Vasavadatta's living *incognito*, as otherwise Darsaka would be estranged from Udayana owing to the existence of a co-wife of his sister Padmavati. भृ+घञ् (कर्म्मणि) =भारः ; [भृ+अप् =भरः]।

दर्शनेन—इेतौ ३या।

निष्फलः—नास्ति फलं यस्य सः—बहुव्रीहिः।

प्रियशिष्ये—प्रिया शिष्या—कर्म्मधारयः, तत्सम्बोधने। For the शिष्यत्व, see page 33. (Text).

Rhetoric.—In हा वासवदत्ते etc. there is the dramatic peculiarity called आक्रन्द। 'आक्रन्दः प्रलपितं शुचा'—सा. द.।

Pages 130—131.

Sans. Expl.—'कुपिता' क्रुद्धा [वक्ष्यमाण-विरचिकानुरागस्मरणात्] 'दुःखिता' तव दुःखेन अहमपि दुःखाभिभूता इत्यर्थः... 'न अलङ्कृता' भूषणैः मण्डिता...। 'अतः परम्' मम दुःखात् अन्यत् 'किम्' अपरं कारणं नास्ति इत्यर्थः।...'विरचिकाम्' तन्नाम्नीं कामपि सपत्नीस्थानीयां नारीम्...'आः अपेहि' इति कोपोक्तिः 'इहापि विरचिका' राजगृहे विशेषतः पद्मावती-समीपे विरचिकायाः नामापि न कर्त्तव्यम् इत्यभिप्रायः।...

'विरचिकार्थम्' विरचिकासम्बद्धापराध-क्षालनार्थम् 'प्रसादयामि' अनुनयनामि।...शय्या-प्रलम्बितं प्रसारणात् शय्यायाः बहिः पतितं...'शयनीये'आरोग्य-शय्यायाः उपरि 'आरोप्य' संस्थाप्य ('सहसा उत्थाय' निद्राविलाच्च एव इति बोद्धव्यम्)...'तिष्ठ तिष्ठ' इति वासवदत्तानु- गमनचेष्टा, 'हा धिक्' इत्यनेन च चेष्टावैफल्यं सूच्यते।

Notes

आलपामि &c.—This was evidently uttered in a suppressed voice.

अलङ्कृता—Adj. to understood. अलम् – कृ + क्त – कर्त्तरि।

कथं नालङ्कृता—This was seen by the king in his 'vision.'

इतः—५मी in connection with परम् by the rule 'अन्यारादितरर्त्ते etc.' इतः refers to दुःख contained in the word दुःखिता above. Some take it to refer to Udayana meaning thereby that the husband is the best and and most valuable ornament of a chaste wife. But that explanation will not tally with the king's query below.

विरचिका—विरचिका (or विरचिता) was an attendant of the harem (राजान्तःपुरचारिका) with whom Udayana was secretly in love. The queen came to know of this and had to be conciliated by the king by clinging to her feet.

सोऽपि वत्सेश्वरो जातु चपलं पूर्वसंगताम्।
गुप्तं विरचितां नाम भेजेऽन्तःपुरचारिकाम्॥
तद्गोत्रस्खलिते देवीं पादलग्नः प्रसादयन्।
लेभे सुभगसाम्राज्यमभिषिक्तः तदश्रुभिः॥

—कथासरित्सागर 11. 6. 65-66.

विरचिकार्थम्—Adj. विरचिकायै इदम् यथा स्यात् तथा—नित्यसमासः।

शय्याप्रलम्बितम्—Adj. to हस्तम्। शय्यायाः प्रलम्बितम्—५तत्।

Rhetoric.—In वासवदत्ते ! तिष्ठ तिष्ठ etc. there is the dr. peculiarity called पारसर्प। इष्टनष्टानुसरणं परिसर्पश्च कथ्यते'—सा. द.।

Page 131. Sloka 7.

Sans. Expl.—'सम्प्रेण' त्वरया 'निष्क्रामन्' बहिर्गच्छन्, वासवदत्ताम् अनुसर्तुं-मिति शेषः 'द्वारपक्षेण' गृहद्वारफलकेन 'ताड़ितः' व्याहतः अभूवम् [वासव-

दत्तामनुसरन्ती मे गतिर्द्वारपक्षे ण व्याहता इत्यर्थः]। 'ततः' तस्मात् कारणात् 'अयं मनोरथः' वासवादत्ता जीवति इति मे मनसः कल्पना 'भूतार्थः' यथार्थः [न वा इति] 'व्यक्तं' स्फुटं 'न जानामि' नावगच्छामि। [वासवदत्ता मां स्पृष्टवती इति मेऽनुभूतिरभूत्, ततः ताम् अनुसर्त्तुकामस्य मम गतिर्द्वारपक्षेण प्रतिरुद्धा। अतः सम्यक् न जानामि सा सत्यं जीवति न वेति इत्यर्थः] ॥ ७ ॥

Notes.

निष्क्रामन्—Adj. to अहम्। निस् – क्रम + शतृ।

सम्भ्रमेण—प्रहृत्यादित्वात् ३या। Or, ३या with सह understood.

मनोरथः—Nom. of भवति understood. मनसः रथः (रथ इव इत्यर्थः)—इतत्।

भूतार्थः—विधेय to the उद्देश्य-word 'मनोरथः'। भूतः अर्थः—कर्मधारयः।

व्यक्तम्—Adverb. Neuter by the rule 'सामान्ये नपुंसकम्'। वि—अञ्ज + क्त – कर्मणि।

Rhetoric.—In the absence of any वैचित्र्य, it is needless to pick out the elements of the figures of speech काव्यलिङ्ग or स्वभावोक्ति। The dr. peculiarity called प्रतिषेध exists here, 'ईप्सितार्थ-प्रतीघातः प्रतिषेध इतीष्यते'—सा. द.।

Page 132 —133. Sloka 8.

Sans. Expl.—'प्रतिबुद्धः' जागरितः...'प्रियम् आवेदये' प्रियवार्त्तां विज्ञापयामि, 'धरते' जीवति...। 'अविहा' खेदे...'चिरात् खलु उपरता' चिरकालात् प्रागेव मृता 'मा मैव'' वासवदत्ता मृता इति मैवं वादीः इत्यर्थः। [वासवदत्ता जीवति इति प्रमाणयितुमाह—शय्यायामित्यादि —'सखे हे वयस्य, 'शय्यायां' अत्र शयनीये 'अवसुप्तं' निद्रितं 'मां बोधयित्वा' विनिद्रं मां कृत्वा 'गता' इतः प्रस्थिता, वासवदत्तेति शेषः। '[सा] दग्धा' लावाणके अग्नौ विलुप्ता 'इति ब्रुवता' एतत् वाक्यं कथयता 'रुमण्वता' तदाख्येनामात्येन [अहं] 'पूर्वं' प्राक् 'वञ्चितः अस्मि' प्रतारितोऽस्मि। अत्र निद्रितं मां विबोध्य वासवदत्ता निर्गताभूत्। रुमण्वान् यदाह प्राक् सा लावाणके दग्धेति तदसत्यम् इति स्फुटार्थः ॥८॥

...'असम्भावनीयम् एतत्' वासवदत्ता भवन्तं बोधयित्वा गता इत्येतत् न सम्भवति। 'आ' प्रकृतार्थं स्मरणसूचकम् अव्ययम् 'उदकस्नान-सङ्कीर्त्तनेन' उज्जयिनीकथावसरे तत्रत्य रम्यस्नानतीर्थनामग्रहणात् इत्यर्थः 'तत्रभवती' वासवदत्ता 'चिन्तयता' मनसि स्मरता 'सा स्वप्ने दृष्टा भवेत्' [अन्योऽपि यद् यत् भृशं मनसि आलोचयति स्वप्नेऽपि तत्तदेव पश्यति, भवतोऽपि तथाभूदित्याशयः]।

Notes.

प्रतिबुद्धः—प्रति – बुध + क्त—कर्त्तरि।

धरते—When meaning 'to live,' the root is तुदादि – आ, giving म्रियते। But Bhasa often uses it as भ्वादि – परस्मै ; cf. 'हतेषु देहेषु गुणा धरन्ते'—कर्णभार ; also 'धरते तावत् &c.'—प्रतिज्ञा-यौगन्धरायण Act I.

आवेदये—आ – विद् + णिच्—लट् ए।

चिरात्—अव्यय। We would take the विभक्ति as ५मी in connection with प्राक् to be understood, or सम्बन्धे ६ष्ठी।

उपरता – उप + रम + क्त—कर्त्तरि।

असम्भावनीयम्—सम्—भू + णिच् + अनीय – कर्मणि। न सम्भावनीयम्—नञ् तत्।

उदकस्नानसङ्कीर्त्तनेन – हेतौ ३या। उदके स्नानानि—७तत् [see notes on page 120], तेषां सङ्कीर्त्तनम्—६तत्, तेन।

भवेत् – सम्भावनायां लिङ्।

Ch. of Voice.—···[तया,] गतम्।...[मया] वञ्चितेन भूयते।

Remarks.—Here V*a*savad*a*tt*a* is regained by Udayana in his *dream*. Hence the name of the drama is स्वप्नवासवदत्तम्। 'नाम कुर्य्यान्नाटकस्य गर्भितार्थ-प्रकाशकम्'– सा. द.। [See page 1, Notes].

Page 134. (Sloka 9.)

Sans. Expl.—'एवम्' किमित्यमेव वस्तु ? 'मया स्वप्नः दृष्टः' अपि स्वप्ने मया वासवदत्ताप्राप्तिरनुभूता, न तु तत्त्वतः सा मया दृष्टा।

यदि तावदित्यादि। 'अयं तावत्' वासवदत्तादर्शनावस्थाविशेषः 'यदि स्वप्नः [भवेत्]' मम स्वप्नावस्था चेत् भवेत् [तदा] 'अप्रतिबोधनम्' अजागरणम् स्वप्नावस्थायाः अपरित्यागः इत्यर्थः 'धन्यम्' श्लाघ्यं भवतीति शेषः। 'अथ' तथा च 'अयं वा [यदि]', 'विभ्रमः स्यात्' मनसो भ्रान्तिर्भवेत्,[तदा['मे विभ्रमः' सा एव मे भ्रान्तिः 'चिरं हि अस्तु' यावज्जीवम् एव आस्ताम् [मेव भ्रमोऽपगमत् कदापि इत्यर्थः] ॥९॥

...'यक्षिणी' मानवेतरजातीया देवयोनिविशेषकुलोद्भवा स्त्री [अतः वासवदत्तावत् सौन्दर्य्यशालिनी]। 'सा' अवन्तिसुन्दरी [अतः अवन्तिदेशीयनारीवत् परिच्छदधारिणी] 'त्वया दृष्टा भवेत्' अतः मन्ये वासवदत्ता तव दृष्टिपथमागता इति।

Notes

धन्यम्—धन + यत् by the rule 'धनगणं लब्धा'। Adj. to अप्रतिबोधनम्।

अप्रतिबोधनम्—प्रति – बुध + णिच् + ल्युट्—भावे = प्रतिबोधनम्; न प्रतिबोधनम् —नञ् तत्।

विभ्रमः—विशिष्टः भ्रमः—प्रादितत्। 'विभ्रमो भ्रान्तिहावयोः'—मेदिनी।

यक्षिणी—यक्षः (= पूजा) अस्ति अस्याः इति यक्ष + इनि + ङीप्। यक्षस्य स्त्री gives यक्षी which is more common. यक्षिणी seems to have been coined on ths analogy of इन्द्राणी, भवानी, &c. For a similar form cf. ब्रह्माणी which does not come under the rule, 'इन्द्र-वरुण &c'. यक्षिणी here refers to आवन्तिका (वासवदत्ता)। The name अवन्तिसुन्दरी indicates that she is dressed like a lady of Avanti, and the epithet यक्षिणी indicates that she may be as beautiful as Vasavadatta. So, the king may mistake her for Vasavadatta.' Evidently, the king and his friends were not in possession of even the available history of आवन्तिका। विदूषक knew her to be a यक्षिणी।

Rhetoric.—In यदि तावत् etc. the fig. of speech is अनुकूल। Def.—'अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत्'—सा. द.।

Metre—अनुष्टुप्।

Ch. of voice.—...अनेन स्वप्नेन [भूयते]...अप्रतिबोधनेन धन्येन [भूयते अनेन...विभ्रमेण भूयेत...विभ्रमेण...भूयताम्।

Pages 135—Sloka 10.

Sans. Expl.—[न वासवदत्तासदृशी कापि किन्तु वासवदत्तैव मया दृष्टा इत्याह—स्वप्नस्यान्ते इत्यादि]। 'स्वप्नस्य' निद्रायाः 'अन्ते' समाप्तौ 'विबुद्धेन' जागरितेन मया 'चारित्रम् अपि' शीलम् अपि, न केवलं शरीरम् प्राणान् वा 'रक्षन्त्याः' धारयन्त्याः, वासवदत्ताया इति शेषः 'नेत्रविप्रोषिताञ्जनं' नेत्राभ्यां चक्षुर्भ्यां विप्रोषितं परित्यक्तम् अञ्जनं कज्जलं यस्मिन् तत्, कज्जल-विहीनचक्षुर्युक्तम् इत्यर्थः 'दीर्घालकं' मुक्तदीर्घकेश' 'मुखं' वदनम् 'दृष्टं' प्रत्यक्षीकृतम्। [विरहव्रतानुकूलं भूषण-केशसंस्कारादिवर्जनं कृत्वा आत्मनः सच्चरित्रमपि पालयन्ती सा मया दृष्टा। सम्भवति देहसादृश्यं किन्तु देहस्वभावयोः सर्व्वत्र सर्व्वथा सादृश्यं सुदुर्लभमेव इति भावः] ॥१०॥

Notes.

विबुद्धेन—Adj. to मया understood, वि—बुध + क्त—कर्त्तरि।

चारित्रम्—Obj. of रक्षन्त्याः। चरित्रम् एव चारित्रम्। चरित्र + अण्।

रक्षन्त्याः—Adj. to वासवदत्तायाः understood.

अपि—Here used in the sense of समुच्चय। Not only life but character also. 'गर्हा-समुच्चय-प्रश्न-शङ्का-सम्भावनास्वपि'—अमरः।

नेत्रविप्रोषिताञ्जनम्—Adj. to मुखम्। वि – प्र – वस + क्त—कर्त्तरि = विप्रोषित। नेत्राभ्यां विप्रोषितम्—५तत्, तादृशम् अञ्जनं यस्मिन् तत्—बहुव्रीहिः।

दीर्घालकम्—Adj. to मुखम्। दीर्घाः अलकाः यस्मिन् तत्—बहुव्रीहिः। 'अलकाश्चूर्णकुन्तलाः' इत्यमरः। The word is also neuter; cf 'हस्ते लीलाकमलम् अलकं बालकुन्दानुविद्धम्'—Megha-duta.

Rhetoric.—The fig. of speech is (पदार्थहेतुकं) काव्यलिङ्गम्। नेत्रविप्रोषिताञ्जनत्व is the हेतु of चारित्र-रक्षण।

Metre—अनुष्टुप्।

Ch. of voice.—…विबुद्धः [अहम्]…नेत्रविप्रोषिताञ्जनं दीर्घालकं मुखम् दृष्टवान्।

Page 135.—Sloka 11.

Sans. Expl.—[न केवलं वासवदत्ता दृष्टा तस्याः स्पर्शोऽपि अनुभूतः इत्यत्र प्रमाणमाह—योऽहम् इत्यादि] 'सन्त्रस्तया' भीतया प्रबुद्धयेत् तामहं धरामि इति त्रासवत्या इत्यर्थः 'तया देव्या' वासवदत्तया 'निपीडितः' हस्तेन गृहीतः 'यः अयं' तव प्रत्यक्षः (मे) 'बाहुः' 'स्वप्ने अपि' निद्रावस्थायाम् अपि 'उत्पन्नसंस्पर्शः' जातसम्पर्कः, दृष्टः इत्यर्थः 'रोमहर्षं न मुञ्चति' रोमाञ्चं न त्यजति। (अतः सत्यमेव तया अहं स्पृष्टः इत्यभिप्रायः) ॥११॥

Notes.

सन्त्रस्तया—Adj. to देव्या। सम् – त्रस – क्त—कर्त्तरि।

उत्पन्नसंस्पर्शः—Adj. to बाहुः। उत्पन्नः संस्पर्शः यस्य सः—बहुव्रीहिः।

रोमहर्षम्—Obj. to मुञ्चति। रोम्णां हर्षः—६तत्, तम्।

Remarks.—In giving expression to a similar feeling भवभूति in his उत्तरराम-चरित (Act III) has spent more than half a dozen verses running into extremes while भास has simply touched the point leaving the major portion to be supplied by the reader. See Intro.

Metre—अनुष्टुप्।

Ch. of voice.—…निपीडितेन येन अनेन बाहुना…उत्पन्नसंस्पर्शेन…. रोमहर्षः…मुच्यते।

Sans. Expl.—[अथ नायकस्य मनोऽन्यविषयाकृष्टं कर्तुं वयस्यः आह—मेदानीमित्यादि] 'मा इदानीं' नैव सम्प्रति 'भवान्', कर्त्ता 'अनर्थं' चिन्तयित्वा' निरर्थकं चिन्तयेत् इत्यर्थः ।......'चतुःशाल' प्रविशाव:' अभ्यन्तर-चतुःशालं गच्छावः, तत्र पद्मावत्यवस्थानस्य सम्भवात् इत्यभिप्रायः । [अथ पद्मावतीपरिणयसम्भूतम् उदयनस्य राज्योद्धरणफलहेतुभूतम् अभ्युदयं विज्ञापयितुं प्रविश्य काञ्चुकीयोपि निवेदयति—जयत्वित्यादि]...'आर्य्यपुत्र:' पद्मावतीसम्बन्धेन मगधराजस्य काञ्चुकीयोऽपि इत्थम् एव अभिधत्ते ।...'महता बलसमुदयेन' विशालेन सेनासमूहेन 'उपयातः' समुपगतः... 'आरुणिम् अभिघातयितुम्' आरुणिनामानं वत्सराज्यग्रावलयितारम् उदयनस्य शत्रुं निर्मूलयितुम् । 'हस्त्यश्वरथपदातीनि' हस्तिभिः अश्वैः रथैश्च सह विद्यमानाः पदातयः येषु तानि 'मामकानि' मदीयानि 'विजयाङ्गानि' शत्रुजयस्य उपकरणानि 'सन्नद्धानि सज्जितानि, (सर्व्वाङ्गपुष्टा मम सेना अपि त्वच्छत्रुम् आक्रमितुम् उद्युक्ता इत्यर्थः)... 'उत्तिष्ठतु' शत्रुजयार्थं कृतोद्यमः भवतु...।

Notes.

मा...चिन्तयित्वा—For this mannerism, see Notes on मा अन्यत् चिन्तयित्वा—Act III.

आर्य्यपुत्रः—Like the princess, the chamberlain of Magadha also so addresses Udayana.

उपयातः—He is proceeding against आरुणि via Magadha.

आरुणिम्—*A*runi was evidently one of Udayana's enemies who had taken possession of the major part of the kingdom of Vatsa. His name does not occur in any of the accounts. In mentioning his name Bh*a*sa has probably drawn upon his own personal knowledge. It seems that Bh*a*sa was almost contemporaneous with these events. See our Notes on दर्शक—Act I.

अभिघातयितुम्—अभि - हन + णिच् + तुमुन् । The णिच् is स्वार्थे by the rule (गणसूत्र) 'हन्त्यर्थाश्च' ।

हस्त्यश्वरथपदातीनि—Adj. to विजयाङ्गानि । हस्तिनश्च अश्वाश्च रथाश्च इति हस्त्यश्वरथम्—समाहार-द्वन्द्वः (by the rule 'द्वन्द्वश्च प्राणि-तूर्य्य-सेनाङ्गानाम्'), तद्युक्ताः पदातयः येषु तानि—बहुव्रीहिः । पादाभ्याम् अतति इति पदातिः ; पाद - अत + इण (औणादिकः) by the rules 'अज्यतिभ्याम्' 'पादे च' । पाद becomes पद by the rule 'पादस्य पद आज्यातिगोपहतेषु' ।

मामकानि—मम इमानि इति मामकानि। अस्मद्+अण्। The forms तवक and ममक are ordered in the place of the singular of युष्मद् and अस्मद् respectively, before the affixes अण् and खञ् [and युष्माक and अस्माक in the plural number]. The rule is 'तवक-ममकावेकवचने'।

विजयाङ्गानि—Obj. of सन्नद्धानि। विजयस्य अङ्गानि—ष्तत्।

सन्नद्धानि—सम्-नह+क्त—कर्म्मणि। 'नह बन्धने' इति धातुः। Conj.—नह्यति, नह्यते; ननाह, नेहे; नत्स्यति, नत्स्यते; अनात्सीत्, अनद्ध।

उत्तिष्ठतु—More properly should have been आत्मनेपदी by the rule 'उदः अनूर्द्धकर्म्मणि'।

Rhetoric.—The dr. peculiarity is प्रोत्साहन। 'प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम्'—सा. द.।

Page 137. Sloka 12.

Sans. Expl.—[अत्र जये यद्यत् प्रागेवानुष्ठितं तत्तदाह—भिन्नास्त इति]। 'ते रिपवः' तव शत्रवः 'भिन्नाः' भेदोपायेन परस्परं विश्लिष्टाः, 'भवद्गुणरताः' तव गुणेषु आसक्ताः 'पौराः' पुरवासिनः 'समाश्वासिताः' शीघ्रमेव त्वं राजा भविष्यसि इति आश्वासवाक्येन उत्साहिताः, 'भवत्प्रयाणसमये' तव युद्धयात्राकाले 'या अपि पार्ष्णी' सैन्यस्य यः पश्चाद्भागः [शत्रूणाम् आक्रमणात् रक्षणीयः] 'तस्याः' पार्ष्ण्याः 'विधानं कृतम्' रक्षणोपायः विहितः, 'यत् यत् अरिप्रमाथजननम्' यदेव किञ्चित् शत्रुनाशकारकम् 'साध्यं' करणीयं तत् सर्व्वमेव 'मया अनुष्ठितं' मया कृतम् [शत्रुनाशस्य सर्व्व एव उपाया मया विहिता इत्यर्थः] 'बलैः चापि' तथाच सैन्यैः 'विपथगा नदी' गङ्गानदी 'तीर्णा' अतिक्रान्ता, 'वत्साः च हस्ते' अतः वत्सदेशः अधुना तवैवाधिकारे वर्त्तते इत्यर्थः॥ १२॥

Notes.

भिन्नाः—भिद्+क्त—कर्म्मणि। Estranged [from one another by the application of the policy of dissension].

पौराः—Obj. of समाश्वासिताः। पुरे भवाः इति पौराः। पुर+अण्।

समाश्वासिताः—सम्-आ-श्वस+णिच्+क्त—कर्म्मणि।

पार्ष्णी—'पार्ष्णिः स्यादुभयदस्त्रियाम्। स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थाधरेऽपि च॥'—मेदिनी। पार्ष्णि (generally masc.), means 'the rear of an invading king.' Here the word has been taken as fem. Then add ङीष्। 'कृदिकारादक्तिनः' इति विकल्पेन ङीष्।

भवत्प्रयाणसमये —भवतः प्रयाणम्—६तत्, तस्य समयः—६तत्, तस्मिन्।

तस्या विधानं कृतम्—Cf. 'कृत्वा विधानं मूले तु यात्रिकं च यथाविधि। ...साम्परायिक-कल्पेन यायादरिपुरं शनैः॥—Manu VII. 184-5.

अरिप्रमाथजननम्—अरीणां प्रमाथः—६तत्, तस्य जननम्—६तत्, जन+णिच् + ल्युट्—कर्त्तरि = जनन।

तीर्णा—तृ + क्त—कर्म्मणि। Obj.—नदी।

त्रिपथगा—(i) त्रिभिः पथिभिः गच्छति या सा त्रिपथगा—उत्तर-पदद्विगुः by the rule 'तद्धितार्थोत्तरपदसमाहारे च' इति प्राचीनाः। Or (ii) (a) त्रयवयवः पन्थाः इति त्रिपथम्—मध्यपदलोपी; neuter by the वार्त्तिक-rule 'पथः संख्याव्ययादेः'; or (b) त्रयाणां पथां समाहारः इति त्रिपथम्; त्रिपथेन गच्छति या सा—उपपद-तत् इति नवीनाः (Bhattoji and others who are of opinion that समास with more than two members is allowed in cases of द्वन्द्व and बहुव्रीहि only and in cases of तत्पुरुष, only where the उत्तरपद is a परिमाणिन्)। त्रिपथ—गम + ड—कर्त्तरि। The three courses of the Ganga are—भोगवती in पाताल, अलकनन्दा in मर्त्त, and मन्दाकिनी in स्वर्ग। 'भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि'—अमरः।

Rhetoric.—The dr. peculiarity is उत्कीर्त्तन। Def—'... भूतकार्य्याख्यान-मुत्कीर्त्तनं मतम्'—सा. द.।

Metre.—शार्द्दूलविक्रीड़ित। See Act I. Sloka 3.

Ch. of. Voice.—रिपुभिः भिन्नैः [भूयते], भवद्गुणरतैः पौरैः समाश्वासितैः [भूयते]...यया...पार्ष्णिग्रा [भूयते]...विधानेन कृतेन [भूयते], येन येन अरिप्रमाथजननेन साध्येन [भूयते], तत् तत् अहम् अनुष्ठितवान्, बलानि... त्रिपथगां नदीं तीर्णवन्ति, वत्से....(भूयते)।

Page 138.—Sloka 13.

Sans. Expl.—'वाढम्' तथास्तु [इति महाराजस्य दर्शकस्य आदेशम् अङ्गीकृत्याह] 'अयम् इदानीं सम्प्रत्येव अहम् 'उपेत्य' गत्वा, रिपोरुन्मूलनाय इति शेषः, 'नागेन्द्रतुरङ्गतीर्णे' नागेन्द्राः हस्तिनः तुरङ्गाश्च तैः तीर्णे उत्तरणीये 'विकीर्ण-बाणोग्रतरङ्गभङ्गे' 'विकीर्णाः' निक्षिप्ताः 'बाणाः' शराः 'उग्राः' भीषणाः 'तरङ्गाणां' ऊर्म्मीणां 'भङ्गाः' खण्डा यस्मिन् तादृशे 'महार्णवाभे' विशालसमुद्रसदृशे 'युधि' युद्धे 'तं' प्रसिद्धं नृशंसं इति बोध्यम् 'दारुणकर्म्मदक्षम्' नृशंसकार्य्यकुशलम् 'आरुणि' तन्नामकं शत्रुम् 'नाशयामि' हन्मि॥ १३॥

Notes.

नागेन्द्रतुरङ्गतीर्णे—Adj. to युधि। नागेषु इन्द्राः (=श्रेष्ठाः)—७तत्, नागेन्द्राश्च तुरङ्गाश्च—द्वन्द्वः, तैः तीर्णः—७तत्,तस्मिन् ; यद्वा, तरति एभिः इति तीर्णानि, तॄ + क्त—करणे ; boats or ships. नागेन्द्रतुरङ्गाः तीर्णानि यस्मिन् सः—बहुव्रीहिः, तस्मिन् ।

दारुणकर्मदक्षम्—Adj to आरुणिम् । दारुणानि कर्माणि—कर्मधारयः, तेषु दक्षः—७तत् ।

विकीर्णबाणोग्रतरङ्गभङ्गे—Adj. to युधि । विकीर्णाः बाणाः—कर्मधारयः ; तरङ्गाणां भङ्गाः—६तत्, उग्राः तरङ्गभङ्गाः—कर्मधारयः ; विकीर्णबाणाः उग्रतरङ्गभङ्गाः यत्र—बहुव्रीहिः, तस्मिन् ।

महार्णवाभे—महान् अर्णवः—कर्मधारयः, स इव आभाति यः—उपपद-तत्, तस्मिन् । महार्णव—आ—भा + क—कर्तरि ।

युधि—अधिकरणे ७मी । 'सम्पराय: स्त्रियां संयत् समित्याजि-समिद्युधः'—अमरः । The base युध् is fem. but here it has been used in the masc. gender. [Similarly संयत् also in the masc. is sometimes met with ; e. g. 'रराज संयत्यतुलास्त्रगौरवे'—दण्डी] ।

Rhetoric.—The fig. of speech is उपमा depending upon the रूपक in the words नागेन्द्रतुरङ्गतीर्णे and विकीर्णबाणोग्रतरङ्गभङ्गे । The dr. peculiarity is द्युति । Def.—'तर्ज्जनोद्वेजने प्रोक्ता द्युतिः'—सा.द. ।

Metre.—उपेन्द्रवज्रा। Def.—उपेन्द्रवज्रा जतजास्ततो गौ ।

Ch. of voice—[अनेन मया]...स दारुणकर्मदक्षः आरुणिः नाश्यते ।

End of Act. V.

Act VI

[Scene—Palace gate at Kau*s*ambi]

Pages 140—141.

Sans. Expl.—'ततः प्रविशति काञ्चुकीयः "दूरात्मानं बधो युद्ध-राज्यदेशादि-विप्लवः ।...एभिर्वर्जितो नातिविस्तरः" [अङ्कः स्यात् इति] आलङ्कारिकवचनस्मरणात् पूर्वाङ्कान्तसूचितस्य इहावर्णितस्य युद्धस्य फलमिह मिश्रविष्कम्भद्वारेण ज्ञापयितुं महासेन-

प्रेरितः काञ्चुकीयः प्रविशति वत्सराजतोरणद्वारम् ।...'काञ्चनतोरणद्वारम्' वत्सराज-प्रासादस्य स्वर्णभूषितं बहिर्द्वारम् 'अशून्य' कुरुते' द्वाररक्षार्थम् अधितिष्ठति ।... 'निवेद्यतां' कथ्यताम् [कर्माधिक्यात् विरक्तिः] 'वत्सराज्यलाभप्रहृष्टोदयाय' वत्सराज्यस्य लाभेन अत्, इस्तात् समुद्धरणेन 'प्रहृष्टः' हृष्टिं गतः 'उदयः' समृद्धिः यस्य तस्मै ...'महासेनस्य सकाशात्' वासवदत्तापितुः समीपात् 'रैभ्य-सगोत्रः' रैभ्यनामधेयः....'प्राप्तः' आगतः... 'अङ्गारवत्या' महासेनराजमहिष्या वासवदत्तायाः, मात्रा 'प्रेषिता' प्रेरिता 'आर्या' मान्या इत्यर्थः 'वासवदत्ता-धात्री' वासवदत्ताया उपमाता 'प्रतीहारम्' उपस्थितौ' बहिर्द्वारम् आगतौ ।...'अदेशकालः' एतत् स्थानम् एव च समयः न उपयुक्त इत्यर्थः 'प्रतीहारस्य' दौवारिक-कर्त्तव्यस्य [अस्मिन् समये अत्र प्रतीहार्य्या राजा नैवोपगन्तव्य इत्यर्थः] ।

Notes. Pages 140—141.

काञ्चनतोरणद्वारम्—तोरण एव द्वारम्—कर्मधारयः, काञ्चनस्य तोरणद्वारम्—६तत् । 'तोरणोऽस्त्री बहिर्द्वारम्'—इत्यमरः ।

तोरणद्वारम् अशून्यम् &c.—To make some position अशून्य is to be at it with watchfulness. cf. 'त्वमपि स्वं नियोगम् अशून्यम् कुरु'—S'ak.

वत्सराज्य etc.—Adj. to उदयनाय। वत्सानां राज्यम्—६तत्, तस्य लाभः—६तत्, तेन प्रहृष्टः—३तत्, तादृशः उदयः यस्य—बहुव्रीहिः, तस्मै ।

रैभ्य-सगोत्रः—रैभ्येण or रैभ्यस्य सगोत्रः—३तत् or ६तत्, समानं गोत्रं यस्य स सगोत्रः—बहुव्रीहिः । समान becomes स by the rule 'ज्योति-र्जनपद &c.', 'गोत्रा भू-गव्ययो-र्गोत्रः शैले गोत्रं कुलाख्ययोः'—इति मेदिनी ।

अङ्गारवत्या—Nom. of प्रेषिता । अङ्गारवती (daughter of the demon named अङ्गारक) was the mother of V*a*savadatt*a*. चण्ड-महासेन had her as his wife through a boon from चण्डी । (He also received from the goddess a sword) :—

किं चाङ्गारवतीं नाम कन्यां त्रैलोक्यसुन्दरीम् ।
अङ्गारकासुरसुतां शीघ्रं भार्यामवाप्स्यसि ॥—कथासरित् 11. 3. 39.

See also Intro. Page 22.

प्रतीहारम्—Obj. of उपस्थितौ । प्रति—हृ+घञ्—अधिकरणे । 'उपसर्गस्य घञि अमनुष्ये बहुलम्' इति उपसर्गस्य दीर्घत्वम् । 'स्त्री द्वा र्द्वारं प्रतीहारः'—इत्यमरः । It means 'door.' Sometimes it means 'door-keeper'; cf. प्रतीहारस्य in the next line. Fem.—प्रतीहारी ।

उपस्थितौ—उपस्थिताश्च उपस्थितश्च इति उपस्थितौ—एकशेषः by the rule 'पुमान् स्त्रिया'।

अदेशकालः—देशयुक्तः कालः इति देशकालः—कर्मधारयः, न देशकालः—नञ्तत्।

प्रतीहारस्य—शेषे षष्ठी। प्रति—हृ+घञ्। See प्रतीहार above.

Pages 142—144.

Sans. Expl.—प्रतीहारस्य अदेशकालत्वहेतुमाह—शृणोत्वित्यादि।...'भर्तुः' प्रभोः उदयनस्य 'सूर्यामुखप्रासादगतेन केन अपि' सूर्यामुखनामान राजभवनविशेष' गतेन केन अपि जनेन 'वीणा वादिता'। 'तां च' तस्याः वीणायाः ध्वनिमित्यर्थः... 'भणित'' कथितम् 'घोषवत्याः' वत्सराजस्य प्रसिद्धा वीणा घोषवती नाम यस्यां न पुनः चिरपरिचयश्च लेभे खलु वासवदत्ता, तस्याः वीणायाः 'शब्द इव श्रूयते इति'।...'पृष्टः' जिज्ञासितः वीणावादकः इति शेषः...'आगमः' प्राप्तिः...'कुब्ज गुल्मलग्ना दृष्टा' कुब्ज-गुल्माभ्यन्तरे पतिता अवलोकिता। 'यदि प्रयोजनम् अनया' यदि एतया वीणया भर्तुः किमपि कार्यं साध्यते, 'उपनीयतां भर्त्रे'' महाराजाय उदयनाय दीयताम्—'उपनीता'' प्रापितां 'अङ्के कृत्वा' क्रोडे आरोप्य 'मोहं गतः' मूर्च्छां प्राप्तः...'मोहप्रत्यागतेन [भर्त्रा]' लब्धसंज्ञेन इत्यर्थः... 'वाष्पपर्याकुलेन मुखेन' अश्रुप्राविलेन वदनेन...'दृष्टा असि' पुनर्लब्धा भवसि इत्यर्थः...'सा खलु' त्वया सुचिरं लब्धपरिचया वासवदत्ता तु इत्यर्थः ...। 'आर्ये' इति काञ्चुकीय-सम्बोधनम् 'ईदृशः अनवसरः'। राज्ञः शोकप्राबल्यात् उपसर्पणकालाभावः...।...'इदम् अपि' आवयोरागमनम् अपि 'तदाश्रयमेव' वासवदत्ता-विषयकम् एव [अतः प्रस्तुतानुकूलमेव आवयोर्दर्शनं भविष्यतीत्यर्थः]. .'अवतरति' आगच्छति...'इह एव' प्रतीहारभूमावेव...।

Notes.

सूर्यामुखप्रासादगतेन—Adj. to केन। सूर्यः आमुखं (i. e. मुखं) यस्य सः सूर्यामुखः (=सूर्याभिमुखः)—बहुव्रीहिः; सूर्यामुखः प्रासादः—कर्मधारयः, तं गतः—२तत, तेन। The name of the palace was सूर्यामुख probably because it stood facing the East. Some account for the name by supposing that it had in its front a statue of सूर्या who is said to be the goddess of marriage. [सूर्य in fem. takes आप् meaning 'goddess' 'सूर्याद्देवतायां चाप् वक्तव्यः'। अन्यत्र—सूरी।] Ganapati cites श्रीधर and remarks that सूर्या may mean नवोढा। 'देवक्या सूर्यया सार्धम्'—भागवत। We quote him below :—

सूर्यामुखप्रासादगतेन सूर्यायाः नवोढायाः अर्थात् पद्मावत्याः मुखप्रासादं प्रासाद-

पुरोभागं गतेन, 'देवक्या सूर्यया सार्द्धम्' इति (भागव° स्क° १० अ° १) इति श्लोक व्याख्यायां सूर्य्यया नवोढ़या इति श्रीधरः। अथवा सूर्य्या विवाहदेवता, सा मङ्गलार्थं गजलक्ष्म्यादि-देवतावद् दारुशिल्पादुत्कीर्णा मुखे यस्य प्रासादस्य स सूर्य्यामुखप्रासादः, तं गतेन। एकाग्निकाण्डभाष्ये हि 'सूर्य्यां यः प्रत्यक्ष' विद्यात् स एतत प्रतिगृह्णीयात्' (का° १८।६) इति मन्त्रं व्याकुर्व्वन् हरदत्तमिश्रः 'सूर्य्या नाम विवाहदेवता' इत्याह।

N. B. The reading is not certain here. The different readings are—(i) सूर्य्यामुख ; but the आ is redundant, unless the word is सूर्य्या। (ii) शय्यामुख ; but this has no significance. (iii) सुयामुन meaning 'commanding an excellent view of the यमुना'। [यमुनायाः इदम् इति यामुनम्—view of the यमुना। सु (शोभनं) यामुनं यस्मात् सः सुयामुनः, सुयामुनः प्रासादः—कर्म्मधारयः]। This reading cannot be accepted if the scene is at लावाणक (as found in the कथासरित्सागर), because लावाणक is in the neighbourhood of मगध where there is no यमुना। But it is the best reading if the scene is at कौशाम्बी (which is near Allahabad). Bhasa's design seems to be the latter. cf. 'सम्बन्धि-राज्यमिदमेत्य &c.' (VI. 7) where इदम् may mean वत्सराज्य which has already been recovered (cf. 'वत्सराज्यलाभप्रहृष्टाय उदयनाय'—page 141). That उदयन had a palace named सुयामुन occurs (although in a different connection) in बृहत्कथाश्लोकसंग्रह of बुद्धस्वामी। सुयामुन-प्रासाद, there-fore, seems to be the actual reading.

घोषवत्याः—शेषे ६ष्ठी। घोषवती was the name of the famous lute ot उदयन which he got from Vasunemi, the brother of Vasuki, and by which he could tame elephants. Vasavadatta became expert in playing on this lute and was associated for a long time with it. Tbe lute was thus described by the snake-chief while it [illegible] given ot Udayana. "अङ्कमारोपितायां च तन्त्र्यो यस्यामनाहताः। मधुरं निस्वनेयुस्तां विद्याद् घोषवतीमिति" ॥ [घोषवती—sonorous].

It is not clear whether the king sent a man to the musician or, in his impatience, went to him personally.

कर्ण्णसुखमनोज्ञा—Adj. to वीणा। कर्णयोः सुखम्—६तत्, तस्मिन् ज्ञा—७तत्।

कूर्च means Kusa-grass.—'—कूर्चोऽस्त्री श्मश्रु पीठयोः । भ्रूमध्ये कत्थने दर्भे तन्तुवायपरिच्छदे ॥'—केशवः ।

अनया—३या (with the word प्रयोजनम्) being the करण of the verb साध्यते understood.

भर्त्रे—सम्प्रदान of उपनीयताम् (= दीयताम्) ।।

मोहप्रत्यागतेन—Adj to भर्त्रा । मोहात् प्रत्यागतः—५तत्, तेन ।

बाष्पपर्याकुलेन—Adj to मुखेन । बाष्पेण पर्याकुलम्—३तत्, तेन ।

मुखेन—उपलक्षणे ३या by the rule 'इत्थम्भूतलक्षणे' ।

तदाश्रयम्—सा (= वासवदत्ता) आश्रयः यस्य तत्—बहुव्रीहिः ।

उभौ—The two i.e. काञ्चुकीय and प्रतीहारी are meant ; perhaps वसुन्धरा does not appear on the scene.

मिश्रविष्कम्भक—A विष्कम्भक is a prelude appearing at the beginnning of an Act (or at the end of an Act) showing in short the connection of what has passed with and what is to come. It is either शुद्ध or सङ्कीर्ण (= मिश्र) । In a शुद्ध-विष्कम्भ, the conversation is purely in Sanskrit between one or more persons of an intermediate position in society (मध्यम पात्र) ; and in a मिश्रविष्कम्भ, the conversation is between one or more मध्यमपात्र speaking in Sanskrit and one or more नीचपात्र (low-class men) speaking in Prakrit

'वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः ।
शुद्धः स्यात्, सतु सङ्कीर्णो नीचमध्यमकल्पितः ॥

(Mixed interlude.)

Pages 144—Sloka 1.

[Scene—Palace at Kausambi]

Sans. Expl.—अथ वासवदत्ताविरहितां वीणामुद्दिश्याह—श्रुतिसुखेत्यादि "श्रुतिसुखनिनदे' हे कर्णानन्ददायकध्वनियुक्ते वीणे, 'कथं नु' केनैव हेतुना, 'देव्याः' वासवदत्तायाः 'स्तनयुगले' स्तनद्वयस्य उपरि 'जघनस्थले च' कटिदेशे च 'सुप्ता' निद्रिता, सुखेन स्थिता इति यावत् [त्वम् अधुना] 'विहगगण-रजोविकीर्णदण्डा' 'विहगगणस्य' पक्षिसमूहस्य 'रजोभिः' मलैः 'विकीर्णः' व्याप्तः 'दण्डः' प्रवालः यस्याः तादृशी सती 'प्रतिभयम्' अतित्रासजनकाम् 'अरण्यवासं' वने वसतिम् 'अध्युषिता असि' गृहीतवती

भवसि । पूर्व्वमनुभूत-सुखा त्वं किमर्थं वासवदत्तां त्यक्त्वा भयङ्करम् अरण्यम् आश्रितवती, सर्व्वथा अकारुण्यासि इति उपालभ्यसे इति भावः ॥१॥

Notes. Page 144

श्रुति-सुखनिनदे—सुखयति इति सुखः; सुख+णिच्+अच्—कर्त्तरि [पचादित्वात्]; श्रुत्योः सुखः—६तत्, तादृशः निनदः यस्याः—बहुव्रीहिः ; तत्सम्बोधने । नि-नद+अप्-भावे । Opt.—निनादः with घञ् by the rule—'नेः गद-नद-पठ-स्वनः' [वा अप्] । 'शब्दे निनाद-निनद-ध्वनि-ध्वान-रव-स्वनाः'—इत्यमरः ।

स्तनयुगले—अधिकरणे ७मी । स्तनयोः युगलम्—६तत्, तस्मिन् । 'युग्मन्तु युगलं युगम्'—अमरः ।

विहगगण etc—Adj. to त्वम् [=वीणा] understood. विहगानां गणाः—६तत्, तेषां रजांसि—६तत्, तैः विकीर्णः—३तत्, तादृशः दण्डः यस्याः सा—बहुव्रीहिः । विहायसा (आकाशेन) गच्छति इति विहायस्-गम्+ड by the वार्त्तिक-rule 'डे च विहायसो विहादेशो वक्तव्यः' । वि-कॄ+क्त—कर्म्मणि=विकीर्णं । The रजस् of the birds may mean 'the dirt carried by them.' [Some take it to mean their 'excretion'].

प्रतिभयम्—Adj to अरण्यवासम । भयं प्रतिगतम्—प्रादि-तत् । 'भयङ्करं प्रतिभयं रौद्रं तूग्रममी त्रिषु'—इत्यमरः ।

अरण्यवासम्—Obj. of अध्युषिता by the rule 'उपान्वध्याङ्वसः' । अरण्ये वासः—७तत्, तम् ।

अध्युषिता—Adj to त्वम् । अधि-वस+क्त—कर्त्तरि ।

Rhetoric.—The fig. of speech is विषम, as there is विरूपयोः सङ्घटना in the existence of the same वीणा under two contradictory circumstances. 'विरूपयोः संघटना या च तद्विषमं मतम्'—सा. द. । The dr. peculiarity is प्रतिषेध । Def—'इप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते'—सा. द. ।

Metre—पुष्पिताग्रा । Def.—'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' ।

Ch. of Voice…...सुप्तया (त्वया)—विकीर्णदण्डया…अध्युषितया भूयते ।

Page 145. Sloka 2.

Sans. Expl.—…'अस्निग्धा' कं इत्युक्ता इत्यर्थः ।…'तपस्विन्याः' दीनायाः वासवदत्तायाः तथा यामदाशे दग्धत्वात् इति बोद्धव्यम् । 'श्रोणीसमुद्वहन-पार्श्वनिपीडितानि' 'श्रोणी' वीणायाः स्थूलभागः, वक्षभागश्च तस्याः समुद्वहनानि

अङ्कदेशे स्थापनानि, तथा 'पार्श्वे' –[वीणादण्डस्य] पार्श्वदेशे 'निपीडितानि' अङ्गुलिभिः स्पर्शनानि 'खिन्नस्तनान्तरसुखानि' 'खिन्ने' श्रमसमये 'स्तनान्तरे' कुचयो र्मध्ये 'सुखानि' सुखकराणि 'उपगूहितानि' आलिङ्गनानि, 'विरहे च', विप्रलम्भे च, मम अदर्शने इत्यर्थः 'माम् उद्दिश्य' मां लक्ष्यीकृत्य 'परिदेवितानि' विलापवचनानि तव वादनेन ध्वनितानि इति शेषः, 'वाद्यान्तरेषु' वादनविरतिसमयेषु 'सस्मितानि' ईषद्धास्ययुक्तानि 'कथितानि च' वचनानि च 'स्मरसि' इति पूर्वेणान्वयः। श्रोणी-समुद्वहनादीनि चेत् अस्मरिष्यः कदापि तया नाभविष्यः त्वं वियुक्ता इति भावः। पूर्व्वमित्थं सञ्चालितापि त्वमधुना तया वियुक्ता वर्त्तसे इति ते अस्निग्धत्वम्।

Notes Page 145.

अस्निग्धा—Adj. to त्वम्। स्निह+क्त=कर्त्तरि=स्निग्ध। न स्निग्धा—नञ् तत्।

तपस्विन्याः—शेषे ६ष्ठी, the connection is with श्रोणीसमुद्वहन etc. in Sl. :'. तपस्+विनि-अस्त्यर्थे=तपस्विन्। 'मुनि-द्रोणी तपस्विनी'।

श्रोणीसमुद्वहन etc.—Obj. of स्मरसि। श्रोण्याः समुद्वहनानि—६तत्। नि—पीड़+क्त—भावे=निपीड़ितम् (=निपीड़नम्)। पार्श्वे निपीड़ितानि—७तत्; श्रोणीसमुद्वहनानि च पार्श्वनिपीड़ितानि च द्वन्द्वः। 'कटिः श्रोणी ककुद्मती',—अमरः'। श्रोणि or श्रोणी—means 'the hip' [here, the, the bulbous part of the lute]. Some would mean the श्रोणी and पार्श्व as belonging to the queen.

खिन्नस्तन etc.—Adj. to उपगूहितानि। सुखयन्ति इति सुखानि. सुख+णिच्+अच्। स्तनयोः अन्तरम्—६तत्, तत्र सुखानि—७तत्, खिन्ने स्तनान्तरसुखानि—७तत्।

उपगूहितानि—obj of स्मरसि। उप—गुह्+क्त—भावे। 'परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम्'—अमरः।

परिदेवितानि—Adj. to स्मरसि। परि—देव+क्त—भावे=परिदेवितम् (=परिदेवनम्)। 'विलापः परिदेवनम्'—अमरः।

वाद्यान्तरेषु—वाद्यानाम् अन्तराणि—६तत्, तेषु। अन्तर means 'intervening period.' 'अन्तरमवकाशावधि-परिधानान्तर्द्धि-भेद-तादर्थ्ये'—इत्यमरः।

सस्मितानि—Adj. to कथितानि। स्मितेन सह वर्त्तमानानि—बहुव्रीहिः।

Rhetoric.—the fig. of speech is स्वभावोक्ति।

Metre.—वसन्ततिलक। The last syllable, though short, is to be taken here as long by the dictum 'तथा पादान्तगोऽपि वा'। This will satisfy the requirements of the metre for which see Appendix.

Ch. of Voice.—[यया…ग्रर्थम्]—निपीड़ितानि etc.

Page 146.

Sans. Expl.—ग्रलम् इत्यादि ।…'ग्रतिमात्रम्' ग्रत्यर्थम्, ग्रतिसन्तापेन किमपि न लभ्यते इत्यर्थः ।…'मा एवं', वद इति शेषः । चिरप्रसुप्त इत्यादि । 'वीणया' घोषवत्या दर्शनेन इत्यर्थः 'मे' मम 'चिरप्रसुप्तः' चिरकालं यावत् निद्रितः, हृदि निलीय स्थितः इत्यर्थः 'कामः' वासवदत्ताप्रीतिः 'प्रतिबोधितः' जागरितः, पुनरुद्दीप्त इत्यर्थः । 'घोषवती' एतदाख्या वीणा 'यस्याः प्रिया' यस्याः ग्रनुरागास्पदम् 'तां तु देवीम्' वासवदत्तां 'न पश्यामि' । घोषवती पुनरपि लब्धा, वासवदत्ता तु नैव लभ्यते इत्यर्थः ॥७॥

…'शिल्पिजनसकाशात्' वाद्ययन्त्रनिर्म्मातृसमीपात् 'नवयोगां' नूतनैः तन्त्रीप्रभृतिभिः ग्रङ्गैः संयुक्ताम्…

Notes.

ग्रतिमात्रम् Adverb. ग्रतिक्रान्ता मात्रा यस्य बहुव्रीहिः ; or, मात्राम् ग्रतिक्रान्तम् प्रादिः ; तद् यथा स्यात् तथा ।

ग्रतिवेलभृशात्यर्थातिमात्रोद्गाढ़-निर्भरम् ।
तीव्रैकान्त-नितान्तानि गाढ़-बाढ़-दृढानि च ॥—इत्यमरः ।

सन्ताप्य—सम्—तप+ल्यप् । ल्यप् has been used in connection with ग्रलम् by the rule 'ग्रलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' ।

चिरप्रसुप्तः—चिरं प्रसुप्तः—सहसुपा । प्र—स्वप+क्त—कर्त्तरि ।

शिल्पिजनसकाशात्—शिल्पी एव जनः—कर्म्मधारयः, तस्य सकाशः—६तत्, तस्मात् ।

नवयोगाम्—नवः योगः यस्याः—बहुव्रीहिः ताम् । योग = adjustment.

Rhetoric,—The fig. of speech is रसवत् ('रसस्येतराङ्गत्वे रसवत्') owing to the existence of the रसs—श्रृङ्गार and करुण । Here the former is subordinate to the latter.

Metre.—ग्रनुष्टुप् ।

Ch. of voice.—वीणा…चिरप्रसुप्तं कामम् प्रतिबोधितवती । घोषवत्या… प्रियया [भूयते], सा…देवी…दृश्यते [मया] ।

Pages 147—149.

Sans. Expl—'वीणां गृहीत्वा निष्क्रान्तः' नवयोगकरणाय इति बोद्धव्यम् ।… 'प्रतीहारम् उपस्थितौ' द्वारदेशम् ग्रागतौ [See page 141]। 'तेन' महासेन-सकाशात् ग्रागतयोः दर्शनदानार्थं 'पद्मावती तावत् ग्राहूयताम्' तया सहैव तयो द्रष्टव्यत्वात् ।…'शीघ्रम्' ग्रविलम्बितम्, पद्मावतीपरिणयात् परम् एव इत्यर्थः, 'ग्रय'

वृत्तान्तः' पद्मावत्या उदयनस्य विवाहः...'श्रुतः' त्वयेति शेषः...'प्रियम्' आनन्दकरम् 'मे ज्ञातिकुलस्य' मम पितृकुलस्य. [वासवदत्तास्थानावस्थितत्वात् महासेनः पद्मावत्या पितेति उच्यते] 'कुशलवृत्तान्त" मङ्गलवार्ता 'श्रोतुम्' तस्य श्रवणम् इत्यर्थः, भवति इति शेषः।

Notes. Pages 147—149.

निष्क्रान्त—निस्-क्रम+क्त—कर्त्तरि। The jester now leaves the stage for good. In this drama विदूषकचरित being a पताका, the jester has nothing to do in the निर्वहण-सन्धि। 'व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते'—सा. द.। 'पताका नायकस्य स्यान्न स्वकीयफलान्तरम्। गर्भे सन्धौ विमर्षे वा निर्व्वाहस्तस्य जायते॥'—सा. द।

रैभ्यसगोत्र etc.—See notes—page 126.

आहूयताम्—आ-ह्वे+कर्म्मवाच्ये लोट् ताम्। Nom—त्वया, Obj—पद्मावती। In order to receive the guests come from Ujjayini to congratulate him. the king wishes himself to be accompanied by Padmavati, as she now steps into the shoes of Vasavadatta.

अयं वृत्तान्तः—The fact of his marriage with पद्मावती, which he did not expect to have reached महासेन so soon.

ज्ञातिकुलस्य—ज्ञातीनां कुलम्—६तत्, तस्य। ज्ञा+क्तिच्—कर्त्तरि। 'ज्ञाति-स्तातसगोत्रयोः'—मेदिनी। [ज्ञाति means तात (i. e. father) and सगोत्र (i. e. relative)]. Padmavati means to say that Vasavadatta's relatives are as dear to her own. [Note that the word ज्ञाति is masculine].

श्रोतुम्=श्रवणम्। The dictum is—'अव्ययकृतो भावे'। The तुम् is in connection with भवति (understood) the rule 'शक-धृष...अस्त्यर्थेषु तुमुन्'।

Pages 150—151.

Sans. Expl.—'अनुरूपम्' आभिजात्यादिगुणानां सदृशम्...'वासवदत्तास्वजनः' वासवदत्तायाः पित्रादिः...'आस्यते' उपवेशनं क्रियते।...'एतं' जनम् रैभ्यादिकं, वासवदत्तया सह उपविष्टेन दृष्टव्यं जनम् इत्याशयः [वासवदत्तायाः अभावे वरम् एकाकिनो राज्ञो दर्शनं न तु—तत्सपत्नीसहितस्य इति पद्मावत्याः मनसि ह्रीभावः वर्त्तते]।...'अत्र' त्वया सह उपविश्य समागतानां दर्शने...'अपरः परिग्रहः' अन्या

स्त्री...'उदासीनम् इव' निरपेक्षम् इव [द्रष्टव्यजनान् प्रति समादराभावसूचकं भवति इत्यर्थः]। 'कलत्रदर्शनार्ह' जन" यस्तु द्रष्टुमर्हति तादृशं जनम् 'कलत्रदर्शनात् परिहरति' पत्नीं न प्रदर्श्य वञ्चयति इत्यर्थः 'इति' एतदाचरणम् 'बहुदोषम्' महान्तम् अपराधम् 'उत्पादयति' जनयति ।...'तात: वा अम्बा वा' वासवदत्तायाः पिता महासेनः वा तन्माता अङ्गारवती वा [वासवदत्तासम्बन्धात् तौ पद्मावत्या अपि पितरौ इति बोद्धव्यम्] 'आविग्ना' सन्तप्ता...। 'एवमेतत्' तातो वा अम्बा वा किं वक्ष्यति इत्यतः उद्वेगकारणं वर्तते एव इत्यर्थः ।

Notes

अनुरूपम्—रूपस्य योग्यम्—अव्ययीभावः ।

परिग्रहः—'पत्नी-परिजनादान-मूलशापाः परिग्रहाः'—अमरः ।

उदासीनम्—उत् - आस + शानच् । आ becomes ई by the rule 'ईदासः' ।

कलत्रदर्शनार्हम्...कलत्रस्य दर्शनम्—इतत्, कलत्रदर्शनम् अर्हति इति कलत्रदर्शन - अर्ह + अच्—कर्त्तरि by the rule 'अर्हः' । This is in supersession of the rule 'कर्मण्यण्' । Therefore the fem is.... अर्हा instead of ....अर्ही । [Note that कलत्र (though meaning wife) is neuter]

N. B. पद्मावती is now in the postion of Vāsavadattā (who is no more). Through this relationship with the latter the कञ्चुकिन् and वसुन्धरा can reasonably claim पद्मावती to be their own. So, her wilful absence will certainly injure their feelings.

कलत्रदर्शनात्—अपादाने ५मी in connection with परिहरति (=वारयति) by the rule 'वारणार्थानाम् ईप्सितः' ।

आविग्ना—Adj. to अहम् understood. आ - विज + क्त—कर्त्तरि ।

Rhetoric.—In आर्यपुत्र, किं मया etc., there is the dr. peculiarity called 'अनुवृत्ति' । 'प्रश्रयादनुवर्त्तनम् अनुवृत्तिः'—सा. द. । In कलत्रदर्शनार्हम् etc., there is युक्ति । 'युक्तिरर्थावधारणम्'—सा. द.

Page 151.—152. Sloka 4.

Sans. Expl.—'किं वक्ष्यति' तातोऽम्बा वा किं भणिष्यति 'इति' विचिन्त्येति शेषः 'मे हृदयं' मम मनः 'परिग्लपितम्' उद्विग्नम्, भवति इति शेषः । 'मया अपि' 'कन्या' अनङ्गा एव दुहिता महासेनस्य इति शेषः 'अपहृता' चौर्येण आनीता, ननु तेन स्वं स्वया दत्ता इत्यर्थः, [अथ] 'न च' 'सा' वासवदत्ता 'रक्षिता' पालिता [अतः

तस्मिन् अहम् अत्यर्थम् अपराद्धः इत्यर्थः]। 'चलैः' अस्थिरैः 'भाग्यैः' भागधेयैः 'महदवाप्तगुणोपघातः' 'महति' पूज्यजने 'अवाप्तः' अनुष्ठितः 'गुणोपघातः' सदाचार-व्यतिक्रमः येन तादृशः अहम् गुरुजने कृतदोषोऽहम् इत्यर्थः, 'पितुः जनितरोषः' उत्पादितजनक-कोपः 'पुत्र इव,' 'भीतः अस्मि' [पितुः कोपम् उत्पाद्य यथा कश्चित् भीतः इव तिष्ठति तथैवाहं दैववशात् पूज्यस्य महासेनस्य समीपे कृतापराधः सन् भीत इव वर्त्ते इत्यर्थः] ॥४॥

Notes, Sloka 4.

वक्ष्यति—ब्रू + लृट् स्यति । Nom.—तातः अम्बा वा understood.

परिशङ्कितम्—परि – शङ्क + क्त—कर्त्तरि । Nom—हृदयम् ।

भाग्यैः—हेतौ ३या । 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः'—अमरः ।

महदवाप्तगुणोपघातः—Adj to अहम् understood. गुणस्य उपघातः—६तत्, महति गुणोपघातः—७तत् । Or, महत् is an adverb modifying भीतः अस्मि । The poet probably meant to connect महत् with गुणोपघात । We have followed that construction in the Eng. Transl.

पितुः—शेषे ६ष्ठी, having सम्बन्ध with रोष ।

जनितरोषः—जन + णिच् + क्त—कर्म्मणि = जनित । जनितः रोषः येन सः—बहुव्रीहिः । Here there is सापेक्षत्वेऽपि गमकत्वात् समासः ।

Rhetoric.—The figures of speech are काव्यलिङ्ग and उपमा ।

Metre—वसन्ततिलक ।

Ch. of voice.—किं वक्ष्यते [तेन]...हृदयेन परिशङ्कितेन [भूयते] अहम्... कन्याम् अपहृतवान्...तां रक्षितवान् ।...गुणोपघातेन [मया]...जनितरोषेण पुत्रेण... भीतेन भूयते ।

Pages 152—153.

Sans. Expl.—न किमित्यादि ।...'किम्' किमपि इत्यर्थः 'रक्षितु' ध्वंसात् निवर्त्तयितुम् 'प्राप्तकाले' विनाशसमये समागते इत्यर्थः । [विनाशकाले आगते कस्यापि रक्षा न भवति इत्यर्थः] ।...'काञ्चकीयः धात्री च' रैभ्यः वसुन्धरा... ।

Notes

प्राप्तकाले—अधिकरणे ७मी । प्राप्तः कालः—कर्म्मधारयः, तस्मिन् ।

Page 153 Sloka 5.

Sans. Expl.—सम्बन्धिराज्यमित्यादि । 'इदं सम्बन्धिराज्यम्' सम्बन्धिनः बान्धवस्य इदं राज्यं वत्सराज्यम् इत्यर्थः 'एत्य' आगम्य [मम] 'महान् प्रहर्षः' अतीव

आनन्दो भवति। 'पुनः' पश्चात्तरे 'नृपसुतानिधनं' श्रुत्वा' राजकन्यायाः वासवदत्तायाः मृत्युं मनसि कृत्वा [मम] 'विषादः' दुःखम् [अपि जायते]। 'दैवं' हे अदृष्ट, 'यदि' 'राज्यं' वत्सराज्यं 'परैः' शत्रुभिः 'अपहृतं स्यात्' बलात् गृहीतं भवेत् 'देव्याः च' वासवदत्तायाः च 'कुशलं' क्षेमं [स्यात्, तदा] 'किं नाम भवता न कृतम्' किम् एव हितं नानुष्ठितं भवेत्? [वत्सराज्यत्यागेन अपि यदि वासवदत्ता लभ्यते, तदा सोऽपि दैवस्य महान् अनुग्रहः स्यादित्यर्थः] ॥५॥

Notes.

सम्बन्धिराज्यम् – सम्बन्ध अस्य अस्तीति सम्बन्धी ; one matrimonially related ; सम्बन्ध + इनि। सम्बन्धिनः राज्यम्—६तत्।

नृपसुतानिधनम्—Obj. of श्रुत्वा। नृपस्य सुता—६तत्, तस्याः निधनम्—६तत्।

Metre.—वसन्ततिलक।

Ch. of Voice.—...महता प्रहर्षेण [भूयते] कृतव...देन। किम्...भवान्... विषान्...राज्येन अपहृतेन भूयेत...कुशलेन [भूयेत]।

Pages 154—155. Sloka 6.

Sans. Expl.—एष भर्त्त्यादि।...'भर्त्ता' प्रभुः उदयनः, 'उपसर्पतु' समीपं गच्छतु...'सबहुमानम्' प्रभूतसमादरपूर्व्वकम्। पृथिव्यामित्यादि। 'पृथिव्यां' जगति 'राजवंश्यानाम्' नृपवंशोद्भवानां 'उदयास्तमयप्रभुः' 'उदये' उन्नतिविधानविषये 'अस्तमये' च विनाशविषये च 'प्रभुः' समर्थः, निग्रहानुग्रहसमर्थः राजचक्रवर्त्ती इत्यर्थः; 'मया काङ्क्षित-बान्धवः' मया सह 'काङ्क्षितम्' अभिलषितं 'बान्धवं' बन्धुत्वं येन सः 'अपि' प्रश्ने 'स राजा' प्रसिद्धः नृपतिर्महासेनः 'कुशली' क्षेमवान् वर्त्तते। [इति काञ्चुकीय-समीपे उज्जयिनीराजकुशलप्रश्नः] ॥६॥

'अथकिम्' इत्यनेन कुशलज्ञापनम्।...'इह अपि' वत्सदेशे अपि 'सर्व्वगतं कुशलं' प्रतिजनस्थितं क्षेमम्...'किम् आज्ञापयति' इत्यनेन सबहुमानं वार्त्तां पृच्छति। 'सदृशम्' कुलशीलादीनाम् योग्यम् 'एतत्' आसनात् उत्थानं सविनयं सन्देशपृच्छा च 'वैदेही-पुत्रस्य' विदेहराजकन्यायाः पुत्रस्य तव।...'आसनस्थेन' उपविष्टेन...'सन्देशः' वार्त्ता।

Notes

सबहुमानम्—बहुः मानः—कर्म्मधारयः, बहुमानेन सह वर्त्तमानं यथा स्यात् तथा—बहुव्रीहिः।

राजवंश्यानाम्—शेषे ६ष्ठी। राज्ञां वंशाः—६तत्, तेषु भवाः इति राजवंश+ यत्, तेषाम्।

For curious students only :—

(i) राजवंशे भवः इति राजवंश्यः ; राजवंश+यत् by the rule 'दिगादिभ्यो यत्' in the sense of 'तत्र भवः'। But the difficulty is that वंश and not राजवंश occurs in the दिगादि list. वंश does not include राजवंश, because the तदन्तविधि is barred by the rule 'समास-प्रत्ययविधौ प्रतिषेधः'। The दिगादि group might, however, be regarded practically as an आकृतिगण।

(ii) राजवंश+यत् in the sense of 'तत्र भवः' by योगविभाग of the word भवे in the rule 'भवे छन्दसि'।

(iii) राजवंशे साधुः इति राजवंश्यः' राजवंश+यत् by the rule 'तत्र साधुः' cf. 'राजवंश्यादयः साध्वर्थे ये भवन्ति'—Vāmana. [ये = यत्-प्रत्यये]। But this is sacrificing sense to grammar.

(iv) वंशे भवाः वंश्याः ; राज्ञां वंश्याः।

उदयास्तमयप्रभुः—Adj. to राजा। उदयश्च अस्तमयश्च—द्वन्द्वः, तयोः प्रभुः—६तत् or ७तत्। इ+अच् (भावे)=अयः meaning गमनम्। अस्तम् (अव्यय) इत्यस्य अयः अस्तमयः—६तत्।

कुशली—कुशलम् अस्ति अस्य इति कुशल+इनि।

मया—(i) त्वया with सह understood, or (ii) मया is the अनुक्तकर्त्ता of काङ्क्षित।

काङ्क्षितबान्धवः—Adj. to राजा। बन्धोर्भावः बान्धवम्, बन्धु+अण्। (i) काङ्क्षितं बान्धवं येन सः—बहुव्रीहिः। The reference probably is to Mahāsena's earnest desire to have Udayana as his son-in-law. (ii) If that reference is not intended then we may also analyse the compound as—मया कर्त्रा काङ्क्षितं बान्धवं येन यस्य वा (according as the क्त in काङ्क्षित is in past or in present tense). N. B. बान्धव in tha sense of बन्धुत्व is seldom used. More generally it means 'a relation.' So the compound may be explained as मया काङ्क्षितः यः बान्धवः। But in this sense मम काङ्क्षितबान्धवः w?uld be a more natural expression.

सर्व्वगतम्—सर्व्वं गतम्—२तत्।

वैदेहीपुत्रस्य—विदेहेषु भवा वैदेही। विदेह+अण्+ङीप्। वैदेह्याः पुत्रः—६तत्, तस्य। मृगावती, the mother of उदयन, was a princess of अयोध्या

and not of विदेह। वैदेही might have been her नामान्तर। मृगावती was the daughter of कृतवर्म्मा, king of अयोध्या।

'याचितुं तां स कन्यां च तत्पितुः कृतवर्म्मणः।
अयोध्यां प्राहिणोद्दूतं कालक्षेपासहो नृपः॥ &c.

—कथासरित् II. I. &c.

Reference to the high lineage in such cases is very common with Bhasa.

यदाज्ञापयति महासेनः (उपविशति)—Udayana takes these words of the कञ्चुकिन् to be those of महासेन and resumes his seat probably because he cannot get up and sit down at the bidding of the कञ्चुकिन्।

Rhetoric.—The fig. of speech in पृथिव्याम् etc. is उदात्त। 'लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते'—सा. द.।

Metre.—अनुष्टुप्।

Ch of Voice—···प्रभुणा···काङ्क्षितशाश्वतेन...तेन राज्ञा कुशलिना [भूयते] ?

Page 156. Sloka 7.

Sans. Expl.—दिष्ट्येति महासेनस्य सन्देशमाह। 'दिष्ट्या' इति हर्षसूचकम् अव्ययम्। 'परैः अपहृतं' शत्रुभिः विजितं 'राज्यं' 'पुनः प्रत्यानीतम्' समुद्धृतम्। 'इति' हेतुबोधकम् अव्ययम्।

'कुतः' इति भाविनो महत्तरस्य अभ्युदयस्य सम्भावनां ज्ञापयति। तदेवाह—कातरेत्यादि। 'ये कातराः' ये अधीराः भवन्ति, [ये] 'अपि वा अशक्ताः' ये च अक्षमाः सामर्थ्यहीनाः भवन्ति, 'तेषु उत्साहः' उद्यमः 'न जायते' [धैर्य-सामर्थ्य-युक्तानामेव कार्येषूद्यमो भवति इत्यर्थः] 'सोत्साहैः एव' उद्यमशीलैः एव 'हि' अवधारणे, 'प्रायेण' बाहुल्येन 'नरेन्द्रश्रीः' राजलक्ष्मीः 'भुज्यते' अनुभूयते। [त्वं तु धैर्यसामर्थ्य-सम्पन्नः उत्साही इत्यतः राजलक्ष्म्या उपभोगम् अर्हसि इत्यर्थः] ॥७॥

Notes.

दिष्ट्या—'दिष्ट्या हर्षे शुभे भाग्ये'—शब्दाब्धिः। अव्ययम्, १मा। See P.81 ante.

इति—हेतौ अव्ययम्। 'इति हेतु-प्रकरण-प्रकाशादि-समाप्तिषु'—इत्यमरः।

कुतः—What follows is the हेतु of हर्ष mentioned in the previous sentence.

कातरा—'अधीरे कातरः'—अमरः।

उत्साहः—उत् – सह + घञ्—भावे।। 'उत्साहोऽध्यवसायः स्यात्'—अमरः।

प्रायेण—प्रकृत्यादित्वात् ३या । 'प्रायस्वानशने मृत्यौ तुल्य-बाहुल्ययोरपि' ।

नरेन्द्रश्रीः—Universal sovereignty. We take the expression in this extended sense so that the *cause* of हर्ष as indicated by कुतः may be prominent.

सोत्साहैः—उत्साहेन सह वर्त्तमानाः सोत्साहाः—बहुव्रीहिः, तैः ।

प्रायेण हि &c.—Cf. 'खड्गेनाक्रम्य भुञ्जीत वीरभोग्या वसुन्धरा'—इति पराशर-संहिता ।

Rhetoric.—The fig. of speech is अप्रस्तुत-प्रशंसा as the प्रस्तु fact 'you are so and so' is inferred from the अप्रस्तुत statement

Metre.—अनुष्टुप् ।

Ch. of voice.—यैः कातरैः, [यैः] अशक्तैः [भूयते]...उत्साहेन...अन्यते सोत्साहाः...नरेन्द्रश्रियम् भुज्यते ।

Sloka 8. Page 156.

Sans. Expl.—आर्येत्यादि ।...'सर्व्वम् एतत्' राज्योद्धरणादिकम्... । अहमित्यादि । 'अहं' 'पूर्व्वं' तावत् कृत्रिमगजप्रयोगावसरे 'अवजितः' नीतिबलात् गृहीतः अभवम्, [तेन महासेनेन] [अतो मम नयहीनत्वम्] । सुतैः सह तस्यात्मजैः सह, पुत्रवात्सल्येन इत्यर्थः 'दृढ़' लालितः' गर्भारम्भ इहपूर्व्वं पालितः । [न तु शत्रुबुद्ध्या घातित इति भावः] ; 'कन्या' महासेनस्य दुहिता, अनूढ़ा वासवदत्ता इति यावत् 'अपहृता' तद्राज्यात् अपवाहिता, मयेति शेषः [तत्कृतोपकारं न गणयित्वा प्रत्यपकारमेवाहं कृतवान् इति मम अकृतज्ञत्वम्] ; 'भूयः' तथा अपहृत्यापि इत्यर्थः 'मया न च रक्षिता' [इति मे नृशंसत्वम्] । [सत्सु अपि मयि एतेषु दोषेषु] 'तस्याः' वासवदत्तायाः 'निधनं च' मरणञ्च श्रुत्वा' अपि आकर्ण्यापि 'तथा एव' पूर्व्ववद् एव 'मयि स्वता' मां प्रति ममता, महासेनस्येति शेषः । 'ननु' वस्तुतस्तु 'उचितान् वत्सान्' स्वत्वानुसारेण मनैव प्राप्यं वत्सदेशं 'प्राप्तुम्' शत्रुभ्य उद्धर्त्तुं 'यत्' अशक्तवम् इति शेषः, यद्वा 'वत्सान् प्राप्तुम्' वत्सानां प्राप्तिरित्यर्थः, अभूत् इति शेषः ; 'अत्र हि' अत्र व्यापारे 'नृपः कारणम्' राजा महासेन एव हेतुः । महासेनप्रभावाद् एवायं मम अभ्युदयः, न तु मम शौर्य्यादिकादित्यर्थः ॥८॥

Notes.

प्रभावः—भू+घञ्—भावे=भावः । प्रकृष्टः भावः इति प्रभावः—प्रादितत् । [Not प्र-भू+घञ् as the rule is 'श्रिणीभुवः अनुपसर्गे'] । 'स प्रभावः प्रतापश्च यत्तेजः कोषदण्डजम्'—अमरः ।

अवजितः—अव-जि+क्त—कर्म्मणि । Udayana was fond of catching

elephants by his skill in playing on the lute. In order to have him, though a rival prince, as his son-in-law, Pradyota [i. e. Mahasena], the king of Avanti, got a huge wooden elephant constructed, and with a number of soldiers hidden inside, he placed it in a jungle in the neighbourhood of Vatsa. Udayana was attracted by the report of the huge elephant, and when he approached it, he was suddenly captured by the soldiers and taken to Ujjayini where he lived for a certain period after which he eloped with Vasavadatta to whom he had been appointed an instructor in lute-playing.

इढ़म्—Adverb, modifying लालित: ।

स्वता—स्वस्य भाव: इति स्वता । स्व+तल् । Cf. महती स्वता Act. 1. Sl. 7.

वत्सान्—वत्सानां निवासो जनपद: इति वत्सा: ; वत्स+अण् । The अण् is elided by the rule 'जनपदे लुप्' । The derivative retains the number and gender of the original word by the rule 'लुपि युक्तवद् व्यक्तिवचने' । cf. अङ्गा:, वङ्गा:, &c.

प्राप्तुम्—Some such word as अशक्तवम् is to be understood after this. As an alternative course, Ganapati suggests that उचितान् might have been a copyist's slip for उचितम् । In either case the तुमुन् is by the rule 'शक-धृष &c.' The best course seems to be to take वत्सान् प्राप्तुम् as meaning वत्सानां प्राप्ति: । 'अव्यय-कृतो भावे' । Cf. श्रोतुम्—page 149, (Text).

Rhetoric.—The fig. of speech is पर्याय । Def.—

'क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् ।

भवति क्रियते वा चेत् तदा पर्याय इष्यते ॥'—सा. द. ।

Here the dr. peculiarity is प्रियोक्ति—

'स्यात् प्रमापयितुं पूज्यं प्रियोक्तिर्हर्षभाषणम्'—सा. द. ।

Metre.—हरिणी । 'नसमरसलागः षड् वेदैर्हयैर्हरिणी मता' ।

Page 157. Sloka 9.

Sans. Expl.—एष इत्यादि ।...'सन्देश:' अवसित इति शेष: ।...'अत्र-भवती' मान्या वसुन्धरा... ।

षोड़शान्तरित्यादिना श्वश्रूः अङ्गारवत्याः कुशलं पृच्छति—'ननु' प्रश्ने, षोड़शान्तः-पुरज्येष्ठा' षोडशसु 'अन्तःपुरेषु' स्त्रीषु 'ज्येष्ठा' सर्वश्रेष्ठा महिषी 'पुण्या' शुद्धचरिता 'नगरदेवता' पुरस्य अधिष्ठातृ-देवीतुल्या, पूज्या इत्यर्थः, 'मम प्रवासदुःखार्त्ता' श्वशुरयोः

अनुमतिं विनैव तद्देशात् तयोः कन्यया सह मम अपगमेन पीड़िता 'माता' श्वश्रूः अङ्गारवती 'कुशलिनी' स्वस्था वर्त्तते? ॥ ९ ॥

Notes.

षोड़शान्तःपुरज्येष्ठा—Adj. to माता। The word अन्तःपुर means अन्तःपुरस्था स्त्री by लक्षणा। 'अन्तःपुरादिशब्दानां तात्स्थ्यात् नृपदारेष्वपि प्रयोगो बहुधा द्रष्टव्यः'। Cf. 'दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा'—Sak. Act VI. षोड़श अन्तःपुराणि—कर्म्मधारयः, तेषु ज्येष्ठा—७तत्।

N. B. कर्म्मधारय with a संख्यावाचक word is allowed here as there is an उत्तरपद। The rule is 'तद्धितार्थोत्तरपद-समाहारे च'। Cf. त्रिलोकनाथः।

पुण्या—पुनाति इति पुण्यम्। पू+यत्। पुण्यमस्याः अस्तीति पुण्या; पुण्य+अच् (अर्श-आदित्वात्)। 'पूञो यण् ग् ह्रस्वश्च'।

प्रवासदुःखार्त्ता—दुःखेन ऋता—३तत्, the वृद्धि in सन्धि is by the rule 'ऋते च तृतीयासमासे'। प्रवासेन दुःखार्त्ता—३तत्। The reference is to the elopement of उदयन with वासवदत्ता। We do not take the reference to his stay at लावाणक, because the present scene was in all likelihood at कौशाम्बी। See notes on सूर्य्यामुखप्रासाद—pages 127—128 ante.

ननु—A particle implying 'inquiry' 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु'—अमरः।

Rhetoric—The dr. peculiarity is 'पृच्छा'। 'अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मतम्'—सा. द.।

Metre—अनुष्टुप्।

Ch. of voice ज्येष्ठया पुण्यया नगरदेवतया...दुःखार्त्तया मात्रा कुशलिन्या... [भूयते]?

Pages 158—159.

Sans Expl.—अरोगेत्यादि। 'अरोगा' व्याधिशून्या [नास्ति तस्याः शरीरगतः कोऽपि व्याधिः, परन्तु वासवदत्ताविनाशात् आधिपीड़ितं तस्याः मनः इति सूच्यते] 'भट्टिनी' राज्ञी अङ्गारवती 'भर्त्तारं' स्वामिनं भवन्तमित्यर्थः 'सर्व्वगतं कुशलं' सकलविषयेषु स्थितं मङ्गलं 'पृच्छति' जिज्ञासते। [अथ वासवदत्तायाः अकुशलात् कथं सर्वगतं कुशलं सम्भाव्यते इति पृच्छति सर्व्वगतम् इत्यादि]...'अम्ब' मातः 'ईदृशं कुशलं' वासवदत्ताविनाशात् यादृशं भवत्या दृश्यते तादृशमेव मे कुशलम्। 'मा इदानीम्' [अप्रतीकारे वासवदत्ताविनाशे] न साम्प्रतं 'भर्त्ता' प्रभुर्भवान् 'अतिमात्रम्' अत्यर्थं 'सन्तप्तुम्' शोकं कर्त्तुम् अर्हति इति शेषः। 'धारयतु' धैर्य्य

प्रतिपद्यताम्...'उपरता स्मृता...'महासेनपुत्री' वासवदत्ता...'अनुकम्प्यमाना' सप्रणय' आर्य्यमाणा... ।

Notes.

अरोगा—अविद्यमानः रोगः यस्याः सा—बहुव्रीहिः, by the वार्त्तिक rule 'नञोऽस्त्यर्थानां बहुव्रीहिर्वाच्यो वा चोत्तरपदलोपः' । Opt. form — अविद्यमान-रोगा । This adj. indicates that she is highly afflicted in mind by the death of Vasavadatta.

सर्व्वगतम्—सर्वं गतम्—२तत् । 'सर्व्व' includes Vasavadatta also. Hence, the king cannot reply that all are well.

अतिमात्रम्—Adverb. See Notes—page 132 ante.

सन्तप्तुम्—सम् – तप् + तुम् तुम् in connection with 'अर्हति' to be understood. For a similar mannerism, cf. 'मा खलु मां शप्तुम्'—प्रतिज्ञानाटिका Act III. Bhasa sometimes uses क्त्वा with मा (which is entirely un-Paninian) cf. 'मा इदानीं चिन्तयित्वा' (Act IV and Act V).

उपरताप्यनुपरता &c.—Cf. 'भर्त्तर्यशान् सा हि दग्धाप्यदग्धा' – Act I. 13

अनुकम्प्यमाना—Adj. to महासेनपुत्री । अनु – कम्प + कर्म्मवाच्ये शानच् ।

Page 159. Sloka 10

Sans Expl.—वासवदत्तायाः विनाशे नास्ति राज्ञः कापि अपराधाशङ्का इत्याह—कः कमिति । 'मृत्युकाले' मरणसमये 'कः' अतिसावधानोऽपि को जनः 'कं' 'रक्षितुं' त्रातुं 'शक्तः' समर्थः भवेत् ? न कोऽपि इत्यर्थः । 'रज्जुच्छेदे' रश्मिभङ्गे सति 'के' जनाः 'घटं' धारयन्ति' कूपगतं घटं कूपात् उद्धरन्ति, रज्ज्वां बद्धम् एव घटं मन्ये धारयन्ति, छिन्नायान्तु रज्ज्वाम् न कोऽपि प्रभवति तं घटमुद्धर्त्तुम् इत्यर्थः । 'एवम्' उक्तप्रकारं यथा स्यात् तथा 'वनानां तुल्यधर्म्मः' वनैः सह समानधर्म्मोपेतः 'लोकः' जनः 'काले काले' योग्यसमये उपस्थिते एव इत्यर्थः 'छिद्यते' विनाशमेति इत्यर्थः, 'रुह्यते च' वृद्धिमेति च । कालक्रमेण एव सर्व्वस्य उत्थानं पतनं च घटते इत्यर्थः ॥१०॥

Notes

कः कं शक्तो रक्षितुं मृत्युकाले—Cf. 'प्राप्तकालो न जीवति' ।

रक्षितुम्—तुमुन् by the rule 'पर्य्याप्तिवचनेष्वलमर्थेषु' ।

रज्जुच्छेदे—भावे क्ती । रज्ज्वाः च्छेदः—६तत्, तस्मिन् ।

तुल्यधर्म्मः—तुल्यः धर्म्मः यस्य सः – बहुव्रीहिः । The form should have

been तुल्यधर्मा with अनिच् as समासान्त by the rule 'धर्मादनिच् केवलात्'। The absence of अनिच् is due to अनित्यत्व of समासान्तविधि। 'समासान्तो विधिरनित्यः'।

वनानाम्—६ष्ठी in connection with तुल्य by the rule 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्'।

छिद्यते—छिद्+कर्म्मकर्त्तरि लट् ते

वह्यते—वह+कर्म्मकर्त्तरि लट् ते। Here वह is to be taken in its causative sense (being अन्तर्भूतण्यर्थ) and thus सकर्म्मक and then in कर्म्मकर्त्तृवाच्य।

Rhetoric.—The fig.s of speech are दृष्टान्त and उपमा। The dr. peculiarity is श्लेष। 'स श्लेषो भण्यते वाक्यं यत् सादृश्यपुरःसरम्'—सा.द.।

Metre.—शालिनी। 'मात्तौ गौ चेच्छालिनी वेदलोकैः'।

Ch. of Voice.—केन...शक्तेन [भूयते], कैः घटः धार्य्यते ?...लोकेन तुल्यधर्म्मणा...छिद्यते वह्यते...।

Page 160. Sloka 11.

Sans. Expl.—[वासवदत्ता मया नैव विस्मर्त्तुं शक्यते अतः तस्याः स्मरणं नैव अनुकम्पाविषय इत्याह—मा मैवम् इत्यादि]। 'महासेनस्य दुहिता' मत्पूज्यस्य मयि सवात्सल्यस्य च उज्जयिनीराजस्य कन्या वासवदत्ता 'मे' मम 'प्रिया शिष्या' वीणावादनकलायां मत्प्रीतिजनयित्री अन्तेवासिनी 'देवी च' महिषी च। 'सा मया' 'देहान्तरेषु अपि' अन्येषु अपि जन्मसु, 'कथं' केन उपायेन 'स्मर्त्तुं न शक्या'? सर्व्वथा एव सा स्मरणार्हा स्यास्यति इत्यर्थः॥ ११॥

Notes

स्मर्त्तुं न शक्या—Rather स्मर्त्तुं न योग्या (or विस्मर्त्तुं शक्या)। शक+यत्— कर्म्मणि।

सा—उक्तकर्म्म of शक्या। It does not take २या as being the कर्म्म of स्मर्त्तुम्। The dictum is—'प्रधानशक्ताभिधाने गौणशक्तिः अभिहितवद् भवति'। Cf. 'शक्योऽस्य मन्युर्भवता विनेतुम्'—Raghu II.

देहान्तरेषु—अन्ये देहाः देहान्तराणि—नित्यसमासः, तेषु।

Metre.—अनुष्टुप्।

Ch. of voice.—दुहिता...प्रियया शिष्यया देव्या... [भूयते]। ताम् अहं न शक्नुयाम्?

Pages 160—161.

Sans Expl.—अथ धात्री अङ्गारवत्याः सन्देशं विज्ञापयति—आह भट्टिनीति। 'आह' सन्दिशति 'भट्टिनी' राज्ञी अङ्गारवती…'गोपालक-पालकौ' महासेनपुत्रौ 'तादृश एव' तयोस्तुल्य-स्नेहभाजनम् 'प्रथमम् एव' वासवदत्तायाः परिणयात् प्राक् एव 'अभिप्रेतः' मनसा ईप्सितः 'जामाता इति'…। 'अनग्निसाक्षिकं' विवाहे अग्नेः समक्षं वराय कन्या प्रदीयते इति सत्यपि नियमे तथा न कृत्वा इत्यर्थः 'वीणा-व्यपदेशेन' वीणावादन-शिक्षाच्छलेन 'दत्ता' अर्पिता तुभ्यमिति शेषः। 'आत्मनश्च' तथाच तव स्वस्य 'चपलतया' अस्थिरचित्ततया 'अनिर्वृत्तविवाहमङ्गल एव' असम्पन्नविधिवद्-विवाहसंस्कार एव 'गतः' प्रद्रुतः, वासवदत्ताम् अपहृत्य इति शेषः। 'अथ च इतस्तत-पलायनात् परम् 'आवाभ्यां' महासेनेन मया च…'प्रतिकृतिम्' अनुरूपाम् आकृतिं 'चित्रफलकायाम् आलिख्य' चित्रपटे अङ्कयित्वा 'विवाहः निर्वृत्तः' परिणयविधिः समापितः। 'एषा चित्रफलका' वासवदत्ताप्रतिकृतिमतीति शेषः 'तव सकाशं प्रेषिता' तव समीपं प्रेरिता।…'निर्वृतो भव' उपशान्तशोका भव।…'अहो' विस्मये, 'अति-स्निग्धम्' अत्यन्तस्नेहवत् 'अनुरूपं च' तस्याः आत्मनः कुलशीलादिभिः सदृशं च 'अभिहितं' कथितं 'तत्रभवत्या' पूज्यया अङ्गारवत्या।

Notes

गोपालक-पालकौ—गोपालक and पालक were the two sons of महासेन।

प्रथमम्—Adverb. Before Udayana was trickishly taken to Ujjayini and he eloped with Vasavadatta.

अनग्निसाक्षिकम्—Adverb. अग्निः साक्षी यस्य तत् यथा स्यात् तथा बहुव्रीहिः। न अग्निसाक्षिकम्—नञ्तत्।

वीणाव्यपदेशेन—प्रकृत्यादित्वाद् ३या by the rule 'प्रकृत्यादिभ्य उप-संख्यानम्।'—वीणा (=वीणावादनशिक्षणम्) एव व्यपदेशः—कर्मधारयः, तेन।

चपलतया—हेतौ ३या।

अनिर्वृत्तविवाहमङ्गलः—Adj. to त्वम् understood. निर्-वृत्+क्त—कर्तरि=निर्वृत्तम्। न निर्वृत्तम्—नञ्तत्; विवाह एव मङ्गलम्—कर्मधारयः; अनिर्वृत्तं विवाहमङ्गलं यस्य सः—बहुव्रीहिः।

प्रतिकृतिम्—'प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना। प्रतिच्छाया प्रतिकृतिः'—अमरः।

चित्रफलकायाम्—अधिकरणे ७मी। चित्रस्य फलका—६तत्, तस्याम्। The marriage in effigy has been referred to also in Pra. Yaug. Act IV. The word फलक is, according to lexicon, either masc. or neuter. 'फलकोऽस्त्री'—इत्यमरः।

निर्वृत्तः—निर्—वृत्—क्त—कर्त्तरि। Distinguish it from निर्वृत्त and निर्वृत्त। See Page 54 ante.

अतिस्निग्धम्—Adverb. अति स्निग्धम्—प्रादितत्।

Rhetoric.—In मम वा etc. there is the dramatic peculiarity called उत्कीर्त्तन। '....भूतकार्य्याख्यानमुत्कीर्त्तनं मतम्'—सा. द.।

Page 162. Sloka 12.

Sans. Expl.—'एतत् वाक्यम्' उज्जयिनीराजमहिष्या प्रेरितः सन्देशः 'राज्यलाभशतात् अपि' बहूनाम् अपि राज्यानां प्राप्तेः 'प्रियतरम्' अधिकतरम् सुखकरम् इत्यर्थः। 'यत्' यतः 'अस्मासु' मयि इत्यर्थः 'अपराद्धेषु अपि' तत्तनयापहरणादिति बोद्धव्यम् [तया] 'स्नेहः' वात्सल्यभावः 'न विस्मृतः' मनसो नैव अपसारितः ॥ १२ ॥

Notes

राज्यलाभशतात्—५मी by the rule 'पञ्चमी विभक्ते'। राज्यानां लाभः—तेषां शतम्—६तत्, तस्मात्।

अस्मासु—Plural for singular by the rule 'अस्मदो द्वयोश्च'।

अपराद्धेषु—Adj. to अस्मासु। अप—राध+क्त—कर्त्तरि, तेषु। The अपराध is his elopement with V*a*savadatt*a*.

Rhetoric.—The fig. of speech is विशेषोक्ति in the second half.

Metre.— अनुष्टुप्।

Ch. of Voice—वाक्येन एतेन प्रियतरेण [भूयते] .....स्नेह...विस्मृतवती [सा]।

Pages 162—163.

Sans. Expl.—आर्य्यपुत्रेत्यादि।...'चित्रगतं गुरुजनं' चित्रे निवेशितां पूज्य वासवदत्ताम् इत्यर्थः 'अभिवादयितुं' वन्दितुम्...।...'इम्' आश्चर्यसूचकध्वनिः, आवन्तिकाया सादृश्यदर्शनात्। 'अतिसदृशी' अत्यर्थसदृशी तुल्यदर्शना 'इयम्' चित्रगता वासवदत्ता...। 'न सदृशी' न केवलं तुल्यरूपा, 'सा एव' तया सह अस्याः कोऽपि च भेदो न विद्यते इत्यर्थः।

Notes.

गुरुजनम्—गुरुः एव जनः—कर्म्मधारयः, तम्। Out of respect for V*a*savadatt*a*, Padm*a*vat*i* called her a गुरुजन।

सदृशी—समाना इव पश्यति (=ज्ञानविषयो भवति) इति सदृशी। समान—दृश्+कञ् (कर्म्मकर्त्तरि)+ङीप्।

Rhetoric.—In चित्रगतं गुरुजनम् etc. there is the dramatic peculiarity called सन्धि [as this is a step towards the re-union of the नायिका which is the subject-matter of the निर्वहण-सन्धि]। 'बीजोपगमनं सन्धिः'—सा. द.।

Page 163. Sloka 13.

Sans. Expl.—अस्येत्यादि। 'अस्य स्निग्धस्य वर्णस्य' वासवदत्तायाः एतस्य मनोरमस्य वर्णस्य 'कथ' केन प्रकारेण 'दारुणा' घोरा 'विपत्तिः' विनाश इत्यर्थ [संघटितेति शेषः]। 'इदं च चित्रे दृश्यमानं 'मुखमाधुर्य' मुखस्य सौन्दर्य्यम् 'कथम्' अग्निना दूषितम्' वह्निना दग्धम्? सर्व्वथा तादृशस्य रूपसम्पत्तेरीदृशी दारुण-विपत्ति र्न संगच्छते इत्यर्थः ॥ १३ ॥

Notes.

स्निग्धस्य—Adj. to वर्णस्य। स्निह + क्त—कर्त्तरि।

विपत्तिः—Nom. of अभवत् understood. वि – पद + क्तिन्—भावे।

मुखमाधुर्य्यम्—Obj. to दूषितम्। मधुरस्य भावः माधुर्य्यम्; मधुर + ष्यञ्। मुखस्य माधुर्य्यम्—६तत्।

दूषितम्—दुष + क्त – कर्म्मणि। In णिच् 'दुष' is changed into दूष (with long ऊ) by the rule 'दोषो णौ'। Another reading—जूषितम् = destroyed. 'यूष हिंसायाम्, जूष च' – भ्वादिः, परस्मै। जूष + क्त – कर्म्मणि।

Rhetoric.—The fig. of speech is विषमः (विरूपयोः संघटना)।

Metre.—अनुष्टुप्।

Ch of Voice.—···दारुणया विपत्त्या [अभूयत]। इदं···मुखमाधुर्य्यम्··· अग्निः दूषितवान्?

Pages 164—165.

Sans. Expl.—'आर्य्यपुत्रस्य प्रतिकृतिम्' भवतः प्रतिच्छन्दकं 'दृष्ट्वा' 'जानामि' स्वप्रत्ययं द्रढयामि इत्यर्थः 'इयं प्रतिकृति 'आर्य्यायाः' वासवदत्तायाः 'सदृशी, सर्व्वतः तुल्यदर्शना 'न वा इति'।

…'सदृशतया तुल्यदर्शनत्वात् इत्यर्थं…'चित्रदर्शनात् प्रभृति' यदा त्वं वासवदत्तायाः प्रतिकृतिं दृष्टवती तस्मात् आरभ्य इत्यर्थः प्रहृष्टोद्विग्नाम्' आह्लादिता' त्रस्तां च…'प्रतिकृत्याः सदृशी' प्रतिच्छन्दस्य अनुरूपा काचित् नारी 'इह एव' अस्मिन् एव राजप्रासादे··· । 'आम्' वाक्यार्थाभ्युपगमसूचकम् अव्ययम्। ……'कन्याभावे' अनूढावस्थायाम्…'मम भगिनिका इति' एषा मम स्वसा भवति इति उक्त्वा 'न्यासो निक्षिप्तः' चारित्रावेक्षणार्थं मदन्तिके रक्षिता इत्यर्थः। 'प्रोषितभर्त्तृका' प्रोषितः

विदेशस्य: 'भर्त्ता' स्वामी यस्या: सा [ब्राह्मणभगिनिका] 'परपुरुषदर्शनं परिहरति' पतिव्यतिरिक्तजनस्य समक्षं नैव आगच्छति इत्यर्थ: । 'तत्' तत: 'आर्य्या'' मान्यां तां ब्राह्मणभगिनिकां... ।

Notes. Pages 164—165.

सदृशतया—इती ३या । सदृश+तल्, तया ।

सदृशी—Adj. to नारी understood.

आम्—An interjection in the sense of 'yes'.

कन्याभावे—अधिकरणे ७मी । कन्याया: भाव:—६तत्, तस्मिन् ।

प्रोषितभर्त्तृका—प्र – वस+क्त—कर्त्तरि=प्रोषित:, प्रोषित: भर्त्ता यस्या: सा—बहुव्रीहि: । समासान्त: कप् is compulsory here by the rule 'नद्युतश्च'।

परपुरुषदर्शनम्—पर: पुरुष: – कर्म्मधारय:, तस्य दर्शनम्-६तत् ।

मया सह आगतम्—This means 'who will be coming with me' rather than 'who has come with me.' The suggested Expl. lessens the demerit involved in परपुरुषदर्शन on the part of V.

Rhetoric.—In मम कन्याभावे etc. there is the dr. peculiarity called निर्णय [of the निर्वहण-सन्धि] । '...निर्णय: पुन: अनुभूतार्थकथनम्' —सा द. ।

Page 166. Sloka 14.

Sans Expl.—'यदि विप्रस्य भगिनी' पद्मावत्या कथिता न्यासरूपेण रक्षिता नारी यदि ब्राह्मणस्य स्वसा भवेत्, [तत: सा] 'अन्या भविष्यति' वासवदत्ता-व्यतिरिक्ता कापि नारी भविष्यति [इति] 'व्यक्तम्' निश्चितम् । 'परस्परगता' अन्योन्ययोर्मध्ये स्थिता 'रूपतुल्यता' आकृते: सादृश्यं 'लोके' जगति 'दृश्यते' [अत: वासवदत्ताया: तुल्याकृति: कापि ब्राह्मणभगिनी अपि भवेत् इत्यर्थ: ॥ १४ ॥

Notes.

व्यक्तम्—Adverb. वि—अञ्ज+क्त – भावे ।

परस्परगता—Adj. to रूपतुल्यता । परस्परं गता – २तत् ।

रूपतुल्यता—Obj. of दृश्यते । तुल्यस्य भाव:, तुल्यता ; तुल्य+तल् । रूपस्य तुल्यता—६तत् ।

Rhetoric.—The fig. of speech is अर्थान्तरन्यास ।
Metre.—अनुष्टुप् ।

Ch. of Voice—...भगिन्या...अन्यया भविष्यते । परस्परगतां रूपतुल्यताम् ...पश्याम: [वयम्] ।

Pages 167—168.

Sans. Expl.—...'उज्जयिनीतः' तन्नगर्य्याः, आगत इति शेषः...'भर्तृकायाः हस्ते' राज्ञ्याः पद्मावत्याः समीपे—'तं प्रतिग्रहीतुम्' तं न्यासं पुनरादातुम्...'स ब्राह्मणः' येन आवन्तिका न्यासरूपेण रक्षिता इत्याशयः...'शीघ्रं प्रवेश्यताम्' सत्वरं प्रासादमध्यम् आनीयताम् 'अभ्यन्तर-समुदाचारेण' प्रासादमध्ये कर्त्तव्येन पाद्यादिदान-कर्म्मणा...'ताम् आनय' न्यस्ताम् आवन्तिकाम प्रतिपादनार्थमिति शेषः... ।

Notes.

भर्तृकायाः—Ref. to पद्मावती । 'देवी कृताभिषेकायाम् इतरासु च भर्तृनी' । The epithet देवी would apply to वासवदत्ता who is कृताभिषेका ।

भवितव्यम्—The Nom. is तेन understood.

प्रवेश्यताम्—प्र – विश + णिच् + कर्म्मणि लोट् ताम् । Nom.—त्वया understood, Obj.—ब्राह्मणः ।

अभ्यन्तर-समुदाचारेण—करणे ३या । अभ्यन्तरस्य or अभ्यन्तरे समुदाचारः—६तत् or ७तत् । With the formalities to be observed and the course of conduct to be followed when a stranger is conducted inside the palace.

Page 168. Sloka 15.

Sans. Expl.—प्रच्छाद्येतादि । 'नृपतेः' राज्ञः उदयनस्य 'हितार्थं' राज्योद्धरणादिमङ्गलसाधनार्थम् 'राजमहिषीं' राज्ञः कृताभिषेकां पत्नीं वासवदत्तां 'प्रच्छाद्य' गोपयित्वा 'मया' 'कामम्' स्वच्छन्दम् 'इदं हितम्' पद्मावतीपरिणय-राज्योद्धरणादि-शुभकर्म्म 'कृतम्' अनुष्ठितम् 'इति अवेक्ष्य' एतत् विविच्य 'मम कर्म्मणि नाम' पूर्व्वोक्ते मम कर्त्तव्ये एव 'सिद्धे अपि' सफलतां गते अपि, 'असौ पार्थिवः' राजा उदयनः 'किं वक्ष्यति इति' कुप्यति वा सिद्ध्यति वा इति 'मे हृदयं' मम मनः 'परिशङ्कितं' भीतम् वर्त्तते ॥ १५ ॥

Notes.

प्रच्छाद्य—प्र – छद + णिच् + ल्यप् ।

राजमहिषीम्—राज्ञः महिषी—६तत्, ताम् । 'कृताभिषेका महिषी'—अमरः ।

कामम्—Adverb. 'कामं प्रकामेऽनुमतौ ।

कर्म्मणि—भावे ७मी ।

हितमित्यवेक्ष्य—Some might connect it with कृतम् । We have taken it with परिशङ्कितम् ।

परिशङ्कितम्—परि - शङ्क + क्त—कर्त्तरि ।

किं वक्ष्यतीति &c.—Cf. 'अवान्तरे अवधकातरतां गतोऽस्मि'—Sak. III.

Rhetoric.—The fig. of speech is विशेषोक्ति ।

Metre—वसन्ततिलक ।

Ch. of. voice.—... अहम्...इदं चिन्तितम् कृतवान्...अमुना पार्थिवेन किं वक्ष्यते...हृदयेन परिशङ्कितेन [भूयते] ।

Page 169—171.

Sans. Expl.—अथ राजानं प्रदर्श्य प्रतीहारी आह—एष भर्त्ता इत्यादि । 'उपसर्पतु' राज्ञः समीपं गच्छतु...यौगन्धरायणकृतं जयशब्दं श्रुत्वा स्वरस्य अतिपरिचितत्वात् अथ च पूर्व्वमेवामौ ग्रामदाहे दग्ध इति विश्वासात् राजाह—'श्रुतपूर्व्वः इव' पूर्व्वपरिचित इव 'स्वरः' कण्ठध्वनिः । ...'स्वसा' भगिनी 'पद्मावत्याः हस्ते' पद्मावतीसमीपे... 'अथकिम्' ममैव भगिनी न्यास इति निश्चितम् । 'त्वर्य्यताम्' [प्रतिहारीं प्रति एष आदेशः] 'प्रियं ते निवेदयामि' अभीष्टं सन्देशं विज्ञापयामि । '...दिष्ट्या' भाग्येन...'स्मरति' माम् इति शेषः ।...'एष न्यासः' एषा सा ब्राह्मणस्य स्वसा मम हस्ते न्यासरूपेण स्थापिता इत्यर्थः 'निर्य्यातय' प्रत्यर्पय... । 'साक्षिमत्' साक्षियुक्तं यथा स्यात् तथा 'न्यासः' 'निर्य्यातयितव्यः' प्रत्यर्पयितव्यः । इह अत्र न्यास निर्य्यातन-व्यापारे...अधिकरणं मान्यो । 'नीयताम् इदानीम्' गृह्यताम् अधुना [इत्युक्ता न्यासं निर्यातयति] ।

जयतु etc.—This was acc. to the custom of uttering जयशब्द while approaching the king. Acc. to पद्मनाभ and others जयतु and जयन्तु are not to be used (अनभिधानात्) and जयति and जयन्ति are to be used in their place 'जे सुवन्तोक्तिवर्ज्जौ' ।

त्वर्य्यताम् भगिनिका—Here भगिनिका means भगिनिकानयनम् ।

श्रुतपूर्व्वः—पूर्व्वम् श्रुतः इति श्रुतपूर्व्वः—सुप् सुपेति समासः । 'भूतपूर्व्वे चरट्' इति निर्द्देशात् श्रुतशब्दस्य पूर्व्वनिपातः । Though the voice was too well-known to the king yet he failed to recognise the minister, as he believed that the minister had been consumed by fire at *Lavanaka* and also because Yaug. was still under his guise.

त्वर्य्यताम्—त्वर + णिच् + कर्म्मवाच्ये लोट् ताम् ।

ते—क्रियायोगे ४र्थी in connection with the verb निवेदयामि ।

निर्य्यातय—निर् -यत (चुरादि) + लोट् हि। 'निर्य्यातन' वैरशुद्धौ दाने न्यासार्पणेऽपि च'—इति मेदिनी।

साक्षिमत्—Adverb. साक्षिन्+मतुप्।

अधिकरणम्—विधेय to the उद्देश्य word रैभ्य: and भवभवती। अधि-कृ+ल्युट्—अधिकरणवाच्ये। अधिकरण means 'court'. Here it means perhaps 'court officers' standing as witnesses, the two functions being conceived as combined here.

Rhetoric—In निर्य्यातय पद्मावति etc., there is the dramatic peculiarity called उपदेशन। 'शिक्षा स्यादुपदेशनम्'।

Page 172.

Sans. Expl.—'आवन्तिकां निर्वर्ण्य' आवन्तिकावेशधारिणीं वासवदत्तां मुहु विलोक्य 'अम्भो' आश्चर्ये अव्ययम्। 'कथं महासेनपुत्री' किम् एषा प्रद्योतस्य कन्या वासवदत्ता [परकलत्रमुखदर्शनं परिहरता राज्ञा पूर्वं न दृष्टा वासवदत्ता, सम्प्रति धात्रीवचनात् तामालोक्य एतदाह इति बोद्धव्यम्]। 'प्रविश त्वम् अभ्यन्तरम्' प्रासादमध्यं याहि। 'न खलु प्रवेष्टव्यम्' न अन्तर्गृहं यातव्यम् [यौगन्धरायणस्य वासवदत्तायाश्च सम्यक् निर्णयात् परं तथा वासवदत्ताप्रतिग्रहो भवेत् इत्याशयेन एतदाह] 'मम भगिनी' मम स्वसा [सा मम भगिनी चेत् कथमन्तःपुरं गमिष्यति ?] 'महासेनपुत्री खलु एषा' एषा वासवदत्ता एव [अनेन राज्ञ: निर्णयो जात: इति सूचितम्]।

Notes.

निर्वर्ण्य—निर् - वर्ण + णिच् + ल्यप्।

कथं महासेनपुत्री—In order to avoid the sight of another's wife, the king did not see Vasava. so long.

न खलु न खलु—आवेगे द्विरुक्तिः। The minister detains her with the view of having her re-united with the husband after full recognition.

Page 173. Sloka 16.

Sans. Expl.—['भो राजन्'] 'भारतानां कुले' भरतवंशीयानां राज्ञां वंशे 'जात:' त्वम् उत्पन्नोऽसि [एतत्कुलसम्भूतानां राज्ञां मन: परस्त्रीविमुखमिति इति प्रसिद्धि: परस्त्री त्वया नैव अभ्यन्तरं नेतव्या इति भाव:] 'विनीत:' विनयसम्पन्न [अत: दुर्विनीतत्वं न करिष्यसि इति भाव:] 'ज्ञानवान्' विवेकसम्पन्न: 'शुचि:' पवित्रस्वभाव:। 'तत्' तस्मात राजधर्मस्य देशिक:' राजधर्मप्रवर्त्तक: अन्येषामपि

राज्ञा धर्म्मोपदेष्टा सन् त्वं बलात् धर्म्माद्यनुरोधम् अवमत्य 'स्प्रष्टुं न अर्हसि' परपत्नीं बलेन ग्रहीतुं न अर्हसि ॥१६॥

Notes. Sloka 16.

भारतानाम्—भरतस्य गोत्रापत्यानि पुमांसः इति भारताः ; the descendants of भरत। भरत was the illustrious son of दुष्यन्त (and शकुन्तला) from whom were descended the Pandavas. Udayana was fifth in descent from अभिमन्यु, the son of अर्ज्जुन। Thus अभिमन्यु, परीक्षित्, जनमेजय, शतानीक, सहस्रानीक, उदयन। See विष्णुपुराण IV. 19.

विनीतः etc.—The adjectives indicate that the king was in no way expected to do the impolite act of taking hold of another's wife by sending her inside his harem.

देशिकः—Adj. to त्वम्। देष्टुं शीलमस्य इति देशी। दिश+णिनि–कर्त्तरि। देशी एव इति देशिकः देशिन्+कन्~स्वार्थे। Cf. आदेशिकः—page 12. Text.

बलात्—ल्यब्लोपे कर्म्मणि ५मी। —बलम् आश्रित्य इत्यर्थः।

Rhetoric.—The fig. of speech is उदात्त। Def—'उदात्तं वस्तुनः सम्पद् महतां चोपलक्षणम्'। [No काव्यलिङ्ग as a हेतुवाचक word (तत्) has been explicitly used]. The dr. peculiarity is नीतिः।

Metre.—अनुष्टुप्।

Ch. of voice. [त्वया]...ज्ञातेन विनीतेन ज्ञानवता शुचिना [भूयते]... देशिकेन [त्वया]...अर्ह्यते।

Page 173

Sans. Expl.—...भवत्वित्यादि। 'भवतु' न परभार्य्याम् लिप्से इत्यर्थः [तथापि]—'रूपसादृश्यम्' वासवदत्तया सह अस्याः तुल्यरूपताम्। 'संक्षिप्यताम्' प्रतिसंह्रियताम् अपनीयताम् इत्यर्थः 'यवनिका' अवगुण्ठनम्। 'जयतु स्वामी' इति यौगन्धरायणस्य तथा 'जयतु आर्य्यपुत्रः' इत्यनेन वासवदत्ताया आत्मप्रकाशः। 'भयं' हर्षं [अभीष्टजनस्य अप्रत्याशितरूपेण लाभादयं हर्षः]

Notes.

रूपसादृश्यम्—सदृशस्य भावः सादृश्यम्, सदृश+ष्यञ्। रूपस्य सादृश्यम्, ६तत्।

संक्षिप्यताम्—सम्–क्षिप्+कर्म्मणि लोट् ताम्। Nom.—त्वया understood. The existence of the Purdah system can be traced even to the remote age of the author.

यवनिका—युनाति (आवृणोति) अनया इति यवनिका। यु+ल्युट् करणे +ङीप्। Then स्वार्थे कन् (+टाप्)। Also spelt with ज। The word means 'a curtain', here it means 'a veil.' Some take it here to mean 'curtain' behind which Vasavadatta might have been placed. Their case does not seem to be very strong; because, in all propriety, she was produced personally before रैभ्य and वसुन्धरा who were asked to be witnesses.

[Some are of opinion that the curtains used in the representation of a drama were called यवनिका as dramas in India were developed under Greek (यवन) influence].

जयतु स्वामी—Yaug. here is expected to have taken off his guise.

Rhetoric.—The dr. peculiarity is क्षति। 'लब्धार्थशमनं क्षतिः'—सा. द.।

Page 174. Sloka 17.

Sans. Expl.—किं नु इत्यादि 'मा' वासवदत्ता 'मया भूयः दृश्यते' पूर्व्वमपि समुद्रगृहे दृष्टा पुनरपि अत्र दृश्यते इत्यर्थः। 'किं नु' वितर्के 'इदं सत्यम्' वासवदत्तादर्शनं तत्त्वत एव भवति [अथवा] 'स्वप्नः' अप्रकृतविषयः [जागर्म्मि स्वपिमि वा इति सन्देहः]। 'अनया' वासवदत्तया 'एवं दृष्टया अपि' समुद्रगृहे अनेनैव रूपेण अवलोकितया अपि 'तदा' तस्मिन् समये 'अहं' वञ्चितः' प्रतारितः अभवम्, न तु तां तदा लब्धवान् इत्यर्थः ॥१७॥

Notes.

भूयः—Adverb. She was once seen before at समुद्रगृह in Rajagriha.

स्वप्नः—विधेय to the उद्देश्य word 'इदम्'। स्वप्+नन्, by the rule 'स्वपो नन्'।

दृष्टया—Adj. to अनया, the Nom. of वञ्चितः।

Rhetoric.—The fig. of speech is सन्देह।

Metre.—अनुष्टुप्।

Ch. of voice—ताम् अहम्...पश्यामि...अनेन सत्येन...स्वप्नेन...[भूयते]। इयम्...दृष्टा...मां वञ्चितवती।

Page 174.

Sans. Expl.—स्वामिन्, देव्यपनयनेत्यादि। 'देव्यपनयनेन' देवीं वासवदत्तां प्रच्छाद्य अन्यत्र नीत्वा इत्यर्थः: 'कृतापराधः खलु अहम्' अहमेव दोषम् अनुष्ठितवान्,

(नात्र भवतो वचने देव्या अपराधः, यतः मद्विहितम् एव अज्ञातवास-समुदाचारं रचन्ती सा भवद्दर्शनं तदा पर्यहरत् इत्याशयः)......'अन्तुम् अर्हति' मां क्षमताम्... 'यौगन्धरायणः भवान् ननु' सर्व्वथैव राज्ञः हितकारी इत्यर्थः [अतः क्षमाप्रार्थनावसरः नैव विद्यते इति भावः] ।

Notes.

देव्यपनयनेन—करणे ३या । देव्याः अपनयनम्—६तत्, तेन ।

कृतापराधः—Adj. to अहम् । कृतः अपराधः येन सः—बहुव्रीहिः ।

Rhetoric.—The dr. peculiarity is प्रसाद [of the निर्वहणसन्धि] । Def.—'शुश्रूषादिः प्रसादः स्यात्' ।

Page 174. Sloka 18.

Sans. Expl.—यौगन्धरायणस्य निकटं स्वामिहितकारित्वं प्रपञ्चयति—मिथ्योन्मादैः इत्यादिना । 'मिथ्योन्मादैः च' छलेन उन्मत्तवदाचरणैः 'युद्धैः च' रणैश्च 'शास्त्रदृष्टैः मन्त्रितैः च' तथा नीतिशास्त्रानुमोदिताभि मन्त्रणाभिश्च इत्येतैः 'भवद्यत्नैः खलु' भवतः चेष्टाभिरेव 'मज्जमानाः वयं' अनर्थसलिले विपद्यमानाः वयम् 'समुद्धृताः' विपद्‌: रक्षिताः । पूर्व्वं त्वमेव उज्जयिन्याम् उन्मत्तवत् भ्रमन् आत्मपरपक्षयोः वृद्धि-क्षयोपायान् विधाय युद्धैः परपक्षम् आकुलयन् मां शत्रुकृतावरोधात् उद्धृतवान् इत्यनेन राजभक्तिस्ते पूर्व्वमेव दर्शिता, अतः सर्व्वथा मम हितकारिणस्ते क्षमाप्रार्थनया प्रयोजनं नास्तीव इत्यर्थः ॥१८॥

Notes.

मिथ्योन्मादैः—करणे ३या । मिथ्या उन्मादाः—कर्म्मधारयः तैः । When Udayana was captured by Pradyota, the king of Ujjayini, Yaug. went there as a mad man and with the help of Rumanwat, disguised as a श्रमण-mendicant, and Vasantaka, as an old and deformed Brahmin, contrived to humble down the enemy in a number of skirmishes and was at last successful in releasing the king. This forms the subject-matter of the play called प्रतिज्ञा-यौगन्धरायण also called 'प्रतिज्ञा-नाटिका' by Bhasa. [Bhasa's version differs slightly from that of the कथासरित्-सागर] ।

शास्त्रदृष्टः—Adj. to मन्त्रितैः । शास्त्रेण दृष्टाः, तैः—३तत् ।

मन्त्रितैः—करणे ३या । मन्त्र+क्त—भावे ।

भवद्‌यशैः:—करण ३या। भवतः यशाः:—६तत्, तैः।

मज्जमानाः:—Adj. to वयम्। मज्ज+शानच् The root has been used in आत्मनेपद by the dictum 'आत्मनेपदमिच्छन्ति परस्मैपदिनः क्वचित्'।

समुद्धृताः:—सम्-उत्-धृ+क्त—कर्म्मणि। Nom.—भवता understood or, मिथ्योन्मादैः etc.

Rhetoric.—The dr. peculiarity is निर्णय। '—निर्णयः पुनः। अनुभूतार्थकथनम्'—सा. द.

Ch. of voice—...मज्जमानान् अस्मान् समुद्धृतवान् [भवान् ...[or, समुद्धृतवन्तः भवद्‌यशाः etc.]।

Pages 175

Sans. Expl.—स्वामिभाग्यानाम् इत्यादि। अथ आत्मश्लाघां परिहरन् आह—'स्वामिभाग्यानाम्' प्रभोः राज्ञः अदृष्टलभ्यानां वृद्धिजयादीनाम् 'अनुगन्तारः वयम्' अस्मा दृशाः राजकर्म्मकराः अनुयायिन एव। [राज्ञः अभ्युदयस्तस्यैव अदृष्टवशात् भवति, वयं तु केवलं निमित्तमात्रम् इत्यर्थः]। 'अस्महे' विस्मये। 'आर्य्या खलु इयम्' आवन्तिका ममैव भर्त्तुर्ज्येष्ठा महिषी। 'आर्य्ये' पूज्ये 'सखीजनसमुदाचारेण' भवतीं प्रति सखीवत् व्यवहारेण 'अजानन्त्या' आर्य्यां भवतीं न अवगच्छन्त्या मया 'अतिक्रान्तः समुदाचारः' लङ्घिता कर्त्तव्यपद्धतिः, अतः मया अपराधः कृत एव इत्यर्थः। 'तत्' तस्मात् 'शीर्षेण' मस्तकेन मस्तकम् अवनमय्य प्रणामेन इत्यर्थः, 'प्रसादयामि' अनुनयामि इत्यर्थः। ['पद्मावतीम् उत्थाप्य' प्रणामनताम् इति पूर्व्ववाक्यात् अनुमेयम्]...'अविधवे' चिरं पतिसाहचर्य्यसौभाग्यवती...। 'अपराध्यति' अपराधकर्त्ता। 'अर्थिनः अर्थिजनस्य मम 'स्वम्' आत्मीयं 'शरीरम्' 'नाम' अभ्युपगमे अव्ययम्, अपराध्यति, तव शरणागतायाः मम दोषः न तु तव। यद्वा 'अर्थिनः' यौगन्धरायणस्य 'स्वम्' आत्मीयम् आयत्तीकृत-मित्यर्थः शरीरम्, ममेति शेषः अपराध्यति। यौगन्धरायणस्य वचने स्थितायाः मम न किमपि स्वातन्त्र्यमासीत्। कार्य्यवशात् तदधीनस्य मह्यैव अयापराधः, न भवत्याः।

Notes

स्वामिभाग्यानाम्—कर्म्मणि ६ष्ठी। स्वामिनः भाग्यानि—६तत्, तेषाम्।

अनुगन्तारः—Adj. to वयम्। अनु-गम्+तृच्—कर्त्तरि।

सखीजनसमुदाचारेण—करणे ३या। सखी एव जनः—कर्म्मधारयः, तस्य समुदाचारः—६तत्, तेन। The word समुदाचारः is very frequently used by Bhasa like the word समवस्था by Kalidasa. समुदाचार occurs also in Kalidasa's शकुन्तला Act V.

अजानन्त्या—Adj. to मया understood. नञ्—ज्ञा+शतृ+ङीप्, इया। Nom. of अतिक्रान्तः।

शीर्षेण—करणे इया।

अविधवे—सम्बोधन। विगतः धवः (=पतिः) यस्याः सा विधवा—बहुव्रीहिः। न विधवा नञ्तत्। This benediction comes uppermost in Vasavadatta's mind as: she, on her own part, knows the pangs of separation from husband.

अर्थिस्वम्—Adj. to शरीरम्। अर्थिनः स्वम् इतत्। [The reading seems to be corrupt here]. See Sans. Expl. Woolner explains it as—"If anything offends, it is your suppliant form." In this Expl. अर्थिन् refers to पद्मावती।

Rhetoric.—In स्वामिभाग्यानाम् etc. and in उत्तिष्ठ etc. there is the dr. peculiarity भाषण [of the निर्वहणसन्धि]। Def.—'सामदानादि भाषणम्'—सा. द.।

Pages 176—177

Sans. Expl.—'अनुगृहीता अस्मि' तव कृत्लाभेन इति शेषः। अथ वासवदत्तायाः अपनयने हेतुं पृच्छति—वयस्येत्यादि 'वयस्य' हे सखे इत्यर्थः...'देव्यपनये' देव्याः वासवदत्तायाः अन्यत्र नयने 'का कृता ते बुद्धिः' किं फलमुद्दिश्य त्वया मतिः कृता? अथ देव्यपनयफलमाह—'कौशाम्बीमात्रं परिपालयामि इति' शत्रुहस्तात् कौशाम्बीराज्यम् उद्धरिष्यामि इति [तत्र पद्मावती-परिणयेन मगधाधिपतेः साहाय्यं प्राप्य इत्यवधार्यम्]।...किं न्यासकारणम्' कस्मात् देवी न्यास इति रक्षिता? पुष्पकभद्रादिभिः 'आदेशिकैः' भविष्यद्वक्तृभिः 'आदिष्टा' कथिता 'स्वामिनः' भवतः 'देवी भविष्यति' राज्ञी भविष्यति, पद्मावत्या भवतः परिणयो भविष्यति इति आदेशिकेभ्यः ज्ञात्वा मया वासवदत्ता न्यास इति पद्मावतीहस्ते प्रक्षिप्ता इत्यर्थः। 'इदम्' न्यासरक्षणं 'अपि' प्रश्ने...। 'शठः खलु' तज्ज्ञात्वा अपि नावदत् अतः वञ्चक एव...। देव्याः कुशलनिवेदनार्थम्' कुशलिनी वासवदत्ता इति ज्ञापनार्थम्...'प्रतिनिवर्ततां' गच्छतु उज्जयिनीम् इति शेषः।...'न न' देव्यश्वात्रभवती च न केवलं गमिष्यतः, अपि तु सर्वे एव वयम्।

Notes.

देव्यपनये—अधिकरणे सप्तमी। अप—नी+अच्—भावे=अपनयः (=अपनयनम्), तस्मिन्।

ते—अव्यय meaning 'त्वया'। 'ते-मेशब्दौ निपातेषु' इति वामनः।

कौशाम्बीमात्रम्—कौशाम्बी एव इति कौशाम्बीमात्रम्—नित्यसमासः, तत्।

कौशाम्बी was the capital of वत्सराजा। Here by कौशाम्बी, the whole kingdom of वत्सराजा is meant. Yaugandharayana's object was to bring about the marriage of पद्मावती, the princess of Magadha, with Udayana and thereby to recover वत्सराजा with the help of the king of Magadha.

N. B. कौशाम्बी has been identified with the modern Kosam, a village situated near Allahabad. It was one of the most ancient cities being mentioned in the Ramayana and the शतपथब्राह्मण। Also see F. N. P 23 INTRO.

कौशाम्बीमात्रं परिपालयामि इति—Simply that I (as your minister) should rule the country of कौशाम्बी which you have lost. Whatever may be the grammatical position of मात्र here, it certainly means 'simply', 'only' (अवधारण)। Some take it to mean कृत्स्न (entire). 'मात्रं कार्त्स्न्येऽवधारणे'। In that case the exposition should be कृत्स्ना कौशाम्बी इति कौशाम्बीमात्रम्। Here also the विग्रहवाक्य: is अस्वपद but not with एव (which means अवधारण)।

न्यासकारण—न्यासस्य कारणम्—६तत्।

पुष्पकभद्रादिभि: Adj. to आदेशिकै:। पुष्पकभद्र was the name of an astrologer; पुष्पकभद्र: आदि: येषाम्—बहुव्रीहि:, तै:।

(See P. 12 Text)

आदेशिकै:—Nom. of आदिष्टा। आदेश: (Prediction) एषाम् अस्ति इति आदेशिका:। आदेश+ठन्, तै:। Or, आ—दिश+णिनि=आदेशिन:, ते एव इति आदेशिका:; आदेशिन्+क—स्वार्थे। हेमचन्द्र cites the word आदेशिन् to mean 'an astrologer.'

शठ: खलु कृतघ्नान्—See Sloka 14, Act I.

सर्वै: एव ज्ञातम्—Most probably सर्व does not include वसन्तक।

कुशलनिवेदनार्थम्—कुशलस्य निवेदनम्—६तत्; तस्मै इदम् इति कुशल-निवेदनार्थम्—नित्यसमास:।

Page 178. Sloka 19.

Sans. Expl.—('भरतवाक्यम्' सूत्रधारकृत-नाटकोपसंहारवाक्यम्)—इमामित्यादि। 'न:' अस्माकं, प्रजानाम् इत्यर्थ: 'राजसिंह:' श्रेष्ठो राजा 'सागरपर्यन्तां' समुद्रसीमां 'हिमवद्विन्ध्यकुण्डलाम्' हिमवान् हिमाचल: विन्ध्यश्च कुण्डले कर्णभूषणे यस्या: ताम्, हिमवता विन्ध्येन च शोभिताम् इत्यर्थ: 'एकातपत्राङ्काम्' एकम् एव आतपत्र'

राजसिंहम् 'अङ्कः' चिह्नं यस्याः ताम्, अनन्यशासनाम् इत्यर्थः 'इमां महीम्' एतां पृथ्वीं 'प्रशास्तु' स्वप्रभावेन पालयतु। अस्माकं राजा प्रतापेन सर्व्वां महीं स्वायत्तां करोतु इत्यर्थः ॥१६॥

Notes

भरतवाक्यम्—What follows (viz. the concluding verse) is a benediction from the lips of the सूत्रधार। This is one of the chief characteristics of a Sanskrit drama. भरत—is a synonym of नट। 'भरता इत्यपि नटा चारणास्तु कुशीलवाः'—इत्यमरः। This utterance is called भरत-वाक्य because it is pronounced by the सूत्रधार, the principal भरत (i. e. नट), and also perhaps is intended to commemcrate the name of sage Bharata, the father of Indian dramaturgy.

इमां &c.—Six out of twelve dramas of Bhāsa end with almost the same benedictory verse.

सागरपर्य्यन्ताम्—Adj. to महीम्। सागरः पर्य्यन्तः (=सीमा) यस्याः—बहुव्रीहिः, ताम्।

हिमवद्विन्ध्यकुण्डलाम्—हिमवान् च विन्ध्यश्च – द्वन्द्वः, तौ कुण्डले यस्याः—बहुव्रीहिः, ताम्।

एकातपत्राङ्काम्—आतपात् त्रायते इति आतपत्रम्; umbrella. आतप – त्रै + क। एकम् आतपत्रम्—कर्म्मधारयः, तत् अङ्कः यस्याः—बहुव्रीहिः, ताम्।

राजसिंहः—Nom. of प्रशास्तु। राजा सिंह इव—उपमित-तत्। It cannot be said definitely whether this is a proper name or a benedictory epithet of the then reigning king.

प्रशास्तु—प्र—शास +लोट्, तु।

Rhetoric.—The dr. peculiarity is प्रशस्ति। Def.—'नृपदेशादि-शान्तिस्तु प्रशस्तिरभिधीयते'—सा. द.।

Ch. of Voice—राजसिंहेन सागरपर्य्यन्ता—कुण्डला—पत्राङ्का इयं मही प्रशास्यताम्।

निष्क्रान्ताः सर्व्वे इति अङ्कपरिसमाप्तिः।

अङ्कः—'अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः—सा. द.। See P. 49 ante.

स्वप्ननाटकमवसितम् इत्यनेन नाटक-परिसमाप्तिरुच्यते।

अवसितम्—अव – सो + क्त—कर्त्तरि। For the meaning, cf. अवसान।

Appendix I.

श्रीसोमदेवभट्टविरचितः कथासरित्सागरः ।

लावाणको नाम तृतीयो लम्बकः । *

प्रथमस्तरङ्गः ।

एवं स राजा वत्सेशः क्रमेण सुतरामभूत् ।
प्राप्तवासवदत्तस्तत्सुखासक्तैकमानसः ॥३॥
यौगन्धरायणश्चास्य महामन्त्री दिवानिशम् ।
सेनापती रुमण्वांश्च राज्यभारमुदूहतुः ॥४॥
स कदाचिच्च चिन्तावानानीय रजनौ गृहम् ।
निजगाद रुमण्वन्तं मन्त्री यौगन्धरायणः ॥५॥
पाण्डवान्वयजातोऽयं वत्सेशोऽस्य च मेदिनी ।
कुलक्रमागता कृत्स्ना परं च गजसाह्वयम् ॥६॥
तत्सर्वमजिगीषेण त्यक्तमेतेन भूभृता ।
इहैव चास्य संजातं राज्यमेकत्र मण्डले ॥७॥
स्त्रीमद्यमृगयासक्तो निश्चिन्तो ह्येष तिष्ठति ।
अस्मासु राज्यचिन्ता च सर्वानेन समर्पिता ॥८॥
तदस्माभिः स्वबुद्ध्यैव तथा कार्यं यथैष तत् ।
समग्रपृथिवीराज्यं प्राप्नोत्येव क्रमागतम् ॥९॥
एवं कृते हि भक्तिश्च मन्त्रिता च कृता भवेत् ॥१०॥
परिपन्थी च तत्रैकः प्रद्योतो † मगधेश्वरः ।
पार्ष्णिग्राहः स हि सदा पश्चात् कोपं करोति नः ॥१९॥
तदस्य कन्यकारत्नमस्ति पद्मावतीति यत् ।
तदस्य वत्सराजस्य कृते याचामहे वयम् ॥२०॥
कन्यां वासवदत्तां च स्थापयित्वा स्वबुद्धितः ।
दत्त्वाग्निं वासके ब्रूमो देवी दग्धेति सर्वतः ॥२१॥

---

* Suitably abridged.

† प्रद्योत is the name of the father of पद्मावती । S. V. mentions the name of the brother only, viz. दर्शक (which name occurs also in Budha-swamin's बृहत्कथाश्लोकसंग्रह) ।

नान्यथा तां सुतां राज्ञे ददाति मगधाधिपः ।
एतदर्थं स हि मया प्रार्थितः पूर्वमुक्तवान् ॥२२॥
नाहं वत्सेश्वरायैतां दास्याम्यात्माधिकां सुताम् ।
तस्य वासवदत्तायां स्नेहो हि सुमहानिति ॥२३॥
सत्यां देव्यां च वत्सेशो नैवान्यां परिणेष्यति ।
देवी दग्धेति जाताया ख्यातौ सर्वं तु सेत्स्यति ।२४॥
पद्मावत्यां च लब्धायां सम्बन्धी मगधाधिपः ।
पश्चात्कोपं न कुरुते सहायत्वं च गच्छति ॥२५॥
ततः पूर्वां दिशं जेतुं गच्छामोऽन्याश्च तत्क्रमात् ।
इत्थं वत्सेश्वरस्यैतां साधयामोऽखिलां भुवम् ॥२६॥
कृतोद्योगेषु चास्मासु पृथिवीमेष भूपतिः ।
प्राप्नुयादेव पूर्वं हि दिव्या वागेवमब्रवीत् ॥२७॥

बहुदोषो हि विरहो राज्ञो वासवदत्तया ।
एवं रुमण्वतोक्तः सन्नाह यौगन्धरायणः ॥५५॥
नान्यथोद्योगासक्तिः स्यादनुद्योगी च निश्चितम् ।
राजनि व्यसनिन्यतनश्येदपि यथास्थितम् ॥५६॥

अथ देवीपितुश्चण्डमहासेनाद् विशङ्कसे ।
स सपुत्रश्च देवी च वचः कुरुत एव मे ॥६०॥

इत्येतन्निश्चितमतेः श्रुत्वा यौगन्धरायणात् ।
रुमण्वानब्रवीदेवं तर्हि यद्येष निश्चयः ॥१०४॥
तद्गोपालकमानीय देव्या भ्रातरमादृतम् ।
संमन्त्र्य च समं तेन सम्यक् सर्व्वं विधीयताम् ॥१०५॥
एवमस्त्विति वक्ति स्म ततो यौगन्धरायणः ।
तत्प्रत्ययाद्रुमण्वांश्च चक्रे कर्तव्यनिश्चयम् ॥१०६॥
अन्येद्युर्मन्त्रिमुख्यौ तौ दूतं व्यसृजतां निजम् ।
गोपालकं समानेतुमुत्कण्ठाव्यपदेशतः ॥१०७॥

आगतं तदहश्चैनं स्वैरं यौगन्धरायणः ।
निनाय सरुमण्वत्कं गृहं गोपालकं निशि ॥१०८॥

स च राजहितैषी सन् दुःखावहमपि स्वसुः ।
गोपालकोऽनुमेने तत्कर्त्तव्यं हि सतां वचः ॥१११॥

एवमेतद्विनिश्चित्य ततो यौगन्धरायणः ।
गोपालको रुमण्वांश्च ततो मन्त्रमिति व्यधुः ॥११८॥

युक्त्या लावाणकं यामः सह देव्या नृपेण च ।
पर्यन्तो मगधासन्नवर्ती हि विषयोऽस्ति सः ॥११९॥

सुभगाखेटभूमित्वाद् राजवाससन्निधानकृत् ।
तत्रान्तःपुरमादीप्य क्रियते यच्च चिन्तितम् ॥१२०॥

देवी च स्थाप्यते नीत्वा युक्त्या पद्मावतीगृहे ।
छन्नस्थितायाः येनास्याः सैव स्याच्छीलसाक्षिणी ॥१२१॥

एवं रात्रौ मिथः कृत्वा मन्त्रं सर्वेऽपरेऽहनि ।
यौगन्धरायणाद्यास्ते प्राविशन् राजमन्दिरम् ॥१२२॥
तत्रैवमथ विश्रब्धो वत्सराजो रुमण्वता ।
देव लावाणकेऽस्माकं गतानां वर्तते शिवम् ॥१२३॥

स चातिरम्यो विषयस्तत्र चाखेटभूमयः ।
शोभनाः सन्ति ते राजन्घासाश्च सुयवसाः ॥१२४॥

बाधते तं च नैकट्यात् सर्वं स मगधेश्वरः ।
तत्तत्र रक्षाहेतोश्च विनोदाय च गम्यताम् ॥१२५॥

एतच्छ्रुत्वा स वत्सेशः समं वासवदत्तया
क्रीडैकलालसश्चक्रे गन्तुं लावाणके मतिम् ॥१२६॥

इति लावाणके प्रथमस्तरङ्गः ।

अथ द्वितीयस्तरङ्गः ।

ततः पूर्वोक्तया युक्त्या वत्सराजं सवल्लभम् ।
यौगन्धरायणाद्यास्ते निन्युर्लावाणकं प्रति ॥१॥

वत्सेश्वरोऽपि निवसंस्तस्मिन्देशे दवीयसीम् ।
आखेटकार्थमटवीमटति स्म दिने दिने ॥५॥

एकस्मिन्दिवसे तस्मिन् राजन्याखेटकं गते ।
कार्तव्यसंविदं कृत्वा गोपालकसमन्वितः ॥६॥

यौगन्धरायणो धीमान् सरुमण्वद्वसन्तकः ।
देव्या वासवदत्ताया विजने निकटं ययौ ॥७॥
तत्र तां राजकार्येऽत्र साहाय्ये तत्तदुक्तिभिः ।
प्रह्वामभ्यर्थयामास भावा पूर्वं प्रबोधिताम् ॥८॥
सानुमेने च विरहक्लेशदायि तदात्मनः ।
किं नाम न सहन्ते हि भर्तृभक्ताः कुलाङ्गनाः ॥९॥
ततस्तां ब्राह्मणीरूपां देवीं यौगन्धरायणः ।
स चकार कृती दत्त्वा योगं रूपविवर्तनम् ॥१०॥
वसन्तकं च कृतवान् काणं वटुकरूपिणम् ।*
आत्मना च तथैवाभूत् स्थविरब्राह्मणाकृतिः ॥११॥
तथारूपां गृहीत्वाथ तां देवीं स महामतिः ।
वसन्तकसखः स्वैरं प्रतस्थे मगधान् प्रति ॥१२॥
तथा वासवदत्ता सा स्वगृहान्निर्गता सती ।
अगाच्चित्तेन भर्तारं पन्थानं वपुषा पुनः ॥१३॥
तन्मन्दिरमथादीप्य दहनेन रुमण्वता ।
हा हा वसन्तकयुता देवी दग्धेत्यघोषयत् ॥१४॥

यौगन्धरायणः सोऽथ सह वासवदत्तया ।
वसन्तकेन च प्राप मगधाधिपतेः पुरम् ॥१६॥
तत्रोद्यानगतां दृष्ट्वा समं ताभ्यामुपाययौ ।
पद्मावतीं राजसुतां वार्यमाणोऽपि रक्षिभिः ॥१७॥
पद्मावत्याश्च दृष्ट्वैव ब्राह्मणीरूपधारिणीम् ।
देवीं वासवदत्तां तां दृशोः प्रीतिरजायत ॥१८॥
सा रक्षिणो निषिध्यैव ततो यौगन्धरायणम् ।
आनाययद् राजकन्या ब्राह्मणाकृतिमन्तिकम् ॥१९॥
पप्रच्छ च महाब्रह्मन् का ते बाला भवत्यसौ ।
किमर्थमागतोऽसीति सोऽपि तां प्रत्यभाषत ॥२०॥
इयमावन्तिका नाम राजपुत्रि सुता† मम ।
अस्याश्च भर्ता व्यसनी त्यक्त्वैमां क्वचिद् गतः ॥२१॥

---

* In S. V., Vasantaka does not accompany Yaug. to Rajagriha.

† Described as स्वसा in S. V.

तदेतां स्थापयाम्यद्य हस्ते यशस्विनि ।
यावत्तमानयाम्यस्या गत्वान्विष्याचिरात् पतिम् ॥२२॥

भ्राता काणवटुश्चायमिहैवास्याः समीपगः ।
तिष्ठत्वेकाकिनी भावदुःखं येन न यात्यसौ ॥२३॥

इत्युक्ता राजतनयामङ्गीकृतवचास्तया ।
तामामन्त्र्य स सन्मन्त्री द्रुतं लावाणकं ययौ ॥२४॥

ततो वासवदत्तां तां स्थितामावन्तिकाख्यया ।
वसन्तकं चानुगतं तं काणवटुरूपिणम् ॥२५॥

सहादाय कृतोदारसत्कारा स्नेहशालिनी ।
पद्मावती स्वभवनं विवेश बहुकौतुकम् ॥२६॥

तत्र वासवदत्ता च प्रविष्टा चित्रभित्तिषु ।
पश्यन्ती रामचरिते सीतां सेहे निजव्यथाम् ॥२७॥

तामुत्तमां विनिश्चित्य महार्हैरात्मनः समैः ।
पद्मावती यथाकाममुपचारैरुपाचरत् ॥२९॥

अथ वासवदत्तायाश्चक्रे देव्याः प्रसङ्गतः ।
अम्लानमालातिलकौ वत्सेशात् पूर्वशिक्षितौ ॥२१॥

अत्रान्तरेऽतिदूरासु भ्रान्त्वाखेटकभूमिषु ।
वत्सराजश्चिरादागात् सायं लावाणकं पुनः ॥४७॥
भस्मीकृतमपश्यच्च तत्रान्तःपुरमग्निना ।
देवीं दग्धां च शुश्राव मन्त्रिभ्यः सवसन्तकाम् ॥४८॥
श्रुत्वैव चापतद् भूमौ मोहेन हृतचेतनः ।
तद् दुःखानुभवक्लेशमपाकर्तुमिवेच्छता ॥४९॥
क्षणाच्च लब्धसंज्ञः संजज्वाल हृदये शुचा ।
आविष्ट इव तत्स्थदेवीदाहेच्छयाग्निना ॥५०॥
विलपन्नथ दुःखार्तो देहत्यागैकसंमुखः ।
क्षणान्तरे स नृपतिः संस्मृत्यैतदचिन्तयत् ॥५१॥
विद्याधराधिपः पुत्रो देव्यास्तस्या भविष्यति ।
एतन्मे नारदमुनिर्वक्ति स्म न च तन्मृषा ॥५२॥
इयं किमपि नीतिस्तु प्रयुक्ता मन्त्रिभिर्भवेत् ।
अतो मम भवेज्जातु तया देव्या समागमः ॥५५॥

तत् पश्याम्यत्र पर्य्यन्तमित्यालोच्य स भूपतिः ।
निदधे हृदये धैर्यं बोध्यमानश्च मन्त्रिभिः ॥५६॥
एवं गते स्ववृत्तान्ते लावाणकगतैस्तदा ।
गत्वा मगधराजाय चारैः सर्वं निवेदितम् ॥५८॥
स तद् बुद्ध्वैव कालज्ञो वत्सराजाय तां सुताम् ।
दातुं पद्मावतीमैच्छत्पूर्वं तन्मन्त्रिमार्गिताम् ॥५९॥
ततो दूतमुखेनैनमर्थं वत्सेश्वराय सः ।
यौगन्धरायणायापि संदिदेश यथेप्सितम् ॥६०॥
यौगन्धरायणोक्त्या च वत्सेशोऽङ्गीचकार तत् ।
प्रच्छादितै तदर्थं स्याद् देवी जात्विति चिन्तयन् ॥६१॥
ततो लग्नं विनिश्चित्य तूर्णं यौगन्धरायणः ।
तस्मै मगधराजाय प्रतिदूतं व्यसर्जयत् ॥६२॥
ततः स दुहितुस्नेहनिजेच्छाविभवोचितम् ।
विवाहोत्सवसंभारं चकार मगधेश्वरः ॥६६॥
सा चाभीष्टवरप्राप्त्या मुदं पद्मावती ययौ ।
प्राप वासवदत्ता च तद्वार्ताकर्णनाच्छुचम् ॥६७॥
इत्थं निह्नौकृतः शश्वन्न च भर्तान्यथा त्वयि ।
वसन्तकोक्तिरित्यस्याः सख्यौव विदधे धृतिम् ॥६९॥
अथासन्नविवाहायाः पद्मावत्या मनस्विनी ।
अम्लानमालातिलकौ दिव्यौ भूतश्चकार सा ॥७०॥
ततो वत्सेश्वरस्तत्र संप्राप्ते समयेऽहनि ।
ससैन्यो मन्त्रिभिः साकं परिणेतुं किलाययौ ॥७१॥
प्रविश्य मगधेशस्य वत्सेशोऽप्यथ मन्दिरम् ।
सनाथं पतिपत्नीभिः कौतुकागारमाययौ ॥७६॥
तत्र पद्मावतीमन्तर्ददर्श कृतकौतुकाम् ॥७७॥
ततः स वेदीमारुह्य तस्या जग्राह यत् करम् ।
तदेवारब्धतां प्राप तस्य पृथ्व्याः करग्रहे ॥७९॥
साक्षीकृत्य च तत्कालमग्निं यौगन्धरायणः ।
अद्रोहप्रत्ययं राज्ञो मगधेशमकारयत् ॥८४॥
मन्त्रभेदभयादेवं मगधेश्वरमभ्यधात् ।
अद्यैव नाथ वत्सेशः प्रयाति लावाणकादिति ॥८८॥

अथोज्जयाल वत्सेशो भुक्तपीतपरिच्छदः ।
मन्त्रिभिः सममादाय वधूं पद्मावतीं ततः ॥९०॥
पद्मावत्या विसृष्टं च सुखमारुह्य वाहनम् ।
तथैव च समादिष्टैः सन्नाहधरकैः सह ॥९१॥
आगाद्वासवदत्तापि गुप्तं संन्यस्य पृष्ठतः ।
कृतरूपविवर्तं तं पुरस्कृत्य वसन्तकम् ॥९२॥
क्रमाल्लावाणकं प्राप्य वत्सेशो वसतिं निजाम् ।
प्रविवेश समं वध्वा, देवीचित्तं तु कैवलः ॥९३॥
एत्य वासवदत्तापि सा गोपालकमन्दिरम् ।
प्रविवेशाथ निशीथे च परिष्ठाप्य महत्तरान् ॥९४॥
तत्र गोपालकं दृष्ट्वा भ्रातरं दर्शितादरम् ।
कण्ठे जग्राह रुदती बाष्पव्याकुललोचनम् ॥९५॥
तत्क्षणे स्थितसंविच्च तत्र यौगन्धरायणः ।
आययौ सकमण्वल्कस्तया देव्या कृतादरः ॥९६॥
सोऽस्याः प्रोत्साहविश्लेष दुखं यावद् व्यपोहति ।
तावत् पद्मावतीपार्श्वं प्रयुक्ते महत्तराः ॥९७॥
आगतावन्तिका देवि किमप्यस्मान् विहाय तु ।
प्रविष्टा राजपुत्रस्य गृहं गोपालकस्य सा ॥९८॥
इति पद्मावती सा तैर्विज्ञप्ता स्वमहत्तरैः ।
वत्सेश्वराग्रे साशंका तानेवं प्रत्यभाषत ॥९९॥
गच्छतावन्तिका ब्रूथ निक्षेपत्वं हि मे स्थिता ।
तद्व किं ते यत्राहं तत्रागम्यतामिति ॥१००॥
तच्छ्रुत्वा तेषु यातेषु राजा पद्मावतीं रहः ।
पप्रच्छ मालातिलकौ केनेमौ ते कृताविति ॥१०१॥
सावोचदथ मद्गेहे न्यस्ता विप्रेण केनचित् ।
आवन्तिकाभिधा या वा तस्याः शिल्पमिदं महत् ॥१०२॥
तच्छ्रुत्वैव च वत्सेशो गोपालगृहमाययौ ॥१०३॥
प्रविवेश च गत्वा तद् द्वारस्थितमहत्तरम् ।
अन्तस्थदेवीगोपालमन्त्रिद्वयवसन्तकम् ॥१०४॥
तत्र वासवदत्तां तां ददर्श प्रोषितागताम् ॥१०५॥
पपात च महीपृष्ठे शोकविषविह्वलः ॥१०६॥

ततः साप्यपतद् भूमौ गात्रैर्विरहपाण्डुरैः ।
विललाप च निन्दन्ती तदाचरितमात्मनः ॥१०७॥
अथ तौ दम्पती शोकदीनौ रुरुदतुस्तथा ।
यौगन्धरायणोऽप्यासीद् बाष्पधौतमुखो यथा ॥१०८॥
तथाविधः च तच्छ्रुत्वा काले कोलाहलं तदा ।
पद्मावत्यपि तत्रैव साकुला समुपाययौ ॥१०९॥
क्रमादवगतार्था च राजवासवदत्तयोः ।
तुल्यावस्थैव साप्यासीत् स्निग्धमुग्धा हि सत्स्त्रियः ॥११०॥
मगधेशसुतालाभात्तव साम्राज्यकाङ्क्षिणा ।
कृतमेतन्मया देव देव्या दोषो न कश्चन ॥११२॥
इयं तस्याः सपत्नीव प्रवासे शीलसाक्षिणी ।
इत्युवाचाथ वत्सेशं धीरो यौगन्धरायणः ॥११३॥
अहमेव विशाम्यग्निमावयोः शुद्धिप्रकाशने ।
इति पद्मावती तत्र जगादामत्सराशया ॥११४॥
अहमेवापराध्यामि यत्कृते सुमहानयम् ।
सोढो देव्यापि हि क्लेश इति राजाप्यभाषत ॥११५॥
अग्निप्रवेशः कार्यो मे राज्ञो हृदयशुद्धये ।
इति वासवदत्ता च बभाषे बद्धनिश्चया ॥११६॥
ततः स कृतिनां धुर्यो धीमान् यौगन्धरायणः ।
आचम्य प्राङ्मुखः शुद्ध इति वाचमुदैरयत् ॥११७॥
यद्यहं हितकृद् राज्ञो देवी शुद्धिमती यदि ।
ब्रूत भो लोकपालास्तच्चेद् देहं त्यजाम्यहम् ॥११८॥
इत्युक्त्वा विरते तस्मिन् दिव्या वागुदभूदियम् ।
धन्यस्त्वं नृपते यस्य मन्त्री यौगन्धरायणः ॥११९॥
यस्य वासवदत्ता च भार्या प्राग्जन्मदेवता ।
न दोषः कश्चिदेतस्या इत्युक्त्वा वागुपारमत् ॥१२०॥
गोपालकसहितोऽपि च राजा यौगन्धरायणाचरितम् ।
स्तौति स्म वत्सराजो मेने पृथ्वीं च हस्तगताम् ॥१२२॥
दधदथ नृपतिः स मूर्तिमत्यौ निकटगते रतिनिर्वृती इवोभे ।
अनुदिनसहवाससानुरागे निजदयिते परमुत्सवं बभार ॥१२३॥

इति लावाणकलम्बके द्वितीयस्तरङ्गः ।

Appendix II

METRE

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षर-संख्यातं जातिर्मात्राकृता भवेत् ॥

In Sanskrit poetry a verse has 4 feet (पाद). It is of two kinds—वृत्त and जाति। वृत्त is that in which *letters* are counted, and जाति is that which is determined by *measures* (मात्रा)। N. B. In each case the लघुत्व and गुरुत्व of letters are taken into account. In वृत्त—a letter be it लघु or गुरु is counted as one. In जाति—a लघु or light vowel is counted as one, and a गुरु or heavy vowel is counted as two.

वृत्त is divided into 3 classes :—समवृत्त, अर्द्धसमवृत्त, and विषमवृत्त ।

समम‌र्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥
आदिस्तृतीयवद् यस्य पादस्तुर्यो द्वितीयवत् ।
भिन्नचिह्नं चतुष्पादं विषमं परिकीर्त्तितम् ॥

A समवृत्त has all the 4 feet similar, e. g. वंशस्थ, वसन्ततिलक, &c. In an अर्द्धसमवृत्त the 3rd foot is similar to the Ist, and the 4th foot is similar to the 2nd ; e. g. पुष्पिताग्रा। [For definition, &c. see below]. A विषमवृत्त has all the 4 feet dissimilar, e. g. उद्गता in भारवि 12. 1 ; and also some varieties of उपजाति ।

The most popular variety of जाति is आर्य्या ।

The following is the rule regarding the लघुत्व and गुरुत्व of a letter,—

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्व्वश्च तथा पादान्तगोऽपि वा ॥

Translation.—A letter with अनुस्वार, a long vowel, and a letter with विसर्ग, are heavy. Also, a letter immediately

preceding a conjunct consonant is heavy. A light letter at the end of a foot is *sometimes* regarded as heavy.

In वृत्त, each foot has particular number of letters, but they must be arranged according to लघु and गुरु in each case. For this, rules have been framed by authors of treatises on छन्द: । In those rules certain letters have been adopted each of which technically represents a particular combination of लघु and गुरु letters. Thus,

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरु: पुनरादिलघु र्यः ।
जो गुरुमध्यगतो र ल-मध्य:
सोऽन्तगुरु: कथितोऽन्तलघुस्त: ॥
गुरुरेको गकारस्तु लकारो लघुरेकक: ॥

A लघु vowel is generally represented as ⏑, and a गुरु vowel as—(or a hyphen).

Thus,

म = — — —	ज = ⏑ — ⏑
न = ⏑ ⏑ ⏑	र = — ⏑ —
भ = — ⏑ ⏑	स = ⏑ ⏑ —
य = ⏑ — —	त = — — ⏑
ग = —	ल = ⏑

The various metres employed in the Swapna-Vasavadatta with their definitions and scansions are given below:—

1. अनुष्टुप्—I. 2. 7, 10, 15 ; IV. 4, 6, 8, 9, 10 ; V. 6, 8, 9, 10. 11 ; VI. 3, 6, 7, 9, 11. 12, 13, 14, 16, 17, 18, 19.

The अनुष्टुप् metre consists of 4 feet (पाद) of 8 syllables each. The अनुष्टुप् has many varieties (e. g. पथ्या, चपला, &c.), the purest and commonest form called वक्त्र or श्लोक being defined as follows.—

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥

5th syllable	in every foot	—light
7th „	in 2nd and 4th feet	—light
„ „	in 1st and 3rd „	—heavy
6th „	in every foot	—heavy
(Other syllables		—optional)

In compliance with the general definition of अनुष्टुभ् the following two conditions also should be satisfied :—

(i) 'न प्रथमात् स्नौ' । This amounts to saying that in every foot either the 2nd or the 3rd should be heavy ; and

(ii) "द्वितीय-चतुर्थयोः रच" । In even feet if the 3rd is light, the 4th also must be light. (According to some, this second condition is not compulsory.)

Almost all the apparent violations of this metre come under one or other of the varieties of अनुष्टुभ् । Thus, if in any foot the 5th 6th and 7th are in म-measure (i.e.— — —) the metre is called म-विपुला (e. g. VI. 3, 11, 12, 14, 18) ; if they are in भ measure, the metre is भ-विपुला ; if they are in न-measure, the metre is न-विपुला (also called चपला e. g. VI. 6) ; and so on.

Different permutations of possible measures give rise to innumerable varieties. The varieties are often found mixed up with one another.

2. आर्या—I. 1 ; IV. 3, 5.

Def.—यस्याः पादे प्रथमे द्वादश मात्रा तथा तृतीयेऽपि ।
अष्टादश द्वितीये पञ्चदश चतुर्थके सार्या ॥

[1st foot—12 *Matras* ; 2nd—18, 3rd—12, and 4th—15 *Matras*].

Scansion :—ध्र द य म वे न्दु स व र्णा

वा स व द त्ता व लौ ब ल स्य त्वाम् ।

- - ⏑ - ⏑ - -
प श्चा व तौ षं पू र्वौ
⏑ - ⏑ - - ⏑ - - -
व स न्त का लौ भु जौ पा ताम् ॥

3. उपजाति—V. 5, 13.

उपजाति is a mixture of इन्द्रवज्रा metres.

Def :— स्यादिन्द्रवज्रा यदि तौ जगौ गः
उपेन्द्रवज्रा जतजास्ततो गौ ।
अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु
स्मरन्ति जातिष्विदमेव नाम ।

इन्द्रवज्रा—त, त, ज, ग, ग, i. e. - - ⏑, - - ⏑, ⏑ - ⏑, -, -,
उपेन्द्रवज्रा—ज, त, ज, ग, ग, i. e, ⏑ - ⏑, - - ⏑, ⏑ - ⏑, -, -,

Those which have their feet characterised by the above two metres (viz. इन्द्रवज्रा and उपेन्द्रवज्रा) are called उपजाति। Mixtures of other specially kindred metres also, e. g. वंशस्थ (otherwise called वंशस्थविल) and इन्द्रवंशा, go by the same name (viz. उपजाति)।

उपजाति has thus various forms of which the mixture of इन्द्रवज्रा and उपेन्द्रवज्रा is the principal one and is frequently met with.

⏑ - ⏑ - - ⏑ ⏑ - ⏑ - -
Scansion :— अ स्त्य स्य व त्या धि प तिः सु ता याः
- - ⏑ - - ⏑ ⏑ - ⏑ - -
प्र ख्या त ना ले व ज नं क र त्याः

4, पुष्पिताग्रा—1. 5 ; VI. I.

Def. अयुजि नयुगरेफतो यकारो ।
युजि च नजौ जरगाश्च पुष्पिताग्रा ।

i. e. (odd feet) न न र य i. e. ⏑ ⏑ ⏑, ⏑ ⏑ ⏑, - ⏑ -, ⏑ - -
(even feet) न ज ज र ग i. e. ⏑ ⏑ ⏑, ⏑ - ⏑, ⏑ - ⏑, - ⏑ -, -

⏑ ⏑ ⏑ ⏑ ⏑ ⏑ - ⏑ - ⏑ - -
Scansion :- प रि ह र तु भ वा न् पा प वा दं
⏑ ⏑ ⏑ ⏑ - ⏑ ⏑ - ⏑ - ⏑ - -
न प क ष मा श्र म वा वि षु प्र यो ज्यम्

5. वसन्ततिलक -I. 4, 6, 11; IV. 2 ; V. 1, 2, 3 ; VI. 2, 4, 5, 15.

Def. ज्ञेयं वसन्ततिलकं तभजा जगौ गः

i. e, त भ ज ज ग ग ; i. e. - - ⏑, - ⏑ ⏑, ⏑ - ⏑, ⏑ - ⏑, -, -

- - ⏑ - ⏑ ⏑ ⏑ - ⏑ ⏑ - ⏑ - -
Scansion :— किं व क्ष्य ती ति हृ द यं प रि श ङ्कि तं मे

6. वैश्वदेवी—I. 9.

बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ

i. e. म म य य ; i.e. - - -, - - -, ⏑ - -, ⏑ - -

The यति is on बाण (i.e. 5th) and अश्व (i.e. 7th).

- - - - - - ⏑ - - ⏑ - -
Scansion :—का र्यं नै वा र्थै र्ना पि भो गै र्न व स्त्रैः

7. शार्दूलविक्रीडित—I. 3, 8, 12 ; IV. 1 ; V. 12. 4

Def. सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्

i. e. म स ज स त त ग ; i. e. - - -, ⏑ ⏑ -, ⏑ - ⏑, ⏑ ⏑ -, - - ⏑,
- - ⏑, -

- - - ⏑ ⏑ - ⏑ - ⏑ ⏑ ⏑ - - - ⏑ - - ⏑ -
Scansion :—धीरं ध्मा त्र म सं श्रि त स्य व स त स्तु ष्ट स्य वन्यैः फलैः

8. शालिनी—I. 13 ; IV. 7 ; VI. 10.

Def.—मात्तौ गौ चेच्छालिनी वेदलोकैः

म त त ग ग i. e. — — —, — — ⏑, — — ⏑, —, —

The यति is on वेद (i. e. 4th) and लोक (i. e. 7th).

- - - - - ⏑ - - ⏑ - -
Scansion :—नै वे दा नीं ता दृ शा श्च क्र वा काः

9. शिखरिणी—I. 14, 16.

Def. रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी

i. e. य म न स भ ल ग

i. e. ⏑ - -, - - -, ⏑ ⏑ ⏑, ⏑ ⏑ -, - ⏑ ⏑, ⏑, -

The यति is on रस (i.e 6th) and रुद्र (i. e. 11th).

[यति is the natural pause in the recitation of a poetic foot. It as been defined thus—"यतिर्जिह्वेष्ट-विश्रामस्थानं कविभिरुच्यते ।]"

⏑ - - - - - ⏑ ⏑ ⏑ ⏑ ⏑ - - ⏑ ⏑ ⏑ -

Scansion :—अ ना द्वा रे तु ल्य: प्र त त क दि त व्याम व द न:

10. हरिणी—VI. 8.

Def. नसमरसलागः षड्वेदैर्हयैर्हरिणी मता

i. e. न स म र स ल ग

i. e. ⏑ ⏑ ⏑, ⏑ ⏑ -, - - -, - ⏑ -, ⏑ ⏑ -, ⏑, -

The यति is on 6th, वेद (i. e. 4th) and हय (i. e. 7th).

⏑ ⏑ ⏑ ⏑ ⏑ - - - - - ⏑ - ⏑ ⏑ - ⏑ -

Scansion :—अ ह म व जि त: पू र्व्वं ता व त् सु तैः स ह ला लि त: ।

Of the works on Sanskrit Posody, Pingla's छन्दःसूत्र is the most authoritative, and Kedara-bhatta's वृत्तरत्नाकर from which Mallinatha often quotes, as well as Gangadasa's छन्दोमञ्जरी, is the most popular. In the last two works the definition of each metre is couched in its own metre. Thus, the definition of इन्द्रवज्रा is in इन्द्रवज्रा, of उपेन्द्रवज्रा in उपेन्द्रवज्रा, of मालिनी in मालिनी, and so on. This peculiarty seems to have contributed much to the popularity of the said works. श्रुतबोध (attributed to Kalidasa) is the another work of the same type, but its definitions are mixed up with various poetic conceits outside the points of Metre (beautiful though they may be).

Appendix III.

An Index of Slokas in Swapna-Vasavadatta.

Appendix IV.

An Index of important words and matters occurring in the Notes. The reference is to Pages.

———

Appendix V

MODEL QUESTIONS.

1. Name the plays of the Trivandrum Sanskrit Series discovered by M. M. Pandit Ganapati Shastri.

2. Enumerate the grounds on which you may take the above plays to have emanated from the pen of one and the same author.

3. Write what you know about Bh*a*sa and his influence on later poets.

4. Write a short dissertation on Bh*a*sa's age.

5. Discuss the source of the S. V.

6. Narrate the story of Udayana and note the deviations in Swapna-Vāsavadattam.

7. Give a summary of the events narrated in S. V.

8. Write short notes on :—

वत्स, कौशाम्बी, राजगृह, उत्तरकुरु, दर्शक, महासेन, नान्दी, विष्कम्भक, प्रवेशक, अङ्क, विदूषक, काञ्चुकीय, घोषवती, वातयोषित, सूर्यामुखप्रासाद ।

9. Account for the title Swapna-Vāsavadatta. Is it स्वप्नवासवदत्ता or स्वप्नवासवदत्त ? Give reasons for your answer.

10 What is the significance of V.'s weaving garlands for P. in Act III ? [See Notes P. 61-62].

11. Give a summary af Act V.

12. Sketch the following characters :—V*a*savadatt*a*, Padm*a*vati, Udayana and Yaugandhar*a*yana.

13. Quote some good sayings (सुभाषित) from the S. V.

14. Explain (or write explanatory notes on) and translate into English the following :—

Verses :—I. 1, 4, 7, 15 ; IV. 2, 7 ; V. 2, 13 ; VI. 4, 8, 10, 18.

Prose :—(a) सविशानमस्य दर्शनम् (P. 9)

(b) तपस्विन्निति...न स्निह्यते मे मनसि (P. 10)

(c) श्रुतिविशेषणार्थं...उचितवानस्मि (P. 27)

(d) आगमप्रधानानि...भवन्ति (P. 51)

(e) कोकिलानाम्...संवृत्त: (P. 66)

(f) सान्निमन्नासः....भविष्यत: (P. 171)

(g) संक्षिप्यतां यवनिका (P. 173)

(h) अथिं स्वं....अपराध्यति (P. 175)

(i) कौशाम्बीमात्रं परिपालयामि (P. 176)

15. Write grammatical notes on :—

उत्सिक्तो विनयादपेतपुरुष: (P. 6), स्निह्यते (P. 10), प्रतिज्ञानीम: (P. 20)' सुखमयो भवेद्द्रातुम् (P. 20), खैरं खैरं प्रविशतु (P.26), महद्भारम् (P. 36), सविभ्रमो ह्ययं भाव: (P. 36) तस्मिन् सर्व्वमधीनम् (P. 36), आपृच्छामि भवती (P. 38), उत्कण्ठिष्यति (P. 39), त्रायति (P. 57), मा इदानीं चिन्तयित्वा (P. 57 & 136), कुसुमावचयम् (P. 69), अथ्युक्तो....भवेम (P. 71), मा मा भूव: अवचित्य (P. 71), शब्दापय (P. 108), धरते (P. 132), उत्तिष्ठतु (P. 136). पितृं मे आतिकुलस्य कुशलवृत्तान्तं सोढुं (P. 149), मया काङ्क्षितवान्भव: (P. 154), यदुचिताम् वत्सान् प्राप्त,....कारणम् (P. 156) पीड़यान्त:पुरजोनष्टा (P. 157), मा दाक्षिं....सन्त्यपिदं (P. 158), तुल्यधर्मा: (P. 159), फलका (P. 160), मज्जमाना: (P. 174).

ADDENDA & ERRATA

Addenda

(Introduction)

P. 3. (At the end of sec. I) Add the following as N.B.

[N. B :—The manuscript of a new drama named यज्ञफलम् has been discovered. The authorship has been attributed to Bhasa, but the question is not yet beyond doubt.]

(Text Portion)

P. 145. Add the following text at the begininng of the page (slipped inadvertently).

अपि च, स्निग्धासि घोषवति ! या तपस्विन्या न स्मरसि,

श्रोणीसमुद्वहनपार्श्व-निपीड़ितानि
खेदस्तनान्तरसुखान्युपगूहितानि ।
उद्दिश्य मां च विरहे परिदेवितानि
वाद्यान्तरेषु कथितानि च सस्मितानि ॥२॥

(Notes Portion)

Notes 4. किं निमित्तम् etc.—हेतौ १मा or २या by the वार्त्तिक-rule "निमित्त-पर्य्यायप्रयोगे सर्वासां प्रायदर्शनम् ।"

P. 20. प्रद्वेषो बहुमानो वा &c.—Compare in this connection—"There is nothing either good or bad ; but thinking make it so."—Shakespeare. "As our inclinations, so our opinions".—Goethe. "The mind is its own place and in itself can make a heaven of hell, hell of heaven."

—Milton.

P. 60. पेक्खामि—For प्र-ईक्ष read पेक्ख। पेक्ख is a root (used exclusively in Prakrit) which, exactly like the root दृश्, is replaced by पस्स in certain cases.

Errata

[Introduction]

Page	*Line*	*For*	*Read*
4	6	Personœ	Personæ
7	15	प्द्योकैः	प्द्येकैः
7	18	देवकुल रिव	दे वकुलैरिव

Page	*Line*	*For*	*Read*
11	20	यम्रक्षं धैस्तपसा	यम्रसं चैस्तपसा
12	3 (of F.N.)	general	the general
17	23	पा कः	पावकः
21	27	घोषवतो	घोषवती
32	18	Saptasati	Saptasati by हाल
33	21	repressented	represented
		[Text Portion]	
1	10	रभ्य	रैभ्य
3	15	उद्वनवेन्दु	उदयनवेन्दु
14	2	स गेह	सभगेहं
15	7	इमस्स	इमस्स
17	13	समोप्पित	समीप्सित
20	5	पठमं	पढमं
21	24	your Highness	Your Highness
23	11	ladyship	Ladyship
36	7	स कथितम्	सह कथितम्
42	12	भट्टि दा आ	भट्टिदारिआ
44	5	सं वृत्ता	संवुत्ता
45	3	दाणि	दाणिं
51	5	तेन	तेण
52	2	अत्थ	एत्थ
55	1	एदिना	एदिणा
57	7	अस	असं
71	2 (F.N.)	ग्रदि	यदि
73	2	तवाइंसि	तन्नाइंसि
177	21	is Rumanwan	Rumanwan is
		[Notes Portion]	
4	3	भासवदत्तावली	भासवद्दत्तावली
34	8	विलभ्यम्	विलक्षम्

4th Edition

This is the 4th Edition of the book which has been thoroughly revised. Much attention has been bestowed on the passages in Prakrit the study of which will be greatly facilitated by a perusal of the few pages headed "Elements of Prakrit". In the matter of publication the author offers his special thanks to his learned friends Prof. Durgasharan Chakravarty M.A. and Prof. Himangshu prasad Bhattacharya M. A. for their unstinted services whenever required.

In view of higher cost on all sides the price of the book has been moderately increased.

Printing of this edition had to be gone through rather hurriedly. Inspite of best efforts some mistakes and misprints have been noticed. These have been included in the Errata so that they may not be lost sight of in the next Edition.
